क्रम सं० २५६

प्रवेश सं० ५५०८२

विषय: ऋग्वेद

ग्रन्थकार नारायणभट्ट

नाम आश्वलायन [illegible]

पत्र सं० १-१७२

श्लोक सं०

अक्षर प्र० (पंक्तौ) [illegible]

पंक्ति सं० (पृष्ठे) १२

आकार [illegible]

लिपि: देवना.

आधार: कागज

सं. [illegible]

आ. ४५८०

~~आ ४५८८~~

वि० विवरणम् [illegible]

001860

बी० एम० यू० प्रा— [illegible] एम० सी० ई०—[illegible]—५० ०००

Indira Gandhi National
Centre for the Arts

॥ॐ श्री आंमत्कारिका मारंभ॥

श्रीगणेशाय नमः ॥ ॐ नत्वा नमाश्वलायनमाचार्यं सर्वकर्मयंतारं ॥ यद्गृह्यकारिकार्थो
यदनुग्राह्य र्थ्यते क्वापि ॥ १ ॥ तत्रादावाश्वलायनगृह्यसूत्रमात्रे वात्स्यव्युत्पन्नमतीं
अध्यायेनैकदशस्पर्शिना तदुक्तं तत्कर्म नि स्तारइति वृत्तिकृन्नारायणावृत्तिमकरोत् ॥ ता
मेव वृत्तिं पुरस्कृत्य सूत्रार्थानुकूलानुनयंतारीन् विचार्य कारिकाकारः क्रमेणोति कर्तव्यता का
रिणी कारिकां चकार ॥ तथाप्यत्रे केचन संक्षेपकाठिन्यात्कर्म निर्वाहकारिणीमपि कारिकां
निर्वास्मृतिमयात्रापयोगिनीमवधार्य कर्म कारयंति कुर्वंति च अतः कोप्यत्र कर्मदेवतानुग्र
हणगृह्यात्कर्मसकलकर्मसत्त्वादौ किमते किमस्ति किं वा नास्ति ॥ त्यादिरूपसंदेहस्य कंद
लं पद्वस्यादुरीकर्तुमशक्यत्वात्कारिकार्थपरिज्ञानार्थं ऋग्वेदांतःपातिन्याश्वलायनशाखा
यां कललवपुरवासि नेको नारं वां पदे वभट्टाख्यं गुरुमुपास्य तदुक्तमेव निमित्तीकृत्य
क्रियमाणकर्मकलापसंदेहोनु त्तयेतावतीमपि कारिकां विवृणोति ॥ तत्राद्यं पद्यं ॥ आश्व
लायनमाचार्यं नत्वा नहृह्यकर्मणां प्रयोगं वच्मि केषांचिद्वृत्तिकरादिभाषितं इति ॥ १ ॥

अस्यार्थः ॥ आश्वलानाख्यं प्रसिद्धमाचार्यं नमस्कृत्य आश्वलायनोक्तगृह्यकर्मणां प्रयोगमि
ति कर्तव्यतां वच्मि कथयामि ॥ अत्र गृह्यकर्मणामित्यत्र गृह्यशब्दस्यार्थ स्वयं ॥ गृहे नाम
तो ग्निर्गृह्यः ॥ तत्र भवानि कर्माणि लक्षणया गृह्याणि स्मार्तानीत्युच्यंते ॥ गृहशब्देन शालाभा
र्या च ॥ तत्र भार्यासंयोगादग्निः यत्र च दायाद्यविभागकालेपि आधेः ॥ तत्र तत्र गृह्यकर्म
व्यवहार इति ॥ तत्र प्रयोगकथनं कथं वेत्याह संक्षेपात् ॥ वृत्त्याद्यपेक्षया संक्षेपः न कर्मण
मिति कर्तव्यतासंकोच इति ॥ कीदृशं प्रयोगं वृत्तिकारादिभाषितं ॥ आदिशब्दाज्जयंतः ॥ शौन
कश्चैतैर्भाषितं कथितं प्रदर्शितमिति ॥ इति कर्तव्यतानिर्वाहार्थं वक्ष्यमाणकर्मणां झटिति
कर्मसिद्धिर्भवति ॥ यथा ॥ तथात्र पुरतः परिभाषा रचिता ॥ तत्रादौ तावत्तदर्थकथनमेवार
भ्यते ॥ प्राणानायम्य संकल्प्य परितः स्थंडिलं शुचि ॥ अधिकं वेषुमात्रं वा गोमयेनोपलिप्य चे
ति ॥ २ ॥ तत्र पूर्वं शुचिरपि कर्मागत्वाद्विराचम्य नवकुशास्तृते यज्ञियेपीठे उपविश्य प्राणाया
मं कुर्यात् ॥ तथा च शौनकः ॥ अथ शुद्धे समे देशे ह्यासीनः प्राङ्मुखः शुचिरिति ॥ ततः संकल्प्य तत्तत्क

Indira Gandhi National
Centre for the Arts

गृ० का० र्गानुसारेण तथा तथा प्रतिज्ञाय कुण्डं इषुमात्रे अधिके वा परतः स्थंडिलं परितः गोमयेनोलिप्ये
रि त्यन्वयः॥ तत्र शुचिस्थलेन अर्थात् शुष्कस्थले कोपि वा पितमिति॥ स्थंडिलं तु होमयोग्यः प्रदेश
२ इति॥ तत्परिमाणापेक्षायां निर्बन्धे इषुमात्रे न तो धिकं च नितरां स्यादिषुमात्रावरं॥
अवरं चेदिषुमात्रं अत्र विशेषः॥ इषुर्नाम अरत्नित्रयं॥ त्रिरत्निरिषुः स्यात् इति अभि
धानात्॥ अरत्निः स्यात्कूर्पमारभ्य कनिष्ठिका पर्यंतमायामः॥ तदुक्तं॥ प्रकोष्ठो विस्तृत
करो हस्तो मुष्ट्यातु बद्धया॥ अरत्निः स्यादरत्निस्तु निष्कनिष्ठेन मुष्टिना॥ आ
पस्तंबमते च तु विंशत्यंगुलारत्निः तदर्द्धे चत्वारिंशदंगुलमात्रं॥ स्थंडिलप्रमाणं नि
रूप्य तत्तु संस्कार्यो न्यक्कथं भवेदित्याह॥ तत्स्थंडिलं गोमयेन परितः उपलिप्य २
सर्वासु च तत्स्वप्रलेपनं कुर्यादित्यर्थः॥ तथा च शौनकः॥ इषुमात्रं च तु दिक्षु

गोमयेन सवारिणा॥ उपलिप्य स्थंडिलं तु चतुरस्रं तु सर्वतः शनैः॥ इदानीं स्थंडिलसंस्कारमा
ह॥ याज्ञियं शकलं किंचिदादहीत ततः परं॥ अग्निस्थापनदेशस्य पश्चात्प्रादेशसंमितां
॥३॥ उल्लिखेद्दक्षिणाग्रां तस्यां उभयतो परे॥ पूर्वापरे उदक्संस्थे असंसृष्टे च पूर्वया॥४॥ म
ध्ये तिस्र उदक्संस्थाः पूर्वाया मात्र संहताः॥ लिखित्वा तेन शकलं पाणियं तन्निधाय च
॥५॥ आद्भिरभ्युक्ष्य शकलं नैरस्य उपस्पृशेत्॥ अस्यार्थः॥ ततः परमुपलेपनानंतरं॥
याज्ञियं यज्ञवृक्षजन्यं पलाशादेरन्यमिति शकलं तत्काष्ठैकदेशं किंचिदिति अतिवालित
प्रमाणमुल्लेखनसमर्थं आददीत लेखार्थं गृह्णीयात्॥ तथा च शौनकः॥ तस्मिन् स्तरेयाज्ञिय
स्य शकलेन षडुल्लिखेदिति कथं षड्लेखास्तु अग्नेः प्रतिष्ठापनं स्यादिति॥ तदेवोल्लेखन
मा॥ अग्निस्थापनदेशस्य यत्र स्थंडिलमध्ये अग्निः स्थाप्यते॥ सोयमग्निस्थापनदेशः॥ त
स्य पश्चात्पश्चिमभागे प्रादेशपरिमितामेकां प्रादेशलेखां लिखेत्॥ कीदृशीमित्याह॥ उदगा

Indira Gandhi National
Centre for the Arts

यतो दक्षिणतआरभ्य उत्तरभागं नयेत्॥ तथा च सति उदग्दीर्घा भवति॥ ता मा लि
ख्यत स्या उभयतो परे तस्या उदक्संस्थायाः उभयत आद्यंतयोर्दक्षिणोत्तरयोः पर
३ ह्ले लेखे लिखेत्। कथंभूते पूर्वायते पश्चिमत आरभ्य पूर्वदिग्भागं नयेत्। प्रादेशमा
त्रप्रमाणमत्र रेखासु धृत्तौ तु प्रादेशमात्रो न्यूनो चेति सूत्रं व्याख्याने निरूपितं। कु
त आरभ्य कुत्र वा रेखाक्रमे संस्थानमाह॥ उदक्संस्थितिं॥ दक्षिणभागं लेखां
निर्वर्त्य उत्तरभागे लेखेदित्यर्थः॥ पूर्वया प्रथमया पश्चिमभागस्थितया लेखया स
ह असंस्पृष्टे अमिलिते॥ एवं च सति लेखात्रयमनयारीत्या ज्ञातं॥ एका पश्चिमभागे
अपरा दक्षिणे अपरोत्तरे॥ एतासां मध्यमध्यप्रदेशे तिस्रो लेखा लिखेत्॥ पूर्वायामाः
पूर्वभागेनेतव्याः। असंहताः परस्परममिलिताः॥ उदक्संस्था उत्तरे संस्थासमाप्ति ३
र्यासां ताः अर्थात् आरंभो दक्षिणत इत्यर्थः। ततः तं धृकलं किं कुर्यादित्याह॥ लिखितोय

नेतायेन शकलेन लेखा लिखिताः॥ तद्यज्ञियं शकलं अर्थात् स्थंडिले निधाय। अत्रेत
च्छब्दस्य पूर्वपरामर्शित्वेपि पुनः यज्ञियं शकलं इत्युक्तं॥ तन्निरस्यमानमपि किमप्युत्स्था मु
दयिष्यतीत्येतज्ज्ञापनार्थमिति॥ पूर्वं यज्ञियशकलादानं कुर्यादित्युक्तं॥ न तु तेनो त
ल्लेखनं कुर्यादिति। नतु कां पुरीकर्तुं येन लिखिता यज्ञियं शकलमित्युक्तमिति वा॥
स्थंडिलस्थं शकलं किं कुर्यादित्याह॥ शकलसमेतं स्थंडिमाद्भिरुदकेरभ्युक्ष्य तत् मोक्ष्य
कलं निरस्या नउपस्पृशेत्॥ शौनकमते प्राच्य निरसनं॥ तथा च शौनकः॥ निधाय
शकलं तस्मिन्नभ्युक्ष्य स्थंडिलं जलैः॥ निरस्य शकलं प्राच्यां पाणी प्रक्षाल्य वाग्यत
८ इति॥ तत्परिशिष्ट॥ यज्ञियशाकलं ... न स्थंडिलमु... ल्लिख्य तत्र प्रागग्रं निधा
य प्रोक्ष्य आग्नेय्यां दिशि निरस्येत्॥ अत्र मौन मा व रव... तथा न स्पृशेत् तर॥ स्नास्यतो
वरुणः कांतिं जुह्वतो ग्निः श्रियं हरेत्॥ ... तो मृत्युरायुष्यं तस्मान्मौनं विदुर्बुधाः॥

अत्राग्निनिर्णयमाह भगवान्॥ स्मार्त्ताग्नि हि विधो — ज्ञेयो गृह्यः पौरुष इत्यपि॥ यस्मिन्विवा
हं कुरुते सोग्निर्गृह्य इति स्मृतः॥ जातकर्मादिसिध्यर्थं योव्याहृतिभिराहृतः॥ सोग्निः पौरुष
४ इत्युक्तः शालाग्निर्लौकिकस्तथा॥ गृह्यं गृह्याग्निकर्माणि चेतराण्यपि पौरुष इति॥ का
रिकायां॥ चौलकर्मोपनयनगोदानाद्यास्तथा॥ व्रतादिस्नानमित्येते लौकिकाग्नि स्थि
तिरिति॥ ननौ हृलेखानंतरं किं कर्त्तव्यमित्याह॥ गतिष्ठाप्य उल्लेखास्फृत्य होमायाग्नेह विभु
जे॥ ६॥ एतदंतं प्रकुर्वीत होम्यत्संस्थापितेन तेइति॥ अस्यार्थः॥ अथोल्लेखानंतरं षट्स्थ
पिल्लेखास्फृत्य होमसत्वर्थमग्निं प्रतिष्ठाप्य व्याहृतिपूर्वकमग्निं संस्थापयेत्॥ होमायोल्लं
हविर्भुजमित्यत्र होमायेत्यत्वं॥ तच्च द्विधा॥ अरण्यादिजत्वं प्रदीप्तं बहुकेगारमयत्वं च॥
सिद्धांतशेखरे पितृमेधारणिजन्योग्निरुत्तमः सूर्यकांतजः श्रुतमः श्रोत्रियागारान्मध्यमः
स्वगृहादितइति॥ अग्निप्रणयने विशेषमाह॥ त्रिः पात्रांतरेणापिहितेतास्रपात्रादिके ४
शुभे॥ अग्निप्रणयनं कुर्याच्छरावेनादृशेपि वेति॥ यत्तु स्मृत्यर्थसारे॥ शरावे भिन्नपात्रे वा क

पाले चोल्मुकेपि वा॥ नाग्निप्रणयनं कुर्याद्व्याधिहानिभयावहं॥ इति॥ तस्य पात्रे मुख्यपात्रसंभवे
शरावेन ग्राह्याः इति॥ तात्पर्यार्थं न तु सर्वथा निषेधः॥ प्रतिष्ठाप्य स्फृत्वा स्थितेः षट्स्थपिल्लेखा
स्फृत्य भिव्याप्याग्नि प्रतिष्ठापन क्षितिवृत्तिः॥ स्थंडिलेग्निं व्याहृतिभिरभ्यातं प्रतिष्ठाप्येति॥ अ छा
त्र व्याहृतिभिरुपलक्षणं॥ ... नाइत्सन पोमं त्वथाहि र ह रेतेन मंत्रभाष्ये अग्निप्र
तिष्ठापनपरत्वेन व्याख्यानत्वाद्॥ एतदंतं कुर्वीत कर्मांगं द्विराचमनादग्निप्रतिष्ठा
पनमंते यस्य कर्मणस्तत्तथोक्तानावस्यर्यंतं कर्म कुर्वीत॥ पुनरेतदंतं करणं विश्रादयाति॥
संस्थापितेन लेसंस्थापितो नाम व्याहृत्यादिमंत्रैस्तास्फल्लेखास्फृत्य प्रतिष्ठाप्य॥ तस्मिं
प्रति नग्नौ होम्याग्निरित्यन्वयः॥ एतदंतमग्निं स्थापनांतं कर्म कुर्वीत इत्यर्थः॥ तेन वैश्वदेवार्थे
ग्नौ नित्यहोमादौन प्राप्नुत इति भावः॥ अत्राग्निप्रतिष्ठाभावात्॥ एवमनचारीत्याहोम
योग्यमाग्निं निरूप्य आज्यैकद्रव्ये होमे कस्यागस्यनित्यत्वं कस्य वा विकल्पमिति वकु

Indira Gandhi National
Centre for the Arts

गृ॰का॰ मारभते॥आज्यैकद्रव्यके होमे स्याच्चेदाज्यपरिग्रहः॥स्यात्परिस्तरणं नत्कृताकृतमिति।स्थिति
शिति॥अस्यार्थः॥आज्यमेव एकद्रव्यं यस्मिन्होमे स तथोक्तः।यथा चौलोपनयनादौ॥ता
५ दृशे होमे यदि स्याच्चेदाज्यपद परिग्रहं करोति॥आज्येन जुहुयादिति ब्रूयात्॥तदा तत
स्मिन्होमे परिस्तरणं कृताकृतं कृतिरेव कृते कृतं च अकृतं च यत्तथोक्तं करणे अभ्युदयः
अकरणे प्रत्यवायो नास्तीति वृत्तिकारः॥इति स्थितिः॥इति सर्वत्रास्य वस्तुपरिस्तृतेर्नि
त्यत्वं कुत्रेत्याह॥नोच्चारयति यत्राज्यपदं कर्मकस्य च कृतु॥अनादिष्टाज्यहोमेषु तत्र नित्या
परिस्तृतिः॥न आदिष्टः अनादिष्टः आज्यहोमो येषु कर्मसु यथा गृहप्रवेशनीय होमादौ
आ नः प्रजां जनयतु इत्यादिभिर्जुहुयादित्याह॥तत्र परिस्तृतिर्नित्या॥अत्र चौलोपनयना
दौ गृहप्रवेशनीयहोमे च आज्यैकद्रव्यप्रयुक्तावपि कथमेकत्र परिस्तृतौ विकल्पः कथ
मेकत्र नित्यत्वमिति चेत्॥उच्यते।यत्र जुहुयादित्याह।तत्र परिस्तृतिर्नित्यः।यत्राज्येन जुहु ५

यादिति ब्रूयात्॥तत्र कृताकृतं परिस्तरणं।कुत्र वा कर्मणि आज्यभागयोः ब्रह्मणो विकृ
ताकृतत्वं कुत्र वा नित्यत्वं तदभिरूपयितुमाह॥सर्वस्मिन्पाकयज्ञेस्त आज्यभागौ कृताकृ
तौ॥सर्वेषु पाकयज्ञेषु भवेद्ब्रह्मा कृताकृतः॥९॥धन्वंतरिमखे ब्रह्मा नित्यः शूलगवेत
था॥सर्वेषु पाकयज्ञेषु भवेद्ब्रह्मा कृताकृतः॥९॥धन्वंतरिमखे ब्रह्मा नित्यः शूलगवे तथेति॥अस्यार्थः॥पाकयज्ञो नाम चरुद्रव्यकयज्ञमात्रं तत्र तस्मिन्यज्ञमात्रे आज्यभा
गौ कृताकृतौ स्तः।तौ आज्यभागाविति अग्नीषोमोपक्रम्यौ उच्येते।अग्निश्च सोमश्च अ
ग्नीषोमौ अनयोरुद्देशेन हूयमानौ आज्यभागौ कृताकृतौ विकल्पितौ॥सर्वेष्वपि पा
कयज्ञेषु ब्रह्मणो विकल्पः।पाकयज्ञग्रहणमाज्यहोमाधिकारनिवृत्त्यर्थं कस्मिन्नपि पा
कयज्ञे ब्रह्मणो नित्यत्वमाह।धन्वंतरियज्ञे शूलगववर्जे अन्यत्र ब्रह्मणः कृताकृतत्वं यत्र
हा ब्रह्माणमुपवेश्य कर्म कुर्यात्तदा कस्मिन्समये कथं वा उपवेशयेदिति चेत्॥उच्यते।
तदा ब्रह्मवत्सु कर्मसु प्रणीताप्रणयनात्पूर्वं उत्तरदिग्भागे ब्रह्माणं नीत्वा यजमानः स्व

Indira Gandhi National
Centre for the Arts

गृ० का० हस्तेन तद्धस्तं गृहीत्वा वरयेत् ॥ यदाह शौनकः ॥ अथ ऋत्विजं वरणीयं कुलीनं ब्राह्मणोत्त
मं तस्य दक्षिणं पाणिना गृह्य ब्रह्माणं वृणुयात् तत्राभीः ॥ द्वितीयया विभक्त्या तेनामो । ब्रह्म
६ वृण इति । उक्तो वृतो स्मीति । वदन्नेनाग्निं परीत्य च । तस्मिंस्तु दक्षु खस्थितादक्षि
णे वासने तृणं ॥ अंगुष्ठानामिकाभ्यां तु समादाय निरस्य च ॥ निरस्त इत्यनेनैव ता
त्त्यग्दक्षिणां दिशं । अपस्पृश्य इदमहं मत्कपा विस्तृतृणेषु सः । तामत्त पाण्यंगुष्ठा
दक्षिणे पर्यवास्थित इति । अत्र वामोरुपर्यव । स्थित दक्षिण पाद इति व्याख्येयं । लोक
यार्थमत्र प्रयोगो लिख्यते । कर्त्ता स्ववामेन दक्षिणेन पाणिना विप्रस्य दक्षिणं पा
णिं गृहीत्वा अस्मिन्नुपक्रांते कर्मणि अमुकशर्माणं भवंतं ब्रह्माणं त्वा ऋत्विजं वृणे ॥ त
तो वृतोस्मीति ब्रह्मा ब्रूयात् । वृतो ब्रह्मा तत इत्यान्यदेशतो गत्वा तत्रैव कर्मांगं गावमय ६
समस्तपाण्यंगुष्ठाभूत्वा अग्नेः पूर्वविभागेन गत्वा दक्षिणत आगत्य तिष्ठन्नेव आसन

स्थमेकं कुशं छित्वा यं दक्षिणहस्तेन अंगुष्ठोपकनिष्ठिकाभ्यां गृहीत्वा नैरृत्यां दिशि निरस्य
स्यजेत् ॥ तत्रायं मंत्रः ॥ निरस्तः परावसुरिति । अनेन मंत्रेण सृजेत् । ततो दक्षिणहस्तेन
उदकस्पर्शं कृत्वा आसनकुशेषु समस्तपाण्यंगुष्ठ एव सन् इदमहमर्वावसोः सदने सी
दामीति मंत्रेण उपविश्य ॥ ॐ बृहस्पतिर्ब्रह्मा ब्रह्मसदन आशिष्यते बृहस्पते यज्ञं गोपा
येति जपेत् ॥ ततो यजमानः प्रणीतापात्रमादाय अग्नेः पश्चिमभागे संस्थाप्य उस्रूत
वारिणा संपूर्य पवित्रे अंतर्द्धाय गंधपुष्पाणि प्रक्षिप्य नासिकांतमुद्धृत्य ॐ ब्रह्मन्नपः
प्रणेष्यामीति यजमानो निब्रूयात् । ततः प्रशस्तो ॐ भूर्भुवः स्वः बृहस्पतिप्रसूत इ
ति उपांशु जपित्वा ॐ प्रणय इति उत्तरः पृष्ठिस्था अग्नेरुत्तरतः स्थापयेत् ॥ प्रकृतमनुसरत्य
उच्यंत इदानीं सूत्रकारेण तत्तत्कर्मविषये तथा तथा होमव्यवहारः प्रदर्शितः स एवाभि
धीयते । तु चेद्धोमं कंचित्राम्ना कंचिन्मंत्रेण सूत्रकृत्तूनोभयं यत्र तत्र छहवनं नामधेयत
इति अस्यार्थः । कंचित्राम्ना देवतानाममंत्रेण वा होमं ब्रूते । यथा सावित्र्ये ब्रह्मण इत्यादि ॥

Indira Gandhi National
Centre for the Arts

गृ॰का॰ क्वचिद्वैदिकमंत्रेणापि ॥ यथाश्मेन यरूपथा सये असृनानिति । यत्रोभयमपि नास्ति न नाममं
८ त्रतः नवैदिकमंत्रः तत्र हवनं नामधेयइष्टं ॥ यथा नाममंत्रेण वह्निोमः । यथा सूक्ते ॥ प्राजापत्यस्य स्था
लीपाकस्य कुत्वं स्यत्र प्राजापत्यपदस्य स्थालीपाक । रूपेण त्वेन ग्रहणं न मंत्रत्वेन । चतुर्थ्यंतता
भावात् । यत्र न वैदिकमंत्रग्रहणं नापि नाममंत्रग्रहणं होइ वोच्यते तत्र किं कर्तव्यमित्याह । नैकक्ष
चन पक्षोयं वोऽ । दावाश्रिता यदा ॥ तदाग्निः इत्याघाहातव्याइ । तवृत्तिकृत् । १२ ॥ अस्यार्थः ॥ न
चोक्तो वोलोपनयनगोदानविवाहेषु चत्वारः पक्षाः संभवंति ॥ कथं चत्वारः पक्षाः उच्यते ॥
अग्नआयूंषीपवसइति तिसृभिः प्रजापतेन त्वदेतान्यन्य इत्येकया ऋचा ॥ तस्य एव आहुत
यस्कृरिस्येकेन न आज्यभागेन भवतः । तर्हि स्व ... पि न स्यात् । अत्राघारयोस्त्वनाहु
तित्वान्नो भवतामित्यर्थः । अथ द्वितीय पक्षः ॥ व्याहृतिभिर्वा । अयमर्थः । भूः स्वाहेत्या
दिना आहुतिचतुष्टयं । अथ तृतीयपक्षः । समुच्चयमेके । एके आचार्याः स्त गाहुतीनां व्या
हृतीनां च समुच्चयं समुदायमिच्छंति । तेनाष्टाहुतयो भवंति वा चतुर्थदक्षस्त्वनेककोचन
पक्षः । अस्यार्थः । पक्षः चोक्तादावाश्रितस्यात् । तदा अग्नि इत्याघाहोतव्या ॥ इत्यर्थः ॥
तथा च ... । आग्ने ... प्रजापतिर्विश्वेदेवाः । अस्मिन्स्नार ... यत्र पुन ... काउतनाम

मिन्नान्तरोधेन युगपत्प्रवृत्तानामनेकपाकयज्ञानां तंत्राद ... रस्ति न चेत्यारां कयामाह । अने
कपाकयज्ञास्तु एकस्मिन्काले एव चेत् । समानतंत्रकाः कार्या न तंत्रष्ठानिरिष्यतइति । अ
स्यार्थः । एकस्मिन्काले नैकपाकयज्ञाः कार्यात्वेन प्राप्तश्चेत्तदा ते न समानतंत्रकाः कार्या
इत्यर्थः । तत्र तंत्राद्वा । तेनैष्टां तंत्रस्य यज्ञोपकरणादेर्बहिरादेर्नावृत्तिः । पात्रासादना
दीनां यज्ञोपकरणानां नित्यत्वं पाक्षिकत्वं वेत्यत आह । पात्रासादनमिच्छातआज्याधिश्रय
णादि च । स्रुवादिमार्जनं चेध्मरज्जुप्रहरणां तथेति ॥ १४ ॥ अस्यार्थः । अत्र पाकयज्ञे पात्राणां
आसादनं इच्छातः । वैकल्पिकमित्यर्थः । तथैव आज्याधिश्रयणादिकं च कृताकृतमिति । आ
ज्याधिश्रयणं नाम उत्तरतोंगारेषु आज्यस्थापनं अवज्वलनं दर्भाग्रद्वयं प्रक्षेपः । पर्यग्नि
करणं च । एतत्सर्वं कृताकृतमिति । आज्योत्पवनमानमेव नित्यं भवतीत्यग्रे वक्ष्यति । स्रुवादि
मार्जनं स्रुकस्रुवसंमार्जनमपि कृताकृतं । इध्मरज्जुप्रहरणं इध्मस्य बंधनार्थं विधिनः सं
पादितां रज्जुं घृताक्तां कृत्वा ब्रुमीरुद्राय पशुपतयेस्वाहेति वा अग्नौ प्रक्षिपेत् । एतदपि कृता
कृतं । अत्र पूर्णपात्रा ज्योत्पवनयो नित्यत्वं नियतमित्याह । पूर्णपात्रमयेनित्यमाज्यस्योत्पवनं

Indira Gandhi National Centre for the Arts

पृ० ८

तथेति। अस्यार्थः। अत्र पूर्णपात्रनिःसंभवे तु पूर्णपात्रस्य उत्पूतवारिणा प्रोक्षणीपात्रोदकेन पूरणं
भवतीति नियमोऽस्ति एवं च सति प्रोक्षणीपात्रासादनस्यापि नित्यत्वं स्यात्। अतः पात्रासादनेऽभि
वृत्तौ पूर्णपात्रस्य निःसत्त्वेन प्रवृत्तौ जलेनान्येनापि पूरणं भवति। तथा आज्यपात्रोपसर्जनं प्रा
गमुत्पूतवारिपूरणं कृताकृतं। द्रव्यसाधनयोरनुक्तौ विषये किं वात्र द्रव्यं किं वात्र साधनं भ
वतीत्येतदाह। द्रव्यानादेश आज्यं स्यात् इनुक्ते साधने स्रुव इति। अस्यार्थः। यत्र होमद्रव्यस्यान
भिधानं तत्राज्यमेव द्रव्यं भवति। यत्र होमसाधनं द्रव्यादनुक्तं भवति तत्र स्रुवः साधनं स्यात्।
द्रव्यस्यानादेशे द्रवद्रव्यमाज्यं भवति। तस्य हवनं स्रुवेणैव भवतीति स्रुव एव साधनं स्यादि
ति भावः। अत्र गृह्यकर्मणि कुत्र कुत्र मंत्रोच्चारणं शनैर्भवतीत्याह। जपानुमंत्रयोर्मंत्र
उपस्थानाभिमंत्रणे। मंत्रो यः कर्मकरणे गृह्यकर्मण्युपांशु वह॥१९॥ अस्यार्थः। यत्र सूत्रकृ
ज्जपतीति ब्रूयात् तत्र शनैर्जपः यत्र चानुमंत्रणं तत्रापि मंत्रोच्चारणं शनैः। यत्र पुनरुपस्था
नेऽग्निमुपतिष्ठेत तत्रापि शनैरुच्चारणं। अभिमंत्रणेऽपि शनैर्भवति। कर्मकरणे मंत्रेण
इध्म अग्नौ हूयते तत्रापि मंत्रः शनैः पठितव्य इत्यर्थः। एवमत्र गृह्यकर्मणि उपांशु शनैः

---

पठत्वपि स्थलेषु मंत्रोच्चारणं भवति। यत्र पुनर्विध्यर्थवादमंत्रसमुदायात्मकवेदभागेषु को
वा विधिभागः। को वा अर्थवादभागः। को वा मंत्रभाग इत्याशंक्य विध्यर्थवादभागस्य स्मार्त
कर्मण्युपयोगात् तल्लक्षणप्रतिपादनं विहाय सर्वत्रोपयोगित्वान्मंत्रलक्षणमाह। इदं का
र्यमनेनेति न क्वापि दृश्यते। विधिलिंगादेरिदमर्थं येषां ते मंत्रसंज्ञका इति॥२०॥ अस्या
र्थः। येषु वेदविभागेषु अनेन इदं कार्यं कर्तव्यमिति यत्र विधिर्नास्ति। लिंगादेव इदमर्थत्व
लिंगं नाम कर्मदेवताप्रकाशकं पदं अयमर्थः। प्रयोजनं येषां ते इदमर्थाः तेषां भावः इदमर्थ
त्वं ते वेदविभागा मंत्रसंज्ञका ज्ञातव्या इत्यर्थः। होमस्रुक्मंत्रांते मंत्रमध्ये वा सह वेदा कथं क
र्तव्या इत्याशंक्याह। मंत्रांते कर्म कर्तव्यं मंत्रस्य करणत्वत इति। अस्यार्थः। मंत्रांते मंत्रं पठि
त्वा होमादिकर्म कर्तव्यमिति। सर्वत्र शास्त्रे इत्यमेव व्यवहारात्। इदानीं कर्मणा सह मंत्रा
वृत्तिरप्यस्तीत्याह। कर्मादितोऽनु मंत्रस्यावृत्तिर्गृह्यकर्मणि। अस्यार्थः। यत्र कर्मणः
आवृत्तिर्यथा विवाहे त्रिः परिणयं जपति। अमोहमस्मीति प्रदक्षिणां [illegible] मस्यां मंत्रजपस्या

Indira Gandhi National
Centre for the Arts

गृ॰का॰ प्यासंनिः। आसीद्य नियमे कथं वा कर्म कर्तव्यं भवतीत्याह। आसीन ऊर्ध्वः प्रह्वो वा नियमोय १०
त्रनेदृशः। तदासीनेन कर्तव्यं न प्रह्वेन न तिष्ठतेति॥१९॥ अस्यार्थः॥ यत्कर्मणि उपविश्य
१ ऊर्ध्वः स्थित्वा नम्रीभूय वा कर्तव्यमिति नियमो न स्यात्। तदा उपविश्यैव कर्तव्यं॥ ॥इति
परिभाषासमाप्ताः॥ ॥परिभाषार्थमुक्त्वा संप्रति मथमत एव यज्ञादौ प्रधानांगत्वेनांगीकृ
तस्थालीपाक एवोच्यते। अंगसंघोऽथवा तत्रोके स्थालीपाकः पुरोच्यते। गृहवेशीयहोमात्
पौर्णमास्यामागमिष्यति। तस्यां तं प्रारभेत निर्वृत्तिकारादिसाधनमिति। अस्यार्थः। तत्रतेषु
दर्शपूर्णमासादियागेषु अंगसमुदाय उक्तः। तस्मिन्नप्यंगसमुदाये स्थालीपाकस्य मुख्या
ख्यांगत्वात्स एव पुराप्रथमत उच्यत इत्यर्थः। गृहप्रवेशनीयहोमाद्धोमानंतरं या पौर्ण
मास्यागमिष्यति। गृहप्रवेशनीयहोमादिति आग्न्याधानमात्रोपलक्षणार्थं तत्राप्याद्या
पौर्णमासी तस्यां पौर्णमास्यां तं वक्ष्यमाणं स्थालीपाकं प्रारभेत। इति निवृत्तिकारेण साधि
तप्रतिपादितमित्यर्थः। कथमिति चेदुच्यते। अथ पार्वणस्थालीपाकः॥ इत्यादिसूत्रे वृत्ति १
कारेण वर्णिभावः। पार्वणस्थालीपाक इति नामधेयं। पार्वणवचनं पाणिग्रहणादहरहः

क्रियाशंकानिवृत्त्यर्थं। विवाहानंतरं या पौर्णमासी तस्यामस्य प्रथमः प्रारंभः। अनयारीत्यासा
धितामित्यर्थः। तिथिनिरूपकः। ...न्वाकाले प्रारंभाद्धानमित्याह। प्रातरौपासनं हुत्वा
समिधोद्विनिधाय च। अथ यातिस आदध्यात्क्रतुसंकल्पपूर्वकमिति॥२१॥ अस्यार्थः। पौ
र्णमास्यां प्रातरौपासनं हुत्वा तत अन्वाधानांगं। द्वेराज्ञ्यपानोणाय ऋतुसंकल्पपूर्व
कं क्रतोर्यज्ञस्य संकल्पवक्ष्यमाणदेवतापरिग्रहं कृत्वा तदंते समिद्द्वमाद्दर्वौ अग्नौ प्रक्षिप
ति। अन्वाधानं करोतीत्यर्थः। अथ यातिस आदध्यात्। तथा च शौनकः। आरब्धकर्मांग
तया अन्वादध्यात्समिद्वयं। कात्र यं यथा संकल्प अमुं यक्ष्य इति ब्रुवन्। अनेन यक्ष्यमाणा
या देवतायाः परिग्रहः। अन्वाधानमिदं कार्यं मग्न्याधानादनंतरमिति। जयंतो कमन्वा
धानपदव्याख्यानं लिख्यते। अन्वाधानं नाम क्रियमाणस्य कर्मणोंगत्वेन द्वयोः समिधोः स्रि
स्रुणां वा समिधामभ्याधानमिति॥ एतत्कर्म दिनद्वयसाध्यं। तत्रान्वाधानदिने इति क
र्तव्यतामाह। चंद्रिकायां व्यासः। सकृत्सर्वण्यधःशायी हविष्यं लघुभोजनं। न सायं नोप

Indira Gandhi National
Centre for the Arts

वासासंभोतैलामिषविवर्जितमिति। सांख्यायने। मस्करांलवणं शाकं णकान्कोरदूषका
न्। माषान्मधुपराभ्रं च वर्जयेत्सर्वाणि द्विजः इति। प्रथमदिने अन्वाधानं प्रतिपदि इष्टिः। सद्य
१० स्कालपक्षे तु यस्मिं दिने अन्वाधानं तस्मिन्नेवादिने इष्टिः। सद्यः कालपक्षे तिथिं प्रतिपादय
ति। सद्यः कालभवेद्यद्वा पौर्णमासस्य पार्वण इति॥२२॥ अस्यार्थः। पर्वणि भवतः पर्व
णः पौर्णमासः वा शब्दस्य अमावास्यायामपि सद्यः कालं सूचयति। शास्त्रान्तरे पर्वद्व
येपि सद्यः कालप्रतिपादनात्॥ तथाह। संधिश्चेत्संगवादूर्ध्वं प्राक्पर्यावर्तनाद्रवेः। सा पौर्ण
मासी विज्ञेया सद्यः कालविधौ तिथि रिति। अमावास्यायामपि सद्यः कालविधिरुक्तो ना
रदीयपुराणे। मध्याह्नाद्वितीयेस्यात्ता ममावास्या च पूर्णिमा। परेद्युरेव विप्रेन्द्रैः सद्यः का
लविधीयते। पर्वद्वये परेद्युः स्यात्संगवात्परतो यदि। सद्यः कालपरेद्युः स्यात्क्षेयमेवं ति
थिक्षयमिति। प्रसंगाद्विकृतयागकालो निरूप्यते। तत्राह त्रिकांडी। अनृतं ना प्राग्यदि प
र्वसंधिः कृत्वा तु तस्मिन्प्रकृतिं विकृत्या। तत्रैव योगः परतो यदि स्यात्तस्मिन्विकृत्या प्रकृतिः १०
परेद्युः॥ अस्यार्थः। आवर्तनो पुरा वा पर्वसंधौ तस्मिं संधिदिने प्रथमं प्रकृतियागं कृत्वा प

श्चादाग्रयणादियागः कर्तव्यः। यदा आवर्तनात्परतः संधिस्तदा केवलं विकृतियागः कर्तव्यः प्रकृतियाग
स्य संधिदिनात्परेद्युरनुष्ठेय इति। साक्षिप्रक्षेपणानंतरं उध्मा वार्हिषश्च संनहनं कुर्यात्॥ तत्रादौ र
ज्जुनिर्माण प्रकारं स्वयमेवाह। अथ रज्जुं प्रकुर्वीत त्रिसंधिं त्रिवृतां कुशैः। स्याद्रज्जुकरणे पूर्वं सव्यः
पाणिरिहोत्तरः॥२३॥ पश्चाद्दक्षिण इत्याह जयंतः स्वस्ति बंधन इति॥ अस्यार्थः। षट्त्रिंशद्दर्भप
क्षे दर्भद्वयं द्वाभ्यां हस्ताभ्यामादाय कुशमूले स्वाभिमुखीकृत्य कुशाग्रे पूर्वतः कृत्वा यदा वेष्टयेत्।
मपा तदा वामपाणिरुपरि दक्षिणपाणिरधो भवति। एवं अष्टभिः कुशैः द्विपिंजूलं त्रिसंध्यं विधाय पु
नः श्चतुर्भिः कुशैः तामेव रज्जुं त्रिसंधिर्यथा स्यात्तथा वेष्टयेत्। एवं द्वादशभिर्द्वादशभिः कुशैः र
ज्जुत्रयं निष्पाद्य पुनः भिरेव त्रिभिः त्रिवृतामेव रज्जुं कुर्यात्। तन्मेलने दक्षिणपाणिरुपरि भव
ति। इति जयंतानिबंधने उक्तमस्ति। एवं एका रज्जुः षट्त्रिंशद्दर्भपिंजूले भवति। तथा च गृह्यसंग्रहे।
षट्त्रिंशद्दर्भपिंजूलैः कुर्याद्रज्जुं त्रिरावृतां इति। अशक्तविषये शौनकः। त्रिसंधिं त्रि वृतां रज्जुं कु
र्याद्द्वादशभिः कुशैः। पिंजूलं नाम कुशपत्रं पिंजूलं कुशपत्रं स्यादिति विश्वलोचनः। रज्जुं सुसाध्य केकु

Indira Gandhi National
Centre for the Arts

र्यइत्याह।निदध्यादुदगग्रांतांरज्जुमयतआत्मनः॥२४॥कुशमुष्टिंछिन्नस्यस्यांप्रागग्रंतंनिधायच।
११ तयाबर्हिर्द्विरावेष्ट्यरज्जुमूलंचवेष्टयेत्॥२५॥पूर्वयावेष्टितातस्याअधस्तात्तांनयेदयेति।अ
स्यार्थः।ततःतामेवरज्जुमात्मनआयतः।उत्तराग्रांनिदध्यात्।स्थापयेत्।ततःकुशमुष्टिंगृहीत्वा
यज्ञसामग्रीसंपादकेनशस्त्रेणछिनत्ति।ततोस्यामेवरज्ज्वांछिन्नकुशमुष्टिंप्रागग्रंनिधायतयारज्ज्वा
बर्हिषःद्विरावेष्टनं।पश्चात्तथैवरज्ज्वारज्जुमूलमपिद्विर्वेष्टयेत्।बर्हिषःप्रथमवेष्टनोर्ध्वछिन्नाया
रज्ज्वारधस्ताद्वेष्टनादवशिष्टांतांप्रागग्रांनयेदित्यर्थः।बर्हिःसंनहनानंतरंकिंकर्तव्यमित्याह।नि
धायोपरिचान्यैश्चपरिस्तृत्यादिसिध्मयेइति॥२६॥अस्यार्थः।ततःपरिस्तरणादिसिध्मर्थंअ
न्यांश्चकुशानपिबर्हिषःउपरिनिधायकस्मिंश्चिच्छुद्धप्रदेशेएनांस्थापयेन्नभूमौ।अनंतरंइध्म
संनहनार्थंअपरांरज्जुंकुर्यादित्याह।कृत्वान्यांपूर्ववद्रज्जुंनिदध्यात्तांचपूर्ववत्।अस्यार्थः।अन्यां
रज्जुंपूर्ववत्तमेवरीत्याकृत्वातथैवायतः।इध्मबंधनार्थंरज्जुंस्थापयेत्।तथैवेतिपूर्वरज्जुवत्।इध्म
स्वरूपमिध्मबंधनंचाह।जयंतमतानुसारेण।द्विःप्रादेशाभवेदिध्मएकविंशतिदारुकः॥२७॥पाला ११
शःखादिरोवास्यात्तंप्रागग्रंनिधायच।शमीवैकंकतंग्राह्यमनयोर्यद्यसंभवः॥२८॥वेष्टयेत्सकृदेवेध्मं

बध्वोपरिनिधायच।जयंतमतमत्रोक्तंवक्ष्येवृत्तिकृतोमतमिति॥२९॥अस्यार्थः।तत्ररज्ज्वाउप
रिवक्ष्यमाणलक्षणंप्रागग्रमिध्मंसंस्थाप्यतथैवरज्ज्वासकृदावेष्ट्यबध्वाअवशिष्टांरज्जुंवेष्टना
वकलिताधारज्ज्वाअधस्तांनयेदित्यर्थः।तथैवोपरिशुद्धप्रदेशेस्थापयेत्।नभूमावित्यर्थः।बर्हिष
स्तद्विर्वेष्टनंइध्मस्यसकृदेववेष्टनमितिसविशेषः।इध्मस्वरूपमाह।पालाशखदिरयोरन्यत
रयोर्यज्ञवृक्षयोः।शाखाप्रदेशद्वयपरिमितादीर्घाग्राह्या।एवमेकविंशतिसंख्याभिःताभि
रेवेध्मोभवतिपालाशखादिरयोरसंभवेशमीवैकंकतेवाग्राह्यं।अथवटादिकमपि।तथा
चमरीचिः।पलाशःखदिरोश्वत्थःशमीवटउदुंबरः।अपामार्गार्कदूर्वाश्चकुशाश्चेत्यपरेवि
दुः।दशद्वादशयांगुल्यःसमाःपंचदशस्मृताः।नात्यंगुष्ठाःसत्वचश्चसार्द्राइध्माइहोत्तमाइ
ति।स्मृत्यर्थसारे।आर्द्राःपत्राःसमच्छेदास्तर्जन्यंगुलिवर्तुलाः।आपाटिताअद्विशाखाःकृमिदो
षविवर्जिताः।ईदृशाहोमयेत्प्राज्ञःप्राप्नोतिविपुलांश्रियं।व्यासः।विशीर्णायुःक्षयंकुर्याद्विकृत
व्याधिसंभवं।ह्रस्वयामृत्युमाप्नोतिवक्राविघ्नकरीतथा॥पाटिताहरतेलक्ष्मींकृशाबंधवहा

Indira Gandhi National
Centre for the Arts

यादिगृह्यमाणस्यामेव होमे निश्चयः कोऽदृष्टार्थता शान्तौ ॥ द्विषं प्रकुरुते दीर्घा प्राणघ्नी वित्त्यास्मृता ति । एवं जयन्तमतमु
क्त्वेदानीं प्रवृत्तिकृन्मतं वक्तुं पूर्वे तिज्ञानी ते । वक्ष्ये वृत्तिकृतो मतं अमाते । इष्टिवद्बन्धनं कार्यं मन्त्रस्यात्रोह इष्यते ॥
॥१२॥ अरत्न्यायामइध्मः स्यात्स पञ्चदशदारुकः ॥ ३० ॥ एतद्व्याख्याकारेण शान्तिकर्माणि साधितं । अस्यार्थः ॥ अत्र
जयन्तमते एकविंशतिदारुकइध्मो निरूपितः । वृत्तिकृन्नारायणमते तु पञ्चदशदारुक इध्मो भवति । अत्र पक्षे
आयामप्रमाणं अरत्निमात्रं । अत्र इध्मस्य बन्धनं इष्टिवत्कार्यं समन्त्रकमित्यर्थः । श्रौतकर्मणि समं
त्रकं बन्धनं तद्वदत्रापि भवति । अत्र मन्त्रस्याप्यूहाभावे ति । ऊहो नाम प्रकरणानुसारेण पदान्तरप्रक्षेपः ॥
कुत्रचित्सदपरिभागः । तत्र ऊहाभावः ॥ अऊहमयथा नर इध्मस्यायाम प्रादेशमात्रं परिमाणं । तथा
वंशोऽनूक्तः ॥ औदामइध्मसमिधः प्रादेशावयमुच्यते ॥ वितस्तिमात्रमथवा सांख्यायां चैकविंशतिः ॥
किं च । वृत्तिकारेण इध्मसंख्याविषये तद्बन्धनमपि समन्त्रकमित्यस्मिन्विषये तन्मन्त्रस्याप्यूहविषये स्तत्रे
शान्तिकर्मविवरणे सर्वं साधितं । शास्त्रानुसारेणासर्वत्रप्रतिपादितमित्यर्थः ॥ यदा श्रौतकर्मणि इध्मबं
धनं । एकविंशतिधा संभरामीति सन्नहनमन्त्रे संख्या श्रूयते मन्त्रस्यातिदेशात्पाकयज्ञेष्वपि भवति हि ॥२॥
हः । पञ्चदशदारुकपक्षेऽतुलिङ्गानुपपत्तेः मन्त्राभावान् । ऊहः कर्तुं न शक्यते । पञ्चदशधा संभरामीति ।
तन्त्रेव शान्तिकर्मणि परिधयो भवन्ति । नवेति विचारः । कुतः इध्मोत्तावद्धमीनयात्रे विहिताः । तथा परिध
यो दिदर्शपूर्णमासयोश्च इध्मपरिधीनामेकद्रव्यत्वं दृष्टं ॥ तथा च सूत्रं । शमीमयमिध्मं शमीम

य्यावरणीयं परिधींश्चेति ॥ पार्वणे तु परिधयो नैव संति ॥ तस्मादितरेष्वपि पाकयज्ञेषु नैव संति ॥ अ
त्र परिधीनामाचार्येण विनियोगानुक्तेश्च । आपस्तम्बेनोक्तो रक्षोहननार्थं परिधयो भवन्तीति ॥ स्रो
अस्य च्छाखायां नोक्तं । पूर्णपात्रेणैव रक्षोहननं भविष्यति ॥ अपो वै रक्षोघ्नीः रक्षसामपहत्या इत्युक्तेः
रक्षोहननं तु परिधिकार्यं । तत्पूर्णपात्रकृतमिति न परिधय उपादेया इति । अतः अस्मच्छाखायां
पञ्चदशदारुक एवेध्मः । तद्बन्धनमप्यमन्त्रकं तदभावात्त्राप्यूह इति । अत्र पुनः इध्मबन्धने विष्णु
शीनां मतमाह । विष्णुदेवस्कन्दे तिमन्त्रेसन्नहनं तयोः ॥ ३१ ॥ इच्छन्त्येवं जयन्तस्कमन्त्रमूहनेन च
छन्ति । अस्यार्थः ॥ एतयोरिध्माबर्हिषोः सन्नहने बन्धने विष्णुदयआचार्याः मन्त्रेणेच्छन्ति । अम
न्त्रकमेवात्र बन्धनमित्यर्थः । जयन्तस्कमन्त्रमिच्छन्ति ऊहनेनेच्छन्ति ॥ दर्शपूर्णमासयोरन्वाधानानन्तर प
इध्माबर्हिषो बन्धनं कृत्वा उपरिस्थानं भवति । तथा च परिस्तरणकुशानामपि स्थानं भवति ॥ श्रुतिः
रपि पूर्वं परिध्माबर्हिः करोतीत्यापस्तम्बे । अन्वाधानानन्तरमुक्तप्रदेशे यज्ञादि सामग्रीसंस्थापयेत्कि
कुर्यात्तिस्याह । भुञ्जीयता मुहुर्न्यवमांसमाषादिवर्जितं ॥ ३२ ॥ निश्यधः शयीयानो दम्पती मैथुनं न
चेति । अस्यार्थः ॥ इष्टिपर्यन्तं दम्पत्यो नियमाः भवन्ति ॥ हविष्यभोजनेनैव भाषणवातेन सम्भाषण
राहित्यं अधः शयनं ब्रह्मचर्यं । एवं दर्शव्रतं पूर्णमासव्रतमाचरेत् । व्रतलोपे परेद्युः यागमाहित्येन व्रत
परीक्षः कर्तव्या भवति । अथवा अत्र कारिकायां प्रायश्चित्ताधिकरणे प्रायश्चित्तं वरुणाने पूर्णाहुति

Indira Gandhi National
Centre for the Arts

रपीष्यते। आज्यं द्वादशस्रुवस्रुग्गृहीत्वा पूरयेत्स्रुचं। तथा पूर्णाहुतिः कार्या सा पूर्णाहुति
१२ रिष्यते। दरिद्रविषयं तु। स्रुवं पूर्णाहुर्वा तिस्य। इत्येके याज्ञिका विदुः। स्रुवमेव आ
ज्यपूर्णं कृत्वा तेनैव होम इत्यर्थः। आज्यभागानंतरं पूर्णाहुतिहोमः। अग्नये वनस्पतये
स्वाहेति। स्रुवहोमपक्षेपि समानं। आवारं पतीयागव्रतलोपजनितमत्युवायपरि
हारार्थं पूर्णाहुतिं करिष्या वह। अथ यागादिदिनकृत्यमाह। अपरेद्युः परे प्रातः प
रितस्त्रिः समुहेच्च॥ ३३॥ पाणिना सोदकेनाग्नेः समंतात्परिमार्जनं। तत्समूहनमंत्रे
ए जयंतु वचनं यथेति॥ ३४॥ अस्यार्थः। प्रातःकाले कृतो नित्यहोमानंतरं कर्मांग। हेराचम्य
उक्रे पवित्रे उपविश्य प्राणानायम्य पारब्धं स्थालीपाकं करिष्य इति संकल्प्य ततः स्था
लीपाकगोर्भूतं त्रिः परिसमूहनं कुर्यात्। बारत्रयं कुर्यादित्यर्थः। तत्समूहनस्वरूप
माह। अग्नेः समंततो सोदकेन पाणिना परिमार्जनं। उदकं गृहीत्वा स्थंडिलाद्बहिरं
गुल्यग्रैरग्नेः समंताच्चतुर्दिक्षु परिमार्जनं शुद्धीकरणमित्यर्थः। अत्रेदं समूहनमिष्टं त १२
था च शौनकः। उच्यते स्रुक्समिद्धस्य सोदकेनैव पाणिना। प्रदक्षिणं त्रिसमाहिं एतत्परिसमूह

नमिति॥ आदौ परिसमूहनं तस्माद्बहिः परिस्तरणं तस्माद्बहिः पर्युक्षणं तस्माद्बहि
न रलंकरणमिति यथाजयं वचनेनोच्यते। पर्युक्ष पारिषेकोक्ताः सर्वत्र त्रिः। स्त्रिरं असा।
उदकं संस्थाप्य सर्वदिक्षु प्राच्यादिषु परिस्तृणुयादिति॥ ३५॥ अस्यार्थः। सर्वस्मिन्होमे प
र्युहनं परिषेको भवत इत्यर्थः। तथा नस्यांतरे। पाणिनोदकेन प्राच्यादिषु दिक्षु
प्राचीमारभ्य सर्वासु दिक्षु परिस्तृतिर्भवति। सा परिस्तृतिरुदकसंस्था उत्तरतः संस्था
अग्रे वस्थितिर्पात्रेत्यर्थः। परिस्तरणानंतरं ब्रह्मवत्स स्रुक्कर्म स्रुवलोसनार्थं अ
स ग्नेर्दक्षिणतः यज्ञियपीठे कुशासनाशिर्थ पात्रासादर्थं च पश्चात्पर्युक्षणं भवंती
तिवक्तुमाह। कांश्चित्कुत्तरतोदर्भानास्तीर्य परिषिंचतीति। अस्यार्थः। पात्रासादना
र्थमेतेषां कुशानामुपयोगः। परिस्तरणसमय एव उत्तरतकुशास्त्यायाः। पश्चा
त्परिषेचनमिति। परिस्तरणे शौनको विशेषमाह। प्रादेशमात्रैर्दर्भैर्बाहुमात्रे
रथापि वा। परितोग्नेरास्तरणं परिस्तरणमुच्यते। प्रादेशमात्रे बाहुमात्रैश्च परिस्त

Indira Gandhi National
Centre for the Arts

रणप्रकारः शौनक आह । यदि प्रादेशमात्राः स्युः चतुर्भिस्तृणमुष्टिभिः परिस्तृणीयात्प्राग
१४ ग्रैश्चतुर्दिक्षु यथाक्रमं । पुरः सव्यदक्षिणतः पश्चादुत्तरतः क्रमात् । उदक्संस्थं दिशि
दिशि दक्षिणोत्तरयोस्तु ये । तैरग्रैस्तीर्यमाणानां तृणमूलान्माछाद्य चेति । अस्या
यमर्थः । प्रादेशमात्रकुशास्तरणपक्षे प्रादेशमात्रैश्चतुर्भिः । कुशमुष्टिभिः प्रागग्रै
रेव पूर्वत आरभ्य यथाक्रमं चतुर्दिक्षु परिस्तृणीयात् । परिस्तरणं कुर्यादि
त्यर्थः । आदौ पूर्वभागे आस्तरणं दक्षिणमारभ्य उदक्संस्थं प्रागग्रं । एवं दक्षिण
भागे आस्तरणे क्रियमाणे दक्षिणमारभ्य उदक्संस्थं । तथा च सति प्रादेशमात्रैः
कुशैरेव प्रादेशमात्रादीर्घा भूमिरास्तृता । अतः आस्तीर्यमाणानां मूलानाच्छाद्य
पुनस्तथैवास्तरणं । एवं तावत्पर्यन्तमास्तरणं यत आरभ्य पश्चिमदिग्भागास्तरणं मा १४
भवति । पश्चिमत उत्तरभागे आस्तरणं तथैवात्रापि । यथा दक्षिणदिग्भागे तथो
त्तरेपि ज्ञातव्यं । अत एव शौनककारिकायां दक्षिणोत्तरयोरित्युक्तं । दक्षिणोत्तरयो

रेव कुशमूलमाच्छादनस्तरणं । प्रागग्रं तु सर्वत्र । अथ परिषेकादेः प्रादेशक्रममाह । काश्य
पः । अष्टांगुलिमिते देशे परिषेचनमाचरेत् । नवांगुलिप्रमाणे तु विधिना परिधीन्न्यसे
त् । दशांगुलिप्रमाणे तु परिस्तीर्य कुशान्क्रमात् । एकादशांगुलि देशे गंधपुष्पाक्षतादि
भिः । अथ दीर्घकुशास्तरणपक्षे पुनः शौनकः । चतुर्दिक्षु यथा दीर्घैः पूर्वपश्चिमयोर्दिशोः ।
उदगग्रैरितरयोः प्रागग्रैर्यज्ञियैस्तृणैः । तृणेभ्यः स्तीर्यमाणेभ्यः पूर्वपश्चिमयोर्दिशोः । दक्षि
णान्युत्तराणि स्युरधस्तादुत्तराणि तु । अस्यायमर्थः । दीर्घकुशास्तरणपक्षे तु पूर्वपश्चि
मयोरुदगग्रैरास्तरणं दक्षिणोत्तरयोः प्रागग्रैरेवास्तरणं । अत्र पूर्वपश्चिमयोर्दिशोः आ
स्तरणे क्रियमाणे दक्षिणानि दक्षिणस्थितानि यज्ञियतृणानि उत्तराणि उपरिस्तृणानि
भवंति । उत्तराणि उत्तरभागस्थितानि अधस्ताद्भवंति । एवं च सति मूलमाच्छाद्य आस्तरण
मुक्तं भवति । आस्तरणसमय एव पात्रासादनार्थं ब्रह्मासनार्थं च बर्हिः संस्तरतः । किंच

Indira Gandhi National
Centre for the Arts

ताः कुशास्त्याज्याः। तथा च शौनकः॥ कृति कृत्प्रस्तावेन भ्येत्स्यादग्नेर्दक्षिणतस्तथैः। तत्रासनार्थं प्रा
ग्भूतैस्तृणानामुष्टिसंमितैः। प्रणीतासादनार्थं च पात्राणां सादनाय च। संस्तीर्य बरतो
१५ वह्नेः पर्युक्षेत्तं हुताशनमिति। परिसमूहनाद्यनन्तरं किं कुर्यादित्याह। दर्भेषूत्तरतो द्वंद्व
पात्राणि न्यैनिसादयेत्॥३६॥ तत्क्रमं भर्योगेनाह श्लोकेनैकेन मंत्रोऽबिद्। अस्यार्थः। आ
स्तरणसमय एव अग्नेरुत्तरेत आस्तृतेषु दर्भेषु द्वे द्वे पात्रे गृहीत्वा वक्ष्यमाणक्रमेण स
र्वाण्यपि पात्राणि न्यखिलान्यासादयेत्। तत्क्रमं आसादनक्रमं पंचविंशारायणः एके
नैव श्लोकेनाह। स्थाली च गेः प्रोक्षणभाजनं चरुं वश्रुक्स्रुवौ सादय दर्विहोमे। पात्रं प्रणीता
र्थमथाज्यपात्रं इध्मं क्रमेण क्रमविन्कुशौश्च।३७। अस्यार्थः। चरुस्थाली प्रोक्षणपात्रं च
आहावेवं तद्द्वंद्वभयमसंपिक्रमेण दक्षिणवामपाणिभ्यां पृथक्पृथग्युगपद्गृहीत्वान्युञ्जोकु
र्वन्नासादयेत्। तथा दर्वीचाकवौ गृहीत्वा आसादयेत्। दर्विहोमे दर्वीहोमे। यत्र तत्र आसादनं १५
भवति। प्रणीताप्रयोजकं पात्रं प्रणीतापात्रं आज्यपात्रं गृहीत्वा तथैव आसादयेत्। क्रमवि

क्रमज्ञा उक्तक्रमेण इध्मं कुशांश्च सह बर्हिषा सह आसादयेत्। तथा च शौनकः। दृणेष
चो मुखान्येषु यज्ञपात्राणि सादयेत्। अन्यैश्च सायनैः सार्द्धं प्राक्संस्थानियथाक्रमं॥
चरुः प्रोक्षणयोः पात्रं स्रुवं जुह्वा तथैव च। प्रणीतापात्रमाज्यस्य पात्रेणेध्मं च बर्हिषेति॥
अन्यदप्यर्थप्राप्तं चासादयेत्। शूर्पकृष्णाजिनादि अन्यदर्थप्राप्तं चासादयेत्। अस्यार्थः।
उत्तरदिग्भागे शूर्पकृष्णाजिनादिकं प्रयोजनतः प्राप्तं यज्ञोपयोगि सर्वं संपादयेदिति प्रोक्षणा
सु प्लवनादिकार्यार्थं पवित्रापेक्षायां पवित्रलक्षणमाह। अनन्तस्तरणौ येतु कुशौ प्रादेशा
संमितौ। अनखच्छेदनौ साग्रौ तौ पवित्रामिप्याय कौ विति॥३८॥ अस्यार्थः। न विद्यते अं
तः मध्ये तरुणो गर्भकुशौ ययोस्तौ नरतौ तौ अनखच्छेदनेन नखेन कृत्वा मूलच्छेदो न विद्यते य
योस्तौ। नखच्छेदो न कर्तव्यः॥ किंतु दर्भोत्पाटनसाधनेनैव न तु काष्ठशस्त्रादिना। शस्त्रे
वे ण तु मैत्र्याधिः कार्यानाज्ञार्यादिनश्यतीति दोषश्रवणात्। प्रादेशसंमितौ प्रादेशपरिमितौ
साग्रौ तादृशौ कुशौ पवित्रार्थं संपादनीयौ। समितविनिर्विद्धेऽनामिकयोः प्रादेशसंमितः वेदोद
मेमुद्दिः। आत्रोपयुक्तपात्रं वक्ष्याउच्यते। स्मृत्यर्थसारे शमिमय्यः स्रुचः कार्याः सर्वा

Indira Gandhi National Centre for the Arts

वा भूर्जवृक्षजाः। तदभावे यथालाभमन्ययाज्ञिकवृक्षजाः। खादिरो मुसलः कार्यः पाला स
शः स्यादुलूखलः। संमेहे। मृन्मयानि च पात्राणि तैजसाश्ममयानि च। सर्वेषामेव पात्रा
१६ णां शंखः शुक्तिश्च शस्यते। तयोश्च शंख उत्कृष्टो गृह्ये याज्ञकर्मणि। दारवाणि च का
र्याणि यथाशक्त्यानुरूपतः। प्रशस्तं पूर्णपात्रार्थे दारुकांस्यामयं मखे। खदिरेण स्रुवः
कार्यः पलाशेन जुहूर्भवेत्। तत्कृप्रदेश विलोस्या तामन्यैर्वा याज्ञियैर्द्रुमैः। तदलाभे प
लाशस्य पर्णाभ्यां हूयते हविः। पलाशपर्णाभावे तु पर्णैर्वा पिप्पलोद्भवैः। पलाशस्याम
श्वपर्णं प्रशस्तं पवित्रं संपाद्यानंतरं किं कुर्यादित्याह। उत्तानेप्रोक्षण्यादिपात्राणि नयेत्प
वित्रके पवित्राभ्यां त्रिसूत्रैः प्रोक्ष्योर्ध्वबिलानि तु॥ ७०॥ अस्यार्थः। सर्वेषां यज्ञपा
त्राणां मध्ये प्रथमं प्रोक्षणमेव अर्थः प्रयोजनं यस्य तत्प्रोक्षणार्थं तदुत्तानं कृत्वा उक्ते १६
ते पवित्रे संस्थाप्य निनयेत्। जलेन पूरयेदित्यर्थः। प्रोक्षणपात्रं पूर्णपात्रादधिक

हे १॥

तरं कार्यं। यया प्रोक्षणोदकेन पूर्णपात्रस्य पूरणं भवति। पवित्राभ्याममंत्रकमुत्पूय
तूष्णीं त्रिस्सूत्रैरुदकं। सर्वाण्यपराणि पात्राणि ऊर्ध्वबिलानि उत्तानानि कृत्वा प्रोक्षयेत्।
तथा च शौनकः। कृत्वा पवित्रे आसिच्य वारि प्रोक्षणभाजने उत्पूनीयात्पवित्राभ्याम
पस्तूष्णीं त्रिरेव तु। अंगुष्ठानामिकाभ्यां तु पाण्योरुत्तानयोः पृथक्। गृहीतमूलतूल्या
भ्यामित्युत्सवनमुच्यते इत्युत्सवनलक्षणमपि शौनकोक्तं। प्रोक्षणानंतरं किं कर्तव्यमि
त्याह। विस्रस्येध्मं च चमसं सपवित्रमतः परं। पूरयित्वा जलेनात्र गंधपुष्पाणि चार्पयेदिति
॥ ७१॥ अस्यार्थः। प्रोक्षणात्प्रागेवेध्मं च विस्रस्य विस्रसनं ततः श्लथीकरणं इध्मग्र
थीश्लथीकरणानंतरं चमसं प्रणीतापात्रं सपवित्रं कृत्वा ततः प्रोक्षणपात्रस्थितोद
केनापूर्य गंधपुष्पाणि प्रक्षिपेत्। अनंतरं कार्यमाह। ब्रह्मन्नपः प्रणेष्यामीत्याह ब्र
ह्मा प्रदो भवेत्। नीत्वा तन्नासिकादघ्नमुदगग्नेर्निधाय च॥ ७२॥ दर्भैः प्रच्छादयेत्सा
त्रे पूर्णपात्रं तदुच्यते। अस्यार्थः। यत्र ब्रह्मणो निषण्णस्यान्तरिमखे मूलगवे च अन्य

Indira Gandhi National
Centre for the Arts

त्रचकृताकृतत्वं यत्र ब्रह्मा स्यात्तदा यजमानः गंधपुष्पाक्षतसहितजलपूरितं सपवित्रं प
णीतापात्रं यजमानः नासिकादघ्नं नासिकासमानं नीत्वा ब्रह्मन् अपः प्रणेष्यामीति प्रश्नस्य
१७ पंप्रेषमाह वदेत्तदा ब्रह्मा ॐ प्रणयेत्युक्तिं कृत्वा अग्नेरुत्तरतः स्थापयेत्। यत्र पूर्वे स्थापितमा
सीत्तत्रैवस्थापयेदित्यर्थः। ततः अन्यैर्दर्भैः प्रच्छादयेत्तत्पूर्णपात्रमित्युच्यते। अनित्यत्वाच
द्विब्रह्मानस्यात्तदा तत्प्रणीतापात्रं नासिकान्तमुत्थाप्य अग्नेरुत्तरतो निधाय दर्भैः प्रच्छाद्य प
वित्रे गृहीत्वा तत्पवित्रद्वयं शूर्पे स्थापयेत्। अत्रापः प्रणयने कारणं श्रूयते। अपः प्रणयति
आपो वै रक्षोघ्नीः रक्षसामपहत्या इति। शौनकगृह्यपरिशिष्टोक्त ब्रह्मवरणप्रकारोस्मा
भिः परिभाषायां विविच्य उक्तः। प्रणीताप्रणयेन अनंतरं किं कुर्यादित्यत आह। पवित्रांतर्हि
ते शूर्पे व्रीहि मुष्टिचतुष्टयं। ४३। निर्वपेदग्न्यर्च्यादिमंत्रेणावर्तयेच्चतं। निर्वपेदपरं त्वग्नी
षोमाभ्यां त्वेति मंत्रतः॥४४॥ पवित्रांतर्हितान्व्रीहीन्प्रोक्षेन्निर्वापसंख्यया। पूर्वमंत्रद्वयेन १७
वः प्रोक्षामीति विशेषणमिति॥४५॥ अस्यार्थः॥ ततः प्रणीतापात्रस्थितं पवित्रद्वयं शू

प्रागग्रे निधाय निर्वपणं कुर्यादिति। अग्नये त्वा जुष्टं निर्वपामीति मंत्रेण व्रीहिमुष्टिचतुष्टयं नि
र्वपेत्। अग्नीषोमाभ्यां त्वा जुष्टं निर्वपामीति मंत्रेण व्रीहिमुष्टिचतुष्टयं निर्वपेत्। एवं अष्टसं
ख्याका मुष्टी निर्वपेत्। दर्शे तु अग्नये त्वा जुष्टं निर्वपामीति समानं। अग्नीषोमाभ्यां स्थाने इंद्रा
ग्निभ्यां त्वा जुष्टं निर्वपामि इति निर्वपेत्। एतावानेव विशेषः। अन्यत्समानं। अत्र प्राधान्यं व्री
हीणामेव। पवित्रांतर्हितान्व्रीहीन्पवित्रद्वयं व्रीहीणामुपरि कृत्वा प्रोक्षणपात्रेण तान्प्रोक्ष
येत्। निर्वापे यां संख्या प्रोक्षणे पि भवति। प्रोक्षणे निर्वापमंत्रस्यैव ऊहः। निर्वपामीति
पदे प्रोक्षामीति पदं भवति। इतरत्समानं। संग्रहकारः। उत्तानेन तु हस्तेन कर्तव्यं प्रोक्ष
णं भवेत्। अवाचीनेन हस्तेन कर्तव्यं स्यादवोक्षणं। मुष्टीकरोतियत्तोयमभ्युक्षणमिति त्रि
धा। निर्वापप्रोक्षणानंतरं कर्तव्यमाह। पूर्वाग्रीवोर्ध्वलोम्नीस्यात्कृष्णाजिनउलूखले। व्रीही
न्यत्र वहंत्याभुत्रिः शूर्पे कृत तंदुलान्। त्रिः प्रक्षाल्य सवेदाज्यमासिच्य सपवित्रकं। अस्या
र्थः। पूर्वग्रीवा यस्य तत्तथोक्तं प्रत्यग्ग्रीवो ग्रलोम्नि स्यादिति पाठांतरं। केचा ऊर्ध्वलोमयस्य तत्।

Indira Gandhi National
Centre for the Arts

एतादृशेक्ष्णाजिनोपरिउलूखलस्थापितेसतितस्मिन्संस्कृतान्व्रीहिन्स्थापयित्वापत्नीअव
हन्यात्।आशुशीघ्रमेवयथायागस्तनीतकालोनभवति।ततःत्रिःशुक्लीकृतान्शूर्पेणतदु
१८ लकणापनयनंकृत्वामुसलेनत्रिवारंकंडनीयाःयथोज्वलाभवंतितादृशान्तंदुलान्त्रिः
प्रक्षाल्यस्थाल्यांनिक्षिप्यआग्नौपचेत्।पाकार्थमग्नौस्थालीस्थापयेदित्यर्थः।पचननियम
माह।बोधायनः।नाशृतंनविदग्धंवाप्यबहिर्मतंकजिकं।व्रीहिप्रोक्षणानंतरमेवपवित्रद्व
यमाज्यपात्रेस्थापयेत्।तादृशेपात्रेआज्यमासिच्यप्रक्षिप्यसंस्कारंकुर्यात्।तत्प्रकार
मेवकथयति।आयेत्योत्तरतोंगारान्तेषांचेस्तस्यततघृतं॥४७॥अधिश्रितमेवज्वाल्य
दर्भाग्रद्वयमस्यति।तेनैवज्वलताज्यंचत्रिःपर्यग्निकरोत्यथेति॥४८॥अस्यार्थः।अंगारा
नपोह्यआग्निप्रदेशान्भिन्नप्रदेशेआज्याधिश्रयणयोग्यानंगारानादायतदुपरितदा
ज्यपात्रंसंस्थाप्यतत्रस्थितमेवआज्यपात्रंआवज्वल्यअवज्वलनंतुदर्भैर्योज्यका १८
ष्टवशाकलेनकार्यं।तदवज्वलनंयद्दर्भैःज्वलनोऽनेनउल्मुकेनआज्यस्योपरिपास

स्मिन्नेवावज्वलनसमयेदर्भाग्रद्वयमाज्येप्रक्षिपेत्।तेनैवज्वलतोल्मुकेनआज्यंच
रुणासहत्रिःपर्यग्निकरणंकरोति।परितःत्रिरग्निकरणंउल्मुकनयनंपर्यग्निकरणा
नंतरंकिंकर्तव्यमित्याह।कर्षन्निवोदगुद्वास्यचांगारानतिसृज्यच।अंगुष्ठोपकनिष्ठि
काभ्यांपवित्रेतेअसंहतेगृहीत्वोत्तानपाणिभ्यांत्रिःप्रागुत्पूयततः।सवितुष्ट्वेतिमंत्रेणसकृ
त्तूष्णींद्विरिष्यते॥५०॥अस्यार्थः।तदाज्यपात्रंकर्षन्निवोदगुद्वास्यांगारप्रदेशान्उत्तरतः
कर्षन्निवभूमिःसकाशात्।अनुसृष्टाप्यपन्नेवसघर्षयन्नुत्तरतःस्थापयित्वातान्वागा
रानतिसृज्यपुनर्यथापूर्वमेकीकृत्यउत्पवनंकुर्यात्।आज्यपात्रस्थितेपवित्रेअभि
लितेकृत्वाअंगुष्ठानामिकाभ्यांउत्तानपाणिभ्यांतयोःपवित्रयोरमिलितयो[illegible]राग्र
योःआग्नेयप्रदेशमुत्पवनयोग्यंयथास्यात्तथागृहीत्वासवितुष्ट्वेतिमंत्रेणतदन्तेस
कृदेकवारमुत्पवनंकुर्यात्।उत्पवनंनामआज्यपश्चिमभागात्पूर्वाभिमुखंयथास्या
त्तथापवित्राभ्यांदोलनमित्यर्थः।एवंवारद्वयंमपितूष्णीमेवोत्पवनंभवति।अत्रभगवान्।
आज्यस्थालीसमादायआज्यंतस्यांनिषिच्यच।उदगग्रेनिरूढेषुतंगारेषुसभस्मसु।अधिश्रि

Indira Gandhi National
Centre for the Arts

सविलाप्येन दर्व्युज्वल्यज्वलतृणैः। आज्ये प्रत्यस्य दर्भाग्रे अंगुष्ठपर्वमात्रके। पुनर्ज्वलद्भिरेतैस्त्रि
स्तृणैः परिहरेत्सह। ३७ इत्यादिहविर्भिस्सति चेद्धितरेरिति। अद्भिरेतान्निर्मप्रोक्ष्य प्रद्रुत्या
१९ स्याबुदक्कुशान्। उद्वास्याज्यमथांगारान्प्रत्यु्ह्य पश्चिमः स्पृशेत्। ताभ्यामाज्यं त्रिरुत्पूय पवि
त्राभ्यां यथाविधि। सकृन्मंत्रेण द्विस्तूष्णीमयोने संग्रहचेति। अत्रोक्तनिरूढशब्दस्यार्थः।
स्मृतिदीपिका मुद्रा पितृः। निरूढस्याद्विभक्तेरग्नेः परिस्तरणाद्बहिः। अनिरूढः सर्वैवाग्नेयः प
रिस्तृतिमध्यगः। यत्तु केश्चिदुच्यते। अग्नेरुत्तरतोंगारान्निरूह्याज्यस्य संस्क्रियां। कुर्यात्परि
स्तरेखोकेन परिस्तरणाद्बहिरिति तदेतत्कमंशोपज्ञातव्य। अत्र बर्हिकेन कुशानद्भिः संप्रोक्ष्य
प्रहरेत्। पर्यग्निकरणतृणनिरसनविशेषमाह संग्रहकारः। पर्यग्निकरणाशाग्निमनिरू
ढाद्युद्दाहरेत्। बर्हिर्निरस्येत्त्क्षणं निरूढाग्रहियोजयेदिति। उत्पवनानंतरं पवित्रद्वयंकिरुं
यादित्याह। कृताज्योत्सवने प्रोक्ष्य पवित्रे प्रास्य चानले। अनलात्प्रत्यगास्तीर्णे बर्हिष्याज्यं १९
निधायतेऽतो ॥५१॥ अस्यार्थः। कृतमाज्योत्सवनयाभ्यां ते पवित्रे प्रोक्षणपात्रेण प्रोक्ष्याग्नौ प्र
क्षिप्यत दाज्यपात्रं वह्नेः पश्चिमभागे बर्हिरास्तीर्य दर्भेन सहयस्य बर्हिषः आसादनं कृतं तस्ये

वास्तरणं कृत्वा तदुपरिस्थापयेत्। तथा च शौनकः। परिस्तरणादग्नेः पश्चात्संप्रोक्षिते स्थले।
बर्हिः संनहनीरज्जुमुदगग्रां निधाय च। तस्यां बर्हिषि संस्तीर्णे प्रागग्रे निहितं भवेत्। आज्य
संस्कारानंतरं स्रुक्स्रुवसंमार्जनप्रकारमाह। प्रताप्य स कुशैर्दर्वीस्रुवौ दर्वीं निधायच।
स्रुवस्य बिलमंत्रेस्तु पृष्ठमभ्यात्समग्रतः ॥५२॥ आरभ्य पृष्ठतो यावद्दुपरिष्टाद्विलं भवेत्।
कुशानां मूलतो दंडमेकैकं त्रिर्मृजीत वै ॥५३॥ प्रोक्ष्य प्रताप्य चासाद्य बर्हिष्युत्तरतो घृतात्।
संमृज्य तैः कुशैर्दर्वीमासाद्योत्तरतः स्रुवम् ॥५४॥ तान्कुशान्कृतसंमार्गान्प्रोक्ष्याग्नौ प्रहरेद्
धेति। अस्यार्थः। दक्षिणहस्तेन दर्वीस्रुवौ उभौ गृहीत्वा सव्येन कांश्चित्कुशानादाय महे
वाग्नौ प्रताप्य अनंतरं दर्वीं बर्हिषि निधाय प्रथमं स्रुवसंमार्जनं करोति। तत्प्रकारमाह। स्रु
वस्य बिलं कुशाग्रैरग्नामयन्प्राक्प्रवणं पूर्वभागे बिलप्रदेशं कुशाग्रैः संमृज्य कुशाग्रैरिति
बहुवचनसामर्थ्याद्द्वित्वसंख्यानिवृत्तिः। अर्थात्कुशत्रयाग्रेण शोधनं भवति। तस्यैव बिलस्य
पृष्ठदेशं आत्माभिमुखं प्रत्यक्प्रवणं तैरेव कुशाग्रैः संमृज्य तथैव तत्कुशमूलैः स्रुवस्याग्रतः
बिलपृष्ठदेशादारभ्य संमार्जितपृष्ठदेशादन्यप्रदेशमारभ्य संमार्जितस्रुवाबिलप्रदेशांत

Indira Gandhi National
Centre for the Arts

कंटकाकारप्रदेशं कुशमूलैर्मृजीतेत्यर्थः। यावदुपरिष्टाद्बिलं तावद्दंडं त्रिः संमार्ष्टि। एकैकमिति विग्राच बिलप्रदेशं स्रुवस्यांतःस्पृष्टं तद्दंडश्चेति मृजीत मार्जनं कुर्यादित्यर्थः। ततः स्रुवं प्रोक्ष्य पुनर
२० ग्नौ प्रताप्य बर्हिषि घृतपात्रादुत्तरतः स्थापयेत्। तैरेव कुशैस्तथैव दंडे च संमृज्य स्रुचावुत्तरतः स्थापयेत्। कृतसंमार्गान्कुशान् संमार्जनं ये स्तेन थोकाः। तान्प्रोक्ष्य अग्नौ प्रहरेत्। यथा पूर्वाया भवंति तथा तान्प्रक्षिपेदिति याज्ञिकाः। तथा च शौनकः। अथाग्रान्स्रुवं दर्भैर्दक्षिणेन करेण तौ। सव्येन दर्भाग्राण्यादाय संप्रोक्ष्याग्नौ प्रतापयेत्। संमृज्य त्रिर्बिलं मूलैर्दंडं मध्यैः स्रुवस्य तु। मूलं मूलैश्च दर्भाणां तथा ऊर्ध्वा विधीयते। सह दर्भैः स्रुवस्रुचौ प्रताप्य प्रोक्ष्य तान्कुशान्। प्रहृत्याप उपस्पृश्य दविस्तेनाभिघारयेदिति। स्रुक्स्रुवसंमार्जनानंतरं कर्तव्यमाह। अभिघार्य चरुं चोदगुद्वास्यैव ततः परं ॥५५॥ अंतरेणाग्निमाज्यं च नीत्वा चासादयेद्बर्हिषि। आज्याद्दक्षिणतो देशे जयंतद्वनयथोत॥५६॥ अस्यार्थः। चरुमभिघार्य उदगुद्वास्य उत्तार्य अग्निमाज्यं चांतरेण तयोर्मध्यप्रदेशं
नीत्वा बर्हिषि स्थापयेत्। बर्हिष्यपि कुत्र वा स्थापनमिति संदेहे आज्याद्दक्षिणप्रदेशे स्थापयेत्। २०
सहस्रपणपक्षे तत्र देवतानिमित्तपात्रांतरस्थापनार्थमवकाशं त्यक्त्वा ततोपि दक्षिणतः स्थालीस्था

पयेत्। तथा चरुपात्राज्यपात्रयोरंतरालप्रदेशो व्युद्धरणाय पात्रांतरावकाशो भवति। तथैव
स्थापनं। चरुस्थाल्युद्वासनानंतरं अभिघारणं किंतु गृह्यसूत्रे पठंति। बर्हिष्यासाद्य प्रत्यभि मधिकं
घार्येति। इति जयंतवचनं। अत्र भगवान्। गृहीतां स्रुवेणैव प्रहरेत्त्रिः सेचनं। अभिघारणमित्याह। तथान्ये पुनर्हविः स्रुवात् उदगुद्वासितं। तस्यापुनरप्यभिघारयेत्। सहस्रपणपक्षे कुत्र पात्रांतरस्थापनमित्यपेक्षायामाह। सहस्रपणपक्षे तु हविर्व्युत्सरणाय वै। निरध्यात्मात्र मितरं मध्ये चर्वाज्ययोस्ततदिति॥५७॥ अस्यार्थः। सहस्रपणनाम अनेकदेवत्यश्चरुरेकस्यामेव स्थाल्यां पच्यते। तत्पक्षे तु चरोराज्यपात्रस्य च मध्ये प्रथमातिक्रमे कारणाभावादिति न्यायेन आज्याद्दक्षिणतः समीपस्थितं पात्रं तयोर्मध्ये तृतीयपात्रासादनं। एवं यदाज्यपात्रसमीपवर्ति चरुपात्रमतिक्रम्य स्थापयेत्। यदि अतिक्रम्य स्थापनं तदा चर्वाज्ययोर्मध्ये स्थापनं न स्यात्। ततः किं कुर्यादित्याह। अलंकृत्याभिघार्येध्ममाधाय यथेतद्यथा स्रुवेणाज्यं गृहीत्वाग्नेः प्रत्युत्तरदेशतः॥५८॥ आरभ्यादिशमाग्नेयीमाज्यधारामृजुं हरेत्। नैर्ऋतीं दिशमारभ्य ईशानीं पूर्वमुद्धरेत्॥५९॥ उभयत्र चतुर्थ्यंतं प्रजापतिपदं स्मरन्। स्वाहेत्याघा

Indira Gandhi National
Centre for the Arts

रयेद्वेता याघारा विति भाषितौ ॥८०॥ जुहुयादग्नयेस्वाहेत्युदगाज्यं स्रुवेण तु । तेनैव जुहुया
ज्यं सोमायेति स्रुक् दक्षिणादिति ॥८१॥ अस्यार्थः । ततः अग्न्यलंकरणं कुर्यात् । केन विश्वानिनो
२१ दुर्गहेत्यादिमंत्रेण अलंकरणमग्नेः कुर्वंति । केन न अलंकुर्वंति गंधपुष्पाद्यैः ईशानी दिशिमा
रभ्य अलंकुर्यात् । अग्न्यलंकरणशेषेण आत्मानं अलंकुर्वंति । इति शास्त्रांतरदृष्टं ।
इध्ममभिघार्य अयंत इध्म इत्यनेन मंत्रेण जुहुयादिति स्रुचं च पूर्णपात्रे स्थापयेत् । यावदेतस्याहोम
कालो भवति । ततः आघारस्वरूपं अग्नेः पश्चात् उत्तरदेशतः वायवी दिशिमारभ्य दिक्षु मानं नत्रकेन
नेन स्रुवेण उभयोरंतरालवर्तिनी वायवी भवति । एवं समन्न ज्ञातव्यं । स्रुवेणाज्यं गृहीत्वा अग्ने
यी दिशिं प्रतिघाप्य आज्य आघारां जुहुरेत् । अनवच्छिन्नावच्छेदरहितां एतादृशीं कुर्वेनयादि
त्यर्थः । ततः द्वितीयो याघाराहुतिं कृत आरभ्य कुत्र नयेत् । नैर्ऋतीमारभ्य ईशानी दिशिं प्रतिपू
र्ववत्सरेत् । अत्राहुति विषये मंत्रोच्चारणस्वरूपमाह । अत्रोभयत्र प्रजापतिपदस्य मनसास्मर
णं मनसा पठनीया । तत्पदं चतुर्थ्यंतं कृत्वा प्रजापतये इत्येतावच्च चतुर्थ्यंतं मनसाध्यायन् । तूष्णींहो २१
मनसाक्तानेषु सर्वत्र । यत्र तूष्णीमिति पदं तत्र प्रति ध्यानं सर्वत्र स्वाहेत्युक्ता आघाराहुतिं नयेत् । आज्यधा

रामिति इत्येवामाघारौ निरूपितौ । अग्नेरुत्तरभागे स्रुवेणाज्यं गृहीत्वा अग्नयेस्वाहेति जुहुया
त् । अग्नेर्दक्षिणभागे सोमायस्वाहेति जुहुयात् । एतदाहुतिद्वयमाज्यभागवेनोच्यते चक्षु
षी वा विज्ञायेते चक्षुषी आज्यभागा विति अग्नेर्दक्षिणोत्तरयोराहुत्याः संज्ञा । तथाचे
शौनकः । अग्निं परिसमुह्यापरं पुष्पैरलंकृतं । आत्मानं चाप्यलंकृत्य इध्ममादाय
पाणिना इध्मसन्नहनीरज्जुमनुयाजं निधायतां । आदायाज्यं स्रुवेणोव त्रिरिध्ममभिघा
रयेत् अयंत इध्म मंत्रेणाग्नौ निधाय च । अत्र इध्मस्य मध्यमूलयोर्मध्ये होत
व्यः । इध्मसन्नहनमनुयाजार्थं वेत्तत्रैव दर्भेषु निदध्यात् । आज्यभागानंतरं कर्त
व्यमाह । उद्धृत्य वचरोरर्द्धमभिघार्येदमग्नये । इतीदमग्नीषोमाभ्यामिति च अभिघ
शेषरमिति ॥८२॥ अस्यार्थः । चरोरर्द्धमुद्धृत्य स्थाल्यां अभिधमग्नयइत्यभिघार्य
पात्रांतरस्थमिदमग्नीषोमाभ्यामित्यभिघारयेत् । एवं मंत्रद्वयेन पात्रद्वयाभिघ
रणं भवति । ततः अग्नये चरुः अग्निदेवतायो स्थापिते चरुरग्न्यर्थमभिघ स्तस्य
त्याह । दर्व्यामुपस्तृणात्याज्यमाग्नेयचरुमध्यतः । अवद्यहविरंगुष्ठपर्वमात्रं ततोप्यन ॥८३॥

Indira Gandhi National
Centre for the Arts

अग्नेश्चैव पूर्वतस्तादृशं च वास्यां न तदवपेत्। पात्रस्थमभिघार्यास्यां स्थितमप्यभिघारयेत्॥ ६४॥
जुहुयाद् अग्नये स्वाहा इत्यां मध्ये हविर्भुजः। प्रत्यक्करे वा देशेऽयम् आज्यभागावपेक्ष्य च॥ ६५॥ जु
२२ हुयादपि हस्तिदिवदर्व्या पार्श्वेन या ज्ञिका इति। अस्यार्थः। ततः अग्न्यर्थम् अभिमृष्टश्चरुस्तन्मध्यतः
मध्यप्रदेशाद् अंगुष्ठपर्वमात्रकं हविरवदाय गृहीत्वा आज्योपस्तृतायां दर्व्यां स्रुवेणैव उपस्त
य रणं तस्य निःक्षिप्य। अग्नेश्चैव अग्रेहविषः पूर्वतः मध्यापेक्षया पूर्वादिग्भागात्। तथैवावद्य
गृहीत्वा अस्या मुखं दर्व्यां तदावपेत्। पूर्वप्रदेशीयद्धविरप्रति। अयमर्थः। हविर्ग्रहणं
तु मध्यमानामिकांगुष्ठैर्भवति। आदौ चरुपात्रस्थम् अभिघार्य पश्चाद् दर्व्यां दर्वीमभिघारणं
भवति। आदौ उपस्तरणं पश्चाद् द्विविषो द्विरवदानं ततः सकृदभिघारणमिति। एवं च
रुरवदानं ज्ञातव्यं। कुत्र वा आहुतिप्रक्षेप इत्याह। अग्नेर्मध्यप्रदेशे दर्व्या जुहुयात्। अथ
वा आहुतिप्रक्षेपार्थं स्थानान्तरम् अभिभवति। आज्यभागावपेक्ष्य आज्यभागयोरेव यायः प्रत्यक्करो देशः २२
पश्चिमप्रदेशः तत्र वा होतव्यमिति। अपि दाधारिव आज्यादिनं यथा भवति। दर्वीमधो सुखं ज्ञात्वा जुहु
यादित्यर्थः। तथा दर्व्याः पार्श्वेन होमो भवति। न चाग्रेण इति तु या। ज्ञिकाः कथयंति कुर्वंति च। पाणि

होमे तु पार्श्वेन प्रजापतिनीयेन अगुल्म्यैर्दैवतीर्थेन एतदुभयमपि भवति। यदा दर्व्यां
होमः। तदा पार्श्वेनैव होम इति विवेकः। द्वितीया हुतेरपि विधिं दर्शयति। उपस्तीर्ये द्विती
यस्याप्यवदानादि पूर्ववत्॥ ६६॥ प्राग्वा दग्वाग्नीषोमाभ्यां स्वाहेति जुहुयाद्यपंचाव
तीतु पश्चार्धाद् अप्यवद्येति वै ततः इति॥ ६७॥ अस्यार्थः। दर्व्यामाज्यमुपस्तीर्य द्वितीयस्यापि
चरोः अग्नीषोमीयस्यापि चरो पूर्ववदेव अवदानादि भवति। अग्नेर्मध्यप्रदेशो सूर्वदेशे
उत्तरदेशे वा आहुतिप्रक्षेपो भवति। प्रथमाहुतेस्तु अग्नेर्मध्यप्रदेशे तस्मात् पश्चिमदेशो
भवतियं विशेषः। चतुरवदानस्वरूपमुक्त्वा पंचावत्तिस्वरूपं दर्शयति पंचावत्ती जामदग्न्यगो
त्रः पश्चार्धाद्धविषः पश्चिमप्रदेशादपि हविर्ग्रहणमधिकं करोति। इतरत्समानं। चतुरावत्ती
नां पक्षे उपस्तरणं द्विरवदानं पुनरवतस्य प्रत्यभिघारणं एवं चतुरवदानं भवति। पंचावत्तिना
मादौ उपस्तरणं हविषस्त्रिरवदानं पुनरवत्तस्याभिघारणं एवं पंचावदानं भवति। इदानीं
स्विष्टकृतं निरूपयति। स्विष्टकृतु नराद्दस्य पुरस्ताद् प्यवद्यति। उपस्तीर्या घृहविषो द्वयोर
प्युत्तरार्धतः॥ ६८॥ पूर्वावदानतो भूयः सकृत्सकृदवद्यच। ओप्याद्विरभिघार्यान्नंपा

Indira Gandhi National
Centre for the Arts

पात्रस्थं नाभिघारयेत् ॥६९॥ यद् इस्येत्यादिना हुत्वा प्रागुदक् हविर्भुज इति । अस्यार्थः । चतुरवत्ती स्विष्ट
कृद्धोमविषये दर्व्या मध्ये उपस्तीर्य उत्तरप्रदेशस्थितस्य हविषः अवदानं करोति । पश्चाद् द्विरभिघा
२३ रयति । पात्रस्थं न अभिघारयति । अयमेकदेवत्यस्य चरुविषयः । इदमत्र गृह्यं उत्तरार्धात्स्विष्टकृ
तं नात्र हविः शेषमभिघारयतीति । पंचावत्ती तु उपस्तृतायां दर्व्यां उत्तरप्रदेशस्थितहविषः सका
शाद् गृहीत्वा निक्षिप्य पुनस्तस्य उत्तरार्धस्य हविषः पूर्वभागाद् अवद्यति । ईशानभागस्थितं ग्राह्य
मित्यर्थः । द्विरभिघारयति । एवं पंचावदानं । एकचरुविषये व्यवस्था प्रतिपादिता । यत्र पुनश्च
रुद्वयं तत्र यत् ततोऽधिकं वा भवति । तत्रावदानं कथं स्विष्टकृद्विषये भवेदित्याह । आदौ दर्व्यामाज्य
मुपस्तीर्य द्वयोरपि हविषोः मध्ये आर्णा वा उत्तरार्धतः क्रमाद् अवदानधर्मेण अवद्य पात्रस्थितमन
भिघारयेत् एवं द्वितीयादि पात्रस्थमपि ग्राह्यमेकैकं प्रति पात्रं सकृत्सकृद् ग्राह्यं भवति । नत्वेकस्था
लीस्थहविषः पुनर्ग्रहणं भवति । पंचावत्ती सर्वेभ्यो हविर्भ्य उत्तरपूर्वप्रदेशाद् द्विरवद्यति । पश्चा
द्विरभिघारयति । अत्र स्विष्टकृद्विषये पात्रस्थं अभिघारयति एवं स्विष्टकृतो हविर्गृहीत्वा कुत्र हव २३
नं भवतीत्यपेक्षायामाह विभुजः प्रागुदक् पूर्वोत्तरयोर्मध्यप्रदेशवर्तिनी ईशानी याह्या यदस्येत्यादिमं

त्रेण होमं कुर्यात् । एकचरुविषये बहुचरुविषये स्विष्टकृति हविषोऽवदाने विशेषः । इतरत्सर्वं समानमि
ति । अनंतरं कृत्यमाह । ताम्रिधमबंधनीरज्जुं विस्रस्य प्रास्य चानले ॥७०॥ अयाश्चेत्यादिभिर्मंत्रैर्हुत्वाज्याहुति
सप्तकमिति । अस्यार्थः । इध्महोमसमये कुत्रचित् शुद्धप्रदेशे स्थापितामिध्मबंधनीयं रज्जुं मूलतः विस्रस्य
अनले प्रक्षिपेत् । अत्र न मंत्रः । नत्वत्र नियमः । केचिदुद्यायतं तिचरायस्वाहेति मंत्रं पठंति । रज्जुप्रह
रणानंतरं । अयाश्चाग्नेस्यनभिशस्तीश्चेत्येवमादिभिः सप्तभिर्मंत्रैराज्याहुतिं हुत्वा वक्ष्यमाणकराब्रह्म
वस्रुकर्मसु अग्नेर्वायव्यदेशे ब्रह्मा तिष्ठन्नेव पूर्वोक्तैरेव सप्तभिर्मंत्रैर्जुहोति ॥ निरसनमुपवेशनं जपः
प्रायश्चित्तहोमः संस्थाजपेनोपस्थानं चेति पंचकर्माणि ब्रह्मण इति होतोः नैमित्तिकप्रायश्चित्तानि च
तृतीयाध्याये वक्ष्यति । अनंतरं कृत्यमाह ॥ निनयेत्पूर्णपात्रं तं निहितं तथ बर्हिषि ॥७१॥ अस्यार्थः । अनंत
रं यत्पूर्वं बर्हिषि पूर्णपात्रं तं निहितं निनयेत् निषिंचेत् । अत्र निनयानंतरं कृत्यमाह । वामभागे तथासी ना
नापत्नी प्रत्यग्घविर्भुजः । आसिच्य पाणिना तोयं मार्हं प्रजापरासिचं ॥ आपो अस्मानयं मंत्र इदमाप इती
तरः । स्फमित्यान इति त्र्यच एभिर्मार्जनमाचरेत् ॥७२॥ अस्यार्थः । बर्हिषि पूर्णपात्रनिनयनं कृत्वा मार्जनं
कुर्यात् । तत्रैते मंत्राः । आपो अस्मान्मातरः शुंधयंत्विति मंत्राः । इदमापः प्रवहतेत्यपरः । स्फमित्यान् आ

Indira Gandhi National Centre for the Arts

पत्रोपयपःसंविंति अपरः एभिर्मार्जनं भवति। तद्धतंत्रं कृतानां स्यान्नोपवासादि शिष्यते। देवता
स्तत्र तत्रोक्ताः सद्यःकालत्वमिष्यते। कारिका नवेति संदेहः। कस्मिंन पिकर्मविशेषे पत्न्या अपि मा
२४ र्जनं भवतीत्याह। कार्यं पुंसवनादौ तु पत्न्या अपि वमार्जनं भके। चेत्सिनीति मेवाङ्करिति। अस्यार्थः।
पुंसवनादौ तु पत्न्या अपि एभिरेव मंत्रैर्मार्जनं कार्यं। अत्र पत्न्या एव प्राधान्यं तत्र यजमानस्य
आचार्यत्वं अतः उभयोरपि दंपत्योर्मार्जनमुपपन्नमिति भावः। केषांचिन्मते पूर्णपात्रस्यव
हिः प्रिनिनीतिः स्थापनमात्रमिति न मार्जनं कस्यापि। अत्र भवेश्वर्गेनं। आदाय पूर्णपात्रं तद्द
हिष्यां धाय पाणिना। स्पृष्ट्वा दक्षिणहस्तेन तत्पूर्णमसि मंत्रतः। प्राच्यां दिश्यादिभिर्मंत्रैः कुशैः प्रा
गादिषु क्रमात्। उदकं तु प्रांते दिशं प्रोक्ष्याथ तां निनीयतत्। आपो अस्मानित्यनयाइमापइति
त्वथ। सुमित्र्या न इत्येतेन मंत्रांते मार्जनं ततः। दुर्मित्र्या इति मंत्रेण प्रत्यग्दक्षिणदेशके। तदन्तेत्येव
मंते कुशाग्रैः प्रक्षिपेदपः। वामपार्श्वत आसीना पत्नी प्रत्यग्विभुजः। आसिच्य पाणौ तत्तोयं माहेम
जामनेन तु। तस्याणिभ्यां गृहीत्वा तु पापमात्मकृतंरमरन्। आत्मानं यजमानं च होता निःप्रोक्ष्य तुज २४
ले रिति। अत्रार्थ प्रातरक्षाविधानं त्र्यायुषमित्यादिना कार्यं। उपस्थायोवमे स्वरइति। अस्यार्थः। त

तो जे येमानः। अग्निमुपतिष्ठेत ओं नमे इत्यनेन मंत्रेण उपांशु मंत्रेण शनैर्जपन्नुपतिष्ठेत अग्नेः प्रत्यगु
दः स्थितः। श्रद्धां मेधां यशः प्रज्ञां विद्यां बुद्धिं श्रियं बलं। आयुष्यं तेज आरोग्यं देहि मे हव्यवाह
नइति। उपस्थानानंतरमाह। पर्युक्ष्य परिषिच्यान्नं हुतशिष्टं घृतं चरुं। ब्राह्मणे तदभावे तु ब्रा
ह्मणेभ्यः प्रदीयतइति। अस्यार्थः। जपानंतरं रक्षां कृत्वा ततः अग्निं पर्युक्ष्य पूर्ववदुदकेन पाणि
ना अग्नेः समंततो मार्जनमित्यर्थः। तथैव परिषिच्य परिषेचनं प्रोक्षणं कृत्वा हुतशिष्टमन्नं घृतं
च ब्राह्मणे दद्यात्॥ तदभावे अन्येभ्यो ब्राह्मणेभ्यो दद्यात्। इयमेव स्थालीपाकस्य दक्षिणा
आमावास्यायां स्थालीपाके प्रधानदेवतामंत्रविषये विशेषमभिधानमाह। अग्नीषोम
पदस्थाने इंद्राग्नीपदं प्रदद्भावयेत्। अयमेव विशेषः स्याद्दर्शे त्वन्यत्समं भवेदिति॥७४॥
अस्यार्थः॥ अग्नीषोमपदस्थाने इंद्राग्नीपदं अन्यत्सर्वमपि समानं भवति कर्मपरिसमा
प्तौ किंचिदुक्तमाह। एतत्तंत्रं कृतानां स्यान्नोपवासादि शिष्यते प्रधानदेवतान्यत्संप्र-
कालस्तत्र शिष्यत इति॥७५॥ अस्यार्थः। अग्नौ हूयमाना उक्ता उच्यंते तेषामपाइति कर्त्त
व्यता भवति। अत्र उपवासादि नियमो न विध्यः भोजनाद्यदिलक्षणो नियमः नचरुममा

Indira Gandhi National
Centre for the Arts

त्रे भवति। दर्शपूर्णमासयोरेव नियमश्रवणात्। दर्शपूर्णमासाभ्यामुपवासइति सूत्रेपि वर्तते।
कृतानामेषन्या एव प्रधानदेवताः। तत्र सद्यः कालपक्षः नेत्र दिनद्वयकर्मसाध्यमस्ति। यथा दर्शपू त्र २
२५ र्णमासयोर्दिनद्वयसाध्यत्वं तथात्र नास्तीत्यर्थः। सद्यः कालपक्ष एवांगीकृतः॥ इति स्थालीपाकः।
॥अत्र यज्ञकर्मणि दक्षिणाविशेष उच्यते। हेमाद्रौ मलचमहामते॥ नैरापनिषदो चेत्सर्वक
र्मसु दक्षिणा। सर्वक्रतुषु चोद्दिष्टा भूमिर्गावोथ कांचनं। श्रुतिस्तु परमा स्फुवर्णं दक्षिणा वे
ति। बैजावापेन रजतदक्षिणा। निषिध्यते। शिवनेत्रोद्भवं यस्मात्तस्मात्तत्पितृवल्लभं। अमंग
लं तद्यत्नेन देवकार्येषु वर्जितं। केषुचित्कर्मसु स्वस्तिवाचनमिष्टमिति। आचार्येणापि
मंगलार्थं निगदितं। तदाह स्वस्तिवाचनमंत्रेषु गृह्यकर्मसु केषुचित्। आचार्येणापि शास्त्रे
स्मिन्मंगलार्थमुदीरितमिति॥७६॥ अस्यार्थः। केषुचित्कर्मसु स्वस्तिवाचनं भवति। आ
श्वलायनाचार्येणापि मंगलार्थं निगदितं तत्र स्वस्तिवाचनविधिः। कस्मिंत्समये कथं
वा भवति। यथा जातकर्मणि जातस्य कुमारस्य वेदोक्तपवित्रीकरणार्थं जातकर्म करिष्ये तत्र
पूर्वांगतया नांदीमुखं करिष्ये। तत्रादौ स्वस्तिवाचनं ब्राह्मणैः सह करिष्ये तदंगभूतं ब्राह्मणपूजनं
ग

करिष्ये। तत्र स्वस्तिवाचनसंकल्पानंतरं कर्तव्यमाह। अर्चिता ब्राह्मणाः सम्यग्गंधमाल्यैः
सदक्षिणैः। तिष्ठेयुः प्राङ्मुखा युग्मा वकाराद्भपाणयः॥७७॥ अस्यार्थः। गंधमाल्यैः सदक्षिणैः
पूजिताः संतः ते स्वस्तिवाचनार्थमादौ गंधमाल्यादिना अलंकृत्य दक्षिणादानेन तेषां परितो
षमुत्पाद्यते। ब्राह्मणाः युग्माः समाः चतुः षडादयः। ते अलाभे द्वयं वा पुनः प्राङ्मुखाः पूर्वाभि
मुखाः दर्भपाणयः सपवित्रकाः तिष्ठेयुः कः कारः स्वस्तिवाचकार्थः। सम्यगर्चिताः सम्य
ग्विधिविधितः भक्तितः द्रव्यात्सवादिसामयीतः निष्ठेद्वाचयिता तेषां दक्षिणस्य उदङ्मुखः बि
भ्रत्कुंभमपां पूर्णं पिहितानननमर्चितं॥७८॥ अथ वाचयितुर्बाह्यं दक्षिणतस्समाश्रिताः। तिष्ठेयु
दङ्मुखाः सम्यक्संस्कार्याः स्वनगजादिति॥७९॥ अस्यार्थः। वाचयिता तु तेषां वाचकानां दक्षि
णभागे उत्तराभिमुखस्तिष्ठेत्। तिष्ठेदिति तस्यापि वाचयितुः स्वस्तिवाचनकारयितुः यजमा
नस्याप्युपवेशनं नास्ति आसमाप्तेः वाचयिता उदङ्मुखस्तिष्ठेत्। किं कुर्वन्नासौ अद्भिः पूर्णं चंद
नाक्षतपुष्पैरर्चितं उभाभ्यां पाणिभ्यां कुंभं व्यवहारात्ताम्रादिमयं बिभ्रत् धारयन् पुनः कथं
भूतं पिहिताननं यस्य कुंभस्य आननं मुखं पात्रांतरेण अथवा शिष्टाचारात्स्वकोस्वपात्रेणाह

Indira Gandhi National
Centre for the Arts

रिद्रापूगीफलसहितंतंदुलपूरितेन आम्रा। इतं संपल्लवमपि कुंभं कुर्यादिति। तत्राचार्यः। स्मृतिरूपेण सू
२६ त्रेण वेष्टितं कुंभममपांपूर्णं लक्षपितं। मृत्तास्रादिमयं भूमौ रत्नगर्भं समर्चितुं॥ सिततंदुलपूर्णेन पात्रे
णपिहितानेन। पल्लवाद्यैश्च संगृह्य गुरुःस्तिष्ठेदुदङ्मुखः। नमस्कारश्चापि तिष्ठेयुरिति एवमाशीर्वादग्र
हणार्थं प्रवृत्तो यजमानस्तस्य यजमानस्य संस्कार्यः यथासंभवं माणवकादयः दक्षिणबाहुं सं
लग्नाः ते च उदङ्मुखास्तिष्ठंति। सम्यक् तिष्ठती यत्र संस्कार्योणा माणवकादीनां स्कंधं करं भवेत्। तात
थावरूत्वानेमित्यर्थः। तत्र तत्र विहिते कर्मणि यत्र संस्कार्यस्तत्रैव यत्र संस्कार्यो नास्ति तत्रोपवेशनम
पि चेत्। नास्ति चेदाविचलितमुपवेशनं॥ मनइत्यादिकं मंत्रमेवायुमनिरादिशेत्। मनस्समइति
ब्रूयुस्ते समाहितपूर्वकं॥ ८०॥ प्रसीदंतु भवंत इत्यथवाचयितावदेत्। प्रसंनास्मइतिस्पष्टमाचेष्टी
रंस्तथार्चिताः॥ ८१॥ शांतिःपुष्टस्तथ्यविघ्राद्याशब्दान्पंचदशेवत्। अस्त्वशब्दांतमुच्येरन्वाचयित्वात
थापरे॥ ८२॥ प्रस्तुतस्य देवतायां तु होमं कुर्याद्विचक्षणः। तस्यानाम गृहीत्वाथ प्रीयतामेतिभाषतइति
॥८३॥ अस्यार्थः। ततोवाचयितायजमानः ब्राह्मणान्प्रति मनःसमाधीयतामितिमंत्रमादिशेत् ब्रू
यात्। एकाग्रमानसः सन्तेविप्राअपिसमाहितपूर्वकं मनसः स्मसमाहितमनसः स्मइतिब्रूयुः। २५
ततोवाचो। यजमानप्रसीदंतु भवंतइतिवदेत्। आर्चितास्ते ब्राह्मणास्तव प्रसंनास्मः इत्याचक्षीरन्

त्युत्तरंदद्युरिति। ततः शांत्यादिपंचदशशब्दान् आशीर्वादरूपान् परेरन्यैरपि द्विजैर्वाचयित्वा ते च पु
नः अस्तुशब्दांतमुच्येरन्। प्रश्नोत्तरप्रकारमाह। मत्स्यं शांतिरस्त्विति भवंतो ब्रुवंत्विति वाचयित्वा
ते पितुभ्यं शांतिरस्त्विति प्रतिब्रूयुः। एवं सर्वत्र। यां देवतां प्रस्तुत्य होमं कुर्यात्। तस्या नाम गृहीत्वासा
देवता प्रीयतामिति वदंतु। सा प्रीता भवत्विति ब्राह्मणाः अत्र विशेषमाह शौनकः। तत्रादावापइत्येव व
देवाचयिता ततः। वक्तारोपि। शिवा आपः संत्वित्येवं ब्रूयुः। अथ। गंधाइति वदेदेकः सुगंधाः संत्विति नरे। व
देत्सूर्यस्य मनसइत्येवमपरेपि च। सौमनस्यमस्त्विति ब्रूयुरस्तुशब्दांतमत्वराः। पश्चादक्षतइत्येवं ब्रूया
द्वाचयिता ततः। अन्येक्षतं चारिष्टं चास्त्वित्येवं ब्रूयुरर्चिताः। ततो याचयिता विप्रो दक्षिणाइत्युदीरयेत्। २
स्वस्तिशब्दाद्यमुच्चार्य दक्षिणाः पांत्विति नरे। बहुदेयमिति ब्रूयुरस्तुशब्दांतमत्वराः। कर्ताथ दक्षिणं
जानुपातयित्वा महीतले। उदङ्मुखो जपेत्स्वस्तिं श्रद्धयेत्येवमादिकं। अर्चयित्वाथ तत्कुंभं बिभ्रन्नेदङ्मु
खमुखाः। मनःसमाधीयतामिति। पुण्याहं स्वस्त्यस्त्वथ ऋद्धिं च भवंतो ब्रुवंत्विति। प्रणवाद्युत्रिरावर्त्य भ
वद्भिर्विना परे॥ ८४॥ मत्स्यु किं विषये भेदस्तृतीयेत्व ध्यतामिति। पुण्याहादि त्रिरभ्यस्य मंद्रमध्योच्च
स्वनैःस्वनैः॥ ८५॥ अस्यार्थः। भो ब्राह्मणाः पुण्याहं भवंतो ब्रुवंतु। ॐ स्वस्ति भवंतो ब्रुवंतु। ॐ ऋद्धिं भवं

Indira Gandhi National
Centre for the Arts

नो ब्रुवंतु। एवं कर्ता प्रणवाद्यं पुण्याहादिशब्दत्रयं क्रमेण वारत्रयं वा त्रयं प्रत्येकं पठति। त्रिः पुण्याहं पठि
त्वा तथैव त्रिः स्वपदं तथैव त्रिः ऋद्धिपदं उक्तप्रकारेण पठति। अपरे ब्राह्मणा अपि भवंतो ब्रुवंत्विति प
२७ दं विहाय। ॐ पुण्याहमिति ब्रूयुः तृतीये प्रश्ने ऋध्यतामिति ब्रूयुरित्ययं विशेषः पुण्याहा
दिशब्दानां प्रातःसवनमध्यंदिनसवनतृतीयसवने घोषैः त्रिवारं पठेयुः। कर्ता ब्राह्मणाश्च आवक्षीन
इमे सर्वे यथागमपरंपरा। अस्यार्थः। इमे सर्वे ब्राह्मणाः आगमपरंपरामनतिक्रम्य आशीर्वादं कुर्युः आ
गमशब्देन आगमज्ञा आचार्या उच्यंते। आपइत्यादिकैः शांतिं ततः कुर्युः समाहिताः॥८६॥ स्वस्तिवाचन
मंत्रेष्टं सर्वेषामृत्विककर्मणां। आद्यावंते प्रयोक्तव्यमिति यज्ञविदां मतं॥८७॥ जयंतस्वामिना प्रोक्तमि
दं तु स्वस्तिवाचनमिति। अस्यार्थः। आपइत्यादिभिः आपो हि ष्ठा समुद्रज्येष्ठेत्यादिभिः ततः शांतिं
कुर्युः समाहिताः एकाग्रमनसः सर्वत्र ऋत्विक्कर्मसु स्वस्तिवाचनमिष्टं कर्तव्यं भवति कर्मणामादौ
समाप्तावपि स्वस्तिवाचनमिष्टं कर्तव्यमिति। यथैव कर्मादौ गंधदक्षिणाद्युपचारैः स्वस्तिवाचनं
वाचयति। कर्ता एवं तान्विविधोपचारैः प्रसाद्य स्वस्तिवाचनं कारयितव्यं। इदं स्वस्तिवाचनं अस्म २७
द्गृहे नास्ति किंतु अस्मदनुग्राहकेन जयंतस्वामिना उक्तं तदवश्यकं कर्तव्यमिति। अत्र कलशस्था

पने विशेष उच्यते। हारीतेन गोभूयेनोपलिप्यो वेदिं रंगवल्लिकयार्चयेत्। प्रस्थधान्योपरि स्थाप्यं पू
र्णं हि कलशद्वयमिति। दक्षिणे चोत्तरे चैव उत्तरे तु निधापयेत्। पात्रमक्षतपूर्णं तु फलपुष्पसमन्वि
तं। विष्णुधर्मोत्तरे। हेमराजतताम्रा वा मृन्मया लक्षणान्विताः। यात्रोद्वाहप्रतिष्ठादौ कुंभाः स्युरभि
षेचने। पंचाशांगुलिवैपुल्यमुत्सेधः षोडशांगुलं। द्वादशांगुलकं मूलं मुखमष्टांगुलं तथेति। क्षत्रिया
दीनां निरोंकारं स्वस्तिवाचनं कार्यं। तदाह यमः। पुण्याहवाचनं चैव ब्राह्मणस्य विधीयते। तथैव च निरों
कारं कार्यं क्षत्रियवैश्ययोरिति॥ इति स्वस्तिवाचनं समाप्तं॥ ॥ वक्ष्यमाणकर्मानुष्ठानसिध्यर्थमादौ
स्थालीपाकं स्वस्तिवाचनं चोक्त्वा इदानीं गर्भाधानाख्यं कर्म वक्तुमारभते। जयंतोक्तेन मार्गेण गर्भाधा
नमिहोच्यते। चतुर्थदिवसादूर्ध्वं मघामूलादिवर्जिते। अलंकृत्य गृहं गंधपुष्पमाल्यादिभिः शुभैः।
॥८९॥ ऋतुस्नातां शुभैर्गंधमाल्यादिभिरलंकृतां। अलंकृतः स्वयं तद्वद्दारोपशयने शुभमिति॥९०॥
अस्यार्थः। जयंतमतानुसारेण गर्भाधानाख्यं कर्म उच्यते। रजोदर्शनानंतरं दिनचतुष्टयं त्यक्त्वा पुत्रका
मं पंचमस्तत्प्रभृतीनि विषमदिनानि त्यक्त्वा समदिनेषु मघामूलादिवर्जितेषु नक्षत्रेषु गर्भाधानाख्यं
कर्म कुर्यात्। आदौ सुमुहूर्तं ज्ञात्वा विचार्य तस्मिन्दिने स्वकीयं कुलधर्मं विधाय इष्टदेवतानुष्ठानार्थं

Indira Gandhi National Centre for the Arts

ब्राह्मणान्भोजयित्वा स्वस्तिवाचनपूर्वकं स्वयं च मधुराद्यन्नं भुक्त्वा हृष्टमानः कर्पूरचंदनागरुकस्तू
र्याद्यनुलेपनैः स्रग्वासितं शुभमाल्यैः यथोचितं गृहमलंकृत्य शयनशालायां भार्यां वशग्यामपि तथै
२८ व स्वयमप्यलंकृतः शुभं शयनमारोप्य परिकल्प्य। ततः किं कुर्यादित्याह। पेषयित्वाश्वगंधाया मूलं
शुद्धेंबरे क्षिपेत्। ऋतौ दीर्घातइत्यस्या दक्षिणे नासिकापुटे॥९१॥ निष्पीड्य वस्त्रेतन्मूलं वस्त्रसंशोधि
तं तदिति। अस्यार्थः। रात्रौ शुभलग्ने अश्वगंधायाः मूलं पेषयित्वा शुद्धवस्त्रे क्षिप्त्वा उदीर्घातइत्यृचा अस्याः
दक्षिणे नासिपुटे क्षिपेत्। ततः किं कर्तव्यमित्यत आह। एवं कृत्वोपगमने कृते स्याद्गर्भसंभवमिति॥९२॥
अस्यार्थः। एवमनया रीत्या विधिं कृत्वा उपगमने समीपगमने संभोगार्थं प्रवृत्ते सति गर्भलभकं तं स्यात्॥
गर्भो लभ्यते येन कर्मणा तद्गर्भलंभनं। आचार्यस्य मते गर्भाधानं पाक्षिकमिति कृत्वा शौनकायुक्तमार्गेणो
क्तमिति गृह्यते इति वृत्तिकारः। भगवाञ्शौनकः शस्तं तु मंजेषु दिनेष्वाद्यं चतुर्दिनं। आर्तवाशौचवसं ष्टं कं वर्जयि
त्वापरेषु तु। दिनेषु द्वादशस्वेतन्नृत्त दस्मिन्यति भार्यया। उभयोरपि जन्मर्क्षानुगुणं तारकं भवं। स्नापयित्वा
थ गंधाद्यैर्भूषयित्वा वशोभने। मुहूर्ते त्वश्वगंधायाः मूलं संपीड्य तत्पुनः। कृत्वा नवांबरच्छन्नं परिगृह्या २८
पिपाणिना। उदीर्घ्वातः पतिवतीत्याद्यां मंत्रमुदीर्य वा जायाया दक्षिणे नासारंध्रे सिंचेत्तु तद्रसं। उदरस्पर

से॥ सिंसिंतस्मिंनाचांतसलिलां सतीं। उपगच्छेद्धर्मेण विधिनोपगमे कृते। गर्भः स्थिरः स्यादित्येवं गर्भलंभ
लं नमू चिरे इति। आचार्योपि स्मृतिरूपेण। आचम्यारोपयित्वासां पत्नीं सम्यगलंकृतं स्वयं चालंकृत
स्तद्वच्छयनं समुपाविशेत्। अदापयित्वाश्वगंधायां मूलमालोड्य सूक्ष्मवत्। अपभेण तु सूत्रेण न्तूतमूले
नवान्येत्। कपिलापयसा मिश्रं कांस्यपात्रगतं शुभं। दक्षिणस्यां नासिकायां सिंचेन्मंत्रेण तत्सतिः।
समंत्र ऋतु दीर्घेति सिक्त्वास्मिन्नुदरं गते। तां पूर्णमिति मंत्रेण तामुपेयाद्यथाविधि। एवं कृत्वा सकृद्रता
समे नित्यं समाव्रजेत्। असकृच्चेद्भवेत्तस्याद्गर्भाधानं कृतं स्त्रियः। मनुः। उत्तमावरगंधाद्यैः शुचिर्भूत्वा
समाहितः। विष्णुर्योनिं स्कृदर्शं च जपित्वाधानमाचरेदिति। गर्भाधानाकरणे प्रायश्चित्तमाह आचार्यः।
गर्भाधानस्याकरणात्स्यां जातस्तु दुष्यति। अकृत्वा गां द्विजे दत्वा कुर्यात्पुंसवनं पतिरिति। इति गर्भ
लंभनं॥ ॥इदानीं पुंसवनमुच्यते। तृतीये गर्भसंस्कारो मासे पुंसवनं भवेत्। आद्यो गर्भोनविज्ञात
स्तृतीयमासि चोत्ततः॥९३॥ चतुर्थे मासि कर्तव्यमाद्यगर्भे स्मृतो विधिरिति। अस्यार्थः। तृतीये मासि
पुंसवनं भवेत्। तत्किं नाम गर्भसंस्कार इति। येन कर्मणा गर्भस्य पुंस्त्वं जायते तत्पुंसवनं। अतः गर्भ
संस्कारः। तृतीये मासि चेदाद्यो गर्भो न ज्ञातः तदा चतुर्थे मासि तस्यात्तदा चतुर्थे मासि पुंसवनं। एतच्चु

Indira Gandhi National
Centre for the Arts

अथ गर्भविषयं। गर्भांतरे तृतीये मास्येव भवति। कुतः तत्र द्वितीयगर्भे जातमासे। तस्मात्तृतीयमासे
व भवति। बृहस्पतिरुक्तः। तृतीये मासि कर्तव्यं गृष्टेरन्यत्र शोभनं। गृष्टेश्चतुर्थे मासे तु षष्ठे वाप्यथ
वाष्टमे। सकृत्प्रसूता गृष्टिः स्यात् उक्तकाले संभवे सीमंतेन सह कर्तव्यं तदाह। जातूकर्ण्यः। द्वि
तीये वा तृतीये वा मासि पुंसवनं भवेत्। व्यक्ते गर्भे भवेत्कार्यं सीमंतेन सहाथवा। नृसिंहोपि। सी
मंतोन्नयनस्योक्ततिथिवासरराशिषु। पुंसवनं कारयेद्विद्वान्सहैवैकदिनेथवा। अथ नक्षत्राण्या
ह वराहः। मूलं श्रवण पुनर्वसू मृगशिरो मघा तिष्यः। पुंसंज्ञे पुंकार्ये वेतानि शुभानि धिष्ण्या
नि। राशीनाह बृहस्पतिः। कुलीरं मिथुनं कन्या। हित्वा शेषाः शुभावहाः। कन्याराशौ विशेषमाह।
स एव। अनुक्तो वापि राशौ तु शुभं स्यात्कुंभवीक्षिते। कन्यायां न प्रशंसंति शुभदृष्टेयुतेपि चेति।
तिथीनाह। नृसिंहः। रिक्तां च पर्व नवमीं त्यक्त्वा सपुंसवने शुभाः। अथाष्टमशुद्धिमाह वसिष्ठः। अ
ष्टमस्थो ग्रहाः सर्वे नेष्टास्तस्तेः शुभावहाः। एवं समन्यस्य स्पष्टीक्ष्येव कुर्यात्पुंसवनक्रियामिति।
वारान्द्वारीनाह बृहस्पतिः। गुरुशुक्रबुधेंदूनां द्रेक्काणांशवासराः। तेषां मुहूर्तहोरा च पुंस २९
वे तिशुभावहा इति। विधिरत्नेपि तिष्ये वैष्णवभे विशुद्धे धने शुभ केंद्रदृष्टयुते लग्ने त

द्दिवसे यमेंदुभवनस्त्रीभ्योन्यलग्ने शुभं। पूर्वाह्णे स्फुरदूर्जिते व्ययगते दुष्टे चतुर्थे विधियेन तत्पुंसवनं
परत्र विधिना मासे तृतीये तत इति। इह मासि कुर्यादिति। मासि सामान्येनास्य विहितत्वात्स्फुरद्गु
रुशुक्रमौढ्येपि पुंसवनस्य कर्तव्यता चगम्यते। तदाह बृहस्पतिः। मासप्रयुक्तकार्येषु मूढत्वं गु
रुशुक्रयोः। न दोषकृत्तदा मासलक्षणो बलवानिति। स्यादाभ्युदयिकं श्राद्धं गर्भिण्या एकभोज
नं। अथापरेद्युस्तिष्यर्क्षे पत्नीं कृत्वा समीपतः। पूर्णपात्रनिधानांतमन्वाधानादि पूर्ववत्। ॥९५॥ अ
स्यार्थः। स्वस्तिवाचनं विधितः कृत्वा तदनंतरं। नांदीमुखं विधाय तदंगत्वेन गर्भिण्या एकभोजनं।
एकस्मिन्काले भोजनं एतत्कर्म दिनद्वयसाध्यं स्वस्तिवाचनादियदुक्तं तत्पूर्वदिनकृत्यं। अपरेद्यु
स्तिष्यर्क्षे पुष्यनक्षत्रे उपोषितां पत्नीं एकभोजनं नियमितां तां समीपतः कृत्वा सहासनेनोपवेश्य
प्रतिज्ञां करोति। अस्याः कृतं नस्य गर्भस्य पुंस्त्वजननलक्षणं पुंसवनाख्यं कर्म करिष्ये। एतत्क
र्म औपासनाग्निसाध्यमेव यतः अन्वाधानादि पूर्ववदित्युक्तं। इतरथा उपलेपादि पूर्ववदित्येवमु
च्येत। यथा लौकिकाग्नौ अन्वाधानमादौ यस्य कर्मणः तदन्वाधानादि पूर्णपात्रनिधानस्था
पनमंते यस्य कर्मणः। एतावत्पर्यंतं कर्म कर्तव्यं कृत्वा। अन्वाधाने प्रजापतिं प्रधानदेवतां व

Indira Gandhi National
Centre for the Arts

रुद्रव्येणेति विशेषः। इतरत्तु समानं। निर्वापप्रोक्षणे स्यातां प्रजापत इत्यृचा। कृत्वाज्यभागपर्यंतमवघा
तादि पूर्ववत्। ९६ अस्यार्थः। प्रजापत इत्यनेन नाम मंत्रेण वारचतुष्टयं प्रोक्षणं भवति। ततः त्रीह्यवह
३० वनादि पूर्ववत्कृत्वा आज्यभागपर्यंतं चक्षुषी पर्यंतं कृत्वा पुंसवनविषये किंचिद्विशेषकर्माभिधान
माह। समानरूपवत्सायागोर्दधि प्रसृतौ क्षिपेत्। तादृशाश्चेदभावे तु अन्यस्या गोर्दधि क्षिपेत्॥ ९७॥ अ
स्यार्थः। समानरूपो वत्सो यस्याः तादृश्या गोर्दधि पत्न्याः पुंसवनकर्मार्थमुक्तं। तस्याः प्रसृतौ अर्था
द्दक्षिणपाणिपुटे तत्र तद्दधि क्षिपेदित्यर्थः। उक्तलक्षणाया अभावे तादृशी समानरूपवत्सा गोर्य
दि न लभ्येत्। तदा अन्यस्या अपि गोर्दधि क्षिपेदित्यर्थः। प्रसृतिर्निम्नपरस्परसंदृष्टिकुंचितांगुलिपा
णिर्निकुब्जप्रसृतिरित्यभिधानात्। अत्र कर्मणि गव्यमेव भवतीत्यर्थः। एवं प्रसृतौ दधि निक्षिप्य। मा
षद्वयं यवं च त्रिः पृष्टे किं पिबसीति तां। त्रिः पुंसवनमित्युक्त्वा प्राश्येत् प्रसृतित्रयं॥ ९८॥ अंडरूपेण
माषोस्तः शिश्नरूपेण वैयवः। अस्यार्थः। अत्र दधिमध्ये माषद्वयं माषधान्यबीजद्वयं क्षिपेत्। एकं
पं यवमपि क्षिपेत्। ततः प्रश्नः तां भर्ता प्रति किं पिबसि त्रिः प्रश्नो भवति। भार्यया प्रत्युत्तरं देयं पुंसवनमिति ३०
वारत्रयं प्रत्युत्तरं भवति। एवं प्रश्नानंतरं प्रत्युत्तरे दत्ते सा भार्या ततः प्रसृतिस्थं यवमाषद्वयमिश्रितं द

धि पिबेत्। तथैव पुनः प्रसृतौ यवमाषसहितं दधि निधाय पूर्ववत् प्रश्नोत्तरपूर्वकं प्राश्नीयात्। तथै
व तृतीयवारमपि प्राशनं भवति। अत्र माषौ अंडरूपेण स्थाप्यः शिश्नरूपेण यवः एवं पुंस्त्वजन
कलक्षणं भवति। एतत्कर्म कस्मिन्प्रदेशे कुर्यादित्यत्राह। परिमंडलगेहस्यच्छायायामुपवेश्य
तां। सिंचेद्दूर्वारसं तस्या दक्षिणे नासिकापुटे। अस्यार्थः। मंडलाकारं गृहं तु मंडपनेव संभव
ति तस्मान्मंडपं कार्यं तस्यच्छायायां तामुपवेश्य अस्याः पत्न्याः दक्षिणनासिकापुटे दूर्वार
सं सिंचेत् क्षिपेदित्यर्थः। तत्सेचनं तु तूष्णीं मंत्रेवेति संदेहे आह। प्रजावज्जीवपुत्राभ्यां सूक्ताभ्यां वा
तदिष्यते॥ १००॥ अस्यार्थः। प्रजावता दृष्टो मंत्रः प्रजावान् जीवमंत्रेण दृष्टो जीवपुत्रः यथाग्न आते
गर्भ इति सूक्तं प्रजावत्। अग्निरेतु प्रथम इति सूक्तं जीवपुत्रः अन्यां सूक्ताभ्यां दूर्वारससेचनं
भवति। अन्ये त्वाकुरिदं कर्म कृत्स्नं स्यान्मंडलेगृहे। अन्ये तु पुनः सकैव कर्म मंडले गृहे कुर्वीतिवृ
त्तौ अन्ये तु दध्यादिप्राशनांतं कर्म स्नानांतरे कृत्वा दूर्वारसप्रक्षेपणार्थे स्नानांतरं मंडलागा
रे एनां पत्नीमुपवेश्य विधानं कुर्यात्। एतच्च। अनवलोभनं कर्म पृथगेतिवृत्तिकारः। अन

Indira Gandhi National
Centre for the Arts

वलोभनंनामयेनकर्मणापुंस्त्वेजातेनावलुप्येतेति।अपरेतुपुंसवनमनवलोभनमितिकर्मद्वयंमंडलागारेकुर्वंति।कात्स्न्येनकर्मद्वयंएकस्मिन्कर्मणिद्रव्येप्राशनांतंपुंसवनं।दूर्वारसप्रक्षेपणांतंअनवलोभनमिति।तत्रायंविवेकः।पुंसवनंगृह्याभ्यंतरेभवति।एकदेशेचोरो
३३ ऽसि त्वा प्रजापतयइत्यथ।यत्तेसुषीमइत्युक्ता हृद्देशंपाणिना।स्पृशन् । भवेत्स्विष्टकृदादिस्यात्स्या
त्पतिर्देवरोथवा।कर्तास्याद्देवरस्तस्यतस्याःपत्युरसंभवे।आवर्तनइदंकर्मप्रतिगर्भमिति
स्थितिःस्मृतिः अस्यार्थः।स्विष्टकृदादिकर्मयथापूर्वंसमापयेत्।अवभृथांतं।अत्रकर्तापतिःस्या
त्तदसंभवेतदसंनिधानेदेवरः।अस्यकर्मणःकर्तादेवरःस्याद्यदितस्याःपतिःसंनिहितोन
स्यात्।इदंकर्मद्वयंपुंसवनंअनवलोभनंचप्रतिगर्भमावर्तेत।प्रतिगर्भंकुर्यादित्यर्थः॥ इति
पुंसवनमनवलोभनंचसमाप्तं॥ ॥अथसीमंतोन्नयनमभिधातुमुपक्रमते।चतुर्थेगर्भ
मासेतुसीमंतोन्नयनंभवेत्।पूर्वस्यासंभवेषष्ठेमासेपञ्चाष्टमेभवेत्।पुंनक्षत्रेसितेपक्षे ३३
तच्चाधानादिपूर्ववत्।अस्यार्थः।गर्भमासेगर्भसहितोमासोगर्भमासःचतुर्थसंख्या॥ते

याभितःचतुर्थस्तस्मिन्।चतुर्थेगर्भमासेसीमंतोन्नयनंकर्मभवेत्।सीमंतोयस्मिन्कर्मणिउ
न्नीयतेक्रियतेतत्सीमंतोन्नयनं।अस्यकर्मणःप्रतिगर्भमावृत्तिर्नास्ति।स्त्रीसंस्कारत्वात्।सी
मंतोन्नयनाख्येनकर्मणास्त्रीसंस्कार्याभवति नात्रगर्भसंस्कारःनेजमेषइत्यादिऋक्त्रयमध्येए
वंत्वंगर्भमाधेहीतिमंत्रलिंगात्।किंचगर्भस्यआधारभूतायाःपत्न्यासीमंतोन्नयनकर्मणासं
स्कृतत्वात् सकृदपिसंस्कृताःइयंवधूःयंयंगर्भंसूतेससगर्भःसंस्कृतोभवेत्।पूर्वस्यचतुर्थस्य
मासस्यासंभवेकर्तुमनवसरेषष्ठेमासेभवति।तत्राप्यसंभवेअष्टमेमासेभवेत्।तथाचज्योति
र्निबंधः।चतुर्थेसप्तमेमासिषष्ठेवाप्यथवाष्टमइति।तत्रापिपुंनक्षत्रेशुक्लपक्षेएतत्कर्मभवति।
पुंनक्षत्राणिचैतानितिष्योहस्तःश्रवणइत्यादीनांपुंनक्षत्राणांमध्येपुष्यादिकोत्सकयोः इ
दंकर्मभवति।शुक्लपक्षेकस्मिंश्चित्पुंनक्षत्रेतत्राप्यनुकूलेचंद्रमसिभवति।तथाचगृह्यसूत्रे।
आपूर्यमाणपक्षेयदापुंसानक्षत्रेणचंद्रमायुक्तःस्यादितिसूत्रार्थस्त्वयं।आपूर्यमाणपक्षेइत्यने
नशुक्लपक्षोभवति।उक्तानांपुंनक्षत्राणांमध्येकेनचिन्नक्षत्रेणचंद्रमायुक्तश्चेत्पुंनक्षत्रेणयुक्तः

Indira Gandhi National
Centre for the Arts

सत्। अनुक्तत्वं दृश्येत यदा एतत्कर्म भवति शुक्लपक्षपुंनक्षत्रे चंद्रानुकूल्ये मित्यादिविशिष्टयो
गर्मे निमित्ते शुभे मुहूर्ते नियमेतत्कर्म भवतीति ज्ञापनार्थमादावेव कारिकाकारेण पूर्वस्यासं
३२ भवे यदि चतुर्थे गर्भमासे शुक्लपक्षादि योगस्यासंभवे षष्ठे मासे भवति तत्राप्येतस्य योगस्यासं
भवे अष्टमे मास्येव भवतीत्यभिप्रायेण पक्षत्रयमंगीकृतं। यस्मिन्काले विरोधोस्ति ज्योति
षोक्तागमोक्तयोः ज्योतिषोक्तं विहायैव श्रुतिनोदितमाचरेत्। प्रयोगशास्त्रविहितः कालो
यत्र न लभ्यते।। विधत्ते ज्योतिषं तत्र विहितत्वानिरोधितं क्लृप्त्यै। अनिस्त्वा प्रसवात्सीमंतका
लइत्याह।। गर्भे लंभनमारभ्य यावत्स्यात्प्रसवस्तदा सीमंतोन्नयनं कुर्यादिति पारस्करस्य वचनं
यथेति। मासश्चात्र सौरसावनचांद्रनाक्षत्रेषु सौरसावद्ग्राह्यः कालविधाने चतुर्थे षष्ठेष्ट
मासभाजि सौरेण गर्भप्रथमे विधेया सीमंतकर्म द्विजभामिनीनां मासे सप्तमे विष्णुबलिं
च कुर्यादिति।। तत्रायं विधिः पूर्वेद्युः स्वधेव स्वस्तिवाचनाभ्युदयिके कृत्वा स्वकुलाचारानुसा ३२
रेण लोकव्यवहारानुसारेण च कुलधर्माचारप्रसिद्धाभिः पुण्यस्त्रीभिराज्ञापितं यद्यत्स

र्वं कर्म गर्भिणीं कारयित्वा कर्ता पतिः परेद्युः कृतमंगलस्नानः साऽलंकृतः सन् प्रातरौपासनं कृत्वा तस्मि
न्नेवाग्नौ अन्वाधानं कुर्यात्। प्राणानायम्य शुक्लासने उपविश्य एवंगुणविशिष्टायां शुभतिथौ स्त्रीसं
स्कारद्वारेण गर्भसंस्कारार्थं सीमंतोन्नयनं करिष्य इति संकल्प्य तदंगमन्वाधाने क्रियमाणे धाता
राकाविष्णुः प्रजापतिः प्रधानदेवताः आज्यद्रव्येणेति शेषः। एवमन्वाधाय प्राग्वन्मूर्ध्नो मस्या ति४
त्समगान्युहाजिनमिति। अस्यार्थः। ततः अन्वाधानानंतरं वृषभचर्मास्तीर्य कीदृक् प्राग्ग्रीवं पूर्वग्री
वायस्य तत्र ऊर्ध्वलोमानि यस्य तत्तथोक्तं चर्म प्रसंकृत्य पश्चिमभागे आस्तीर्य। अत्राज्यहोमेषु पात्रासा
दनप्रकारमाह प्रोक्षणीस्रुवमासाद्य चमसं चाज्यभाजनं इध्माबर्हिरयं प्रोक्तः आज्यहोमेष्वनुक्रम इ
ति ।७।। अस्यार्थः पात्रद्वयं द्वयं गृहीत्वा आसादनं भवति। तत्रायं क्रमः प्रोक्षणीपात्रं दक्षिणहस्तेन गृ
हीत्वा स्रुवं च वामहस्तेन गृहीत्वा आसादयेत्।। पूर्णपात्रमाज्यपात्रं च गृहीत्वा आसादनं। तथैवेद्
ध्माबर्हिषोरासादनं। एवं आज्यहोमेषु सर्वत्र षट्पात्रप्रयोगः। आज्यासादनपर्यंतं पवित्रकरणाद्यर्थे
त्र४ ति। अस्यार्थः। पात्रासादनानंतरं तत्क्रीत्या पवित्रद्वयं संपाद्य प्रोक्षणीपात्रमुत्तानं कृत्वा तथैवोदकपूर
र्णं च कृत्वा गंधपुष्पाक्षतान्निक्षिप्य पवित्रद्वयेन प्रोक्षणीपात्रोदकं त्रिरुत्पूय पात्राण्युत्तानानि
कृत्वा इध्मं च विस्रस्य तेनोदकेन पुनः प्रोक्ष्य तत्पवित्रद्वयं प्रणीतापात्रे निधाय आत्मनोग्रतः स्थापयेत् प्रो
क्षणीपात्रोदकेनापूर्य तथैव गंधाक्षतैरभ्युक्ष्य ब्रह्माज्ञया यथास्थं वोत्तरतः स्थापयेत् तदेव पवित्रद्वयं

Indira Gandhi National
Centre for the Arts

आज्यपात्रे निधाय तदाज्यपात्रं उत्तरतो गारेषु निक्षिप्य स्रुवेणाज्यं स्थाल्यां दर्भाद्यं निक्षिप्य तेनैव स्रुवेण
त्रिः पर्यग्निकरणं कृत्वा तेन पवित्रद्वयेन तदाज्यमुत्पूय स्रुवं संमृज्य मंत्रेण हि स्रुवं तदाज्यं बर्हिषि स्थापयेत् सवित्रं प्रो
३३ क्ष्याग्नौ प्रहरेत्॥ एतावत्कर्म कृत्वा पक्कृत्वा। चर्मण्युपविष्टायाः समन्वारभते पतिः॥ स्यादाज्यभागपर्यंतमि
ध्माधानादि पूर्ववत्॥८॥ अष्टावाज्याहुतिं हुत्वा मंत्रैर्धाता ददात्विति। अस्यार्थः। अथ बर्हिषि आज्यभागपर्यं
तं कृत्वा तत्र पूर्वे स्रुक्संमार्जनं अग्न्युत्करणं च कृत्वा ततः इध्माधानादिकं कर्म कुर्यात्॥ पश्चाद्धाता ददात्वि
त्यादिभिर्मंत्रैरष्टावाज्याहुतीर्जुहुयात्। धाता ददातु दाशुष इति द्वाभ्यां मंत्राभ्यां राकामहमिति द्वाभ्यां ने
जमेषेति तिसृभिः प्रजापते न त्वदित्येकया। एवमष्टसंख्याकैर्मंत्रैः आज्याहुतीर्हुत्वा फलवत्स्तबकौ ग्राह्यौ
त्रिः शुक्ला शलली तथा॥ त्रीणि स्युः कुशपिंजूलान्यभिरेकीकृतैरथेति॥ त्रिर्व्यूहेदथ सीमंतमामूर्ध्नो भूर्भु
वस्स्वरोम्॥१०॥ चतुर्थ्यां व्यूहनं कार्यं सूत्रकारवचो यथा॥ आवर्त्तते स्वयं मंत्रः सर्वत्र व प्रतीयत इति॥११॥ अस्या
र्थः॥ आज्यहोमानंतरं फलवत्स्तबकौ उदुंबरवृक्षस्य शाखैकदेशसंलग्नौ फलगुच्छौ ग्राह्यौ तथा शौनकः
औदुंबरस्य स्तबकं युग्मपक्वफलान्वितमिति॥ शलली त्रिःशुक्ला त्रयः श्वेता यस्यां पक्षिणी यंता दृशी शलली च ग्रा
ह्या॥ त्रीणि कुशपिंजूलानि त्रीणि कुशपत्राणि एभिः सर्वैरेकीकृतैर्मिश्रितैर्हस्तेन धृत्वा अथ पतिः मूर्धानं मर्या ३३
दीकृत्य सीमंतं भ्रुवोर्मध्यदेशमारभ्य मूर्द्धांतं त्रिर्व्यूहेत् घर्षयेत्॥ भूर्भुवस्स्वरोमिति मंत्रेण एतस्य मंत्रस्या
प्यावृत्तिर्भवति। अथ यासूत्रक्रमेण मवैसुं चतुर्वारं व्यूहनं तथैव चतुर्वारं मंत्रावृत्तिः कर्तव्या। एवं सर्व
त्र्यूहने प्रतीतिर्भवतीति। संप्रेष्य सोमं राजानमिति प्रैषेण गाथिनौ। सोमान इति गायेतां। तौ स्था

ने सोमदस्यतु॥१२॥ समीपे या नदी तस्या नाम गंगे सरस्वतीति। अस्यार्थः। ततो यजमानः वीणागाथि
नौ वीणा च गाथा च वीणागाथे ये यो स्तोतथो तौ ब्राह्मणौ प्रति सोमं राजानं संगायेतामिति। प्रैषेणमं
त्रेण संप्रेष्य आज्ञाप्य इमं प्रैषं श्रुत्वा तौ च विप्रौ सोमान इत्यादिमंत्रं गायेतां मंत्रे असौ पदस्थाने
निकटवर्तिनी समुद्रगा नदी तस्या नाम संबुध्या निर्दिशतां। स च मंत्रः। सोम एव नो राजावतु मानुषीः
प्रजा निविष्टचक्रासाविति। अत्र मंत्रे निविष्टचक्रा गंगे इति निविष्टचक्रे सरस्वती इत्यादि भवति।
ततः स्विष्टकृदादि स्याद्दीयते वृषभस्ततः। ब्रह्मणे तदभावे तु ब्राह्मणेभ्यः प्रदीयत इति॥१३॥ अ
स्यार्थः। ततः स्विष्टकृदादि होमशेषं समाप्य ततः होमांते पर्यूहनपर्युक्षणे कृत्वा कर्म समा
पयेत्। ततः कर्मांगदेवतातुष्ट्यर्थं वृषभो दक्षिणा ब्रह्मणे दद्यात्। तदभावे ब्राह्मणेभ्यः। य
द्वचोपदिशेद्वृद्धा ब्राह्मणी सधवप्रजा। पत्नी कुर्यादिहापीयं नांदीश्राद्धं पुरैव तु। नाचरेत
इदं कर्म प्रतिगर्भमिति स्थितिरिति॥१४॥ अस्यार्थः॥ सधवा सभर्तृका प्रजावती पुत्रवती
वृद्धा ब्राह्मणी यद्यदुपदिशेत्तत्तत्सर्वं गुर्विणी कुर्यात्। तत्र दितिकुलधर्ममिति। अस्मिन्निति नांदीश्रा
द्धं पूर्वं कर्तव्यं एवं तदये वक्ष्यति गर्भे गर्भे प्रतिगर्भं सीमंतोन्नयनकर्म नावर्तते। इति स्थितिः। व्यवस्था सी
मंतदिने तद्गृहे भार्यादोषमाह पाराशरः॥ ब्रह्मौदने च सोमे च सीमंतोन्नयने तथा॥ जातश्रा

Indira Gandhi National
Centre for the Arts

द्र नवश्राद्धे भुक्त्वा चांद्रायणं चरेत्। अस्योरनारंभं कर्म आधानांगभूतं सीमंतमाह चर्यात्। प्रथमे गर्भे
सीमंतस्य प्रयोजनमाहाचार्यः। पत्न्याः प्रथमजं गर्भमत्तुकामाः सुदुर्भगाः। आयांति काश्चिद्राक्ष
३४ स्योरुधिराशनतत्पराः। तासां निरसनार्थाय श्रियमावाहयेत्सतिः। सीमंतकरणाल्लक्ष्मीस्तामाव
हति मंत्रतः। श्रियाश्रितशरीरत्वात्तां त्यजंतीह मोहिताः। अकृतसीमंतायाः प्रसवे विशेषमाहस
त्यव्रतः। स्त्री यद्यकृतसीमंता प्रसूयत कथंचन। पुत्रं गृहीत्वा विधिवत्पुनः संस्कारमर्हति। गर्गोपि।
यदि सीमंततः पूर्वं प्रसूता चेत्तु भामिनी। तदानीं पेटके गर्भः स्थाप्य संस्कारमाचरेत्। अत्राष्टमे मा
भो सि विष्णोः पूजां कुर्यात्। तथा च संग्रहे। वैष्णवो ह्यष्टमासो विष्णुर्गर्भस्य देवता। बलिं चरुं तूष्णीं वा
कुर्याद्गर्भस्य परितुष्टये इति।। इति सीमंतोन्नयनं।। ।।अथ जातकर्म।। जाते पुत्रे पिता स्नात्वा नांदी
श्राद्धं विधानतः। जातकर्म ततः कुर्यादन्येष्वालभनात्पुरे।।१६।। अस्यार्थः। पुत्रोत्पत्त्यनंतरं पुत्रग्रह
णं कन्यकानिवृत्त्यर्थं ततः पिता शीघ्रमेव स्नात्वा विधानतः सांगनांदीश्राद्धं कुर्यात्। हिरण्याभ्यु
दयिकमेव भवति। तथा च व्यासः। द्रव्याभावे द्विजाभावे प्रवासे पुत्रजन्मनि। हेमश्राद्धं प्रकुर्वीत य ३४
स्य भार्या रजस्वला। आमश्राद्धं न दद्यात्तु पक्वान्नं ब्राह्मणेष्वपि। यस्माच्चांद्रायणाच्छुद्धिस्तेषां भव
ति नान्यथा। जातकर्मकालमाह गार्ग्यः। जातमात्रकुमारस्य जातकर्म विधीयते। स्तनः प्रा

शनतः पूर्वं नाभिकर्तनतोपि च। एवमतीतेषु कालेषु शुभयोगे शुभोदये इति नांदीश्राद्धानंतरं जातकर्म कु
र्यात्। यावदन्यैर्मनुष्यैर्जातमपत्यं न स्पृश्यते। तावत्सर्वमेतत्कर्तव्यमिति भावः। तथा शौनकः। जातकुमार
जननादन्यसंस्पर्शनात्पुरा। स्नापयित्वा कुमारं च प्राङ्मुखं चोपविश्य ता।। कुमारस्यान्यास्पर्शनं ना
मप्रसवसमयोपयोगिन्यः स्त्रियो मुक्त्वा जातकर्मपर्यंतं पितुः पूर्वं अन्येन स्प्रष्टव्यः। तथाचार्यः। केवलं ताद नांदीश्राद्धानंतरं
स्त्रि मुक्त्वा पितुरन्यैस्तु शिशुः। न स्प्रष्टव्यः पुरा तावज्जातकृत्यादिति स्थितिरिति प्रतिज्ञाय। एकस्मिन्भाजने सर्पिर्मधुनी चैव समा
प्राणानायम्य कुमारसंस्कारार्थं जातकर्म करिष्ये इति प्रतिज्ञाय। एकस्मिन्शुद्धे कांस्यादिपात्रे
नयेत्। अथ घृष्य हिरण्येन संसृज्येरन् तु कार्य यथेति।।१७।। अस्यार्थः। एकस्मिन्शुद्धे कांस्यादिपात्रे
नयेत्। अवघृष्य हिरण्येन संसृज्येरन् लवण यथेति।।१७।। अस्यार्थः। ... इदं हिरण्येन स्रुवेणान्यतरेण वारंवारं घृ
सर्पिर्मधुनि। गव्यं घृतं शुद्धं मधु च असममानीयतत्तत्द्रव्यद्वयं हिरण्येन स्रुवेणानेकवारं वासं
घर्षयेत्। यथा हिरण्यपरमाणवः संसृज्येरन्। मिश्रीभावं प्राप्नुवंतीति शौनकोपि। मानतो विषमे कृत्वा सं
सृज्येम मधुसर्पिषी। सिक्ता सिलायां तत्रैव स्रुवर्णं बहुधा कषन्। मधुसर्पिः सवर्णानि मिश्री कृत्याथ
रेवलिकी। हिरण्येन कुमारं तं प्राशयेन्मधुसर्पिषी। प्रतेददामि मंत्रेण मातुरुत्संग आस्थितं इति।।१८।। मधु
सर्पिषी हिरण्येन गृहीत्वा तं कुमारं प्राशयेत्। तत्र मंत्रमाह। प्रतेददामीति मंत्रेण कीदृशं कुमारं मातु
रुत्संगे आस्थितं स्थापितं तं पिता प्राशयेदिति। मंत्रस्तु प्रतेददामि मधुनो घृतस्य स्यस्यादिकाम

Indira Gandhi National
Centre for the Arts

चं उक्त्वा तानि स्वर्णेनैव प्राशयेच्छिशूनीति। हिरण्यं दक्षिणे कर्णे निधायैतामृचं जपेत्। मेधां त इति स त
व्ये च निधायैतामृचं जपेत्। अस्यार्थः। तदेव हिरण्यं बालकस्य दक्षिणे कर्णे स्थापयित्वा एतामृचं जपे
३५ त्। मेधांत इति मंत्रं जपेत्। तत्र मंत्रः। मेधां ते देवः सविता मेधां देवी सरस्वती। मेधां ते अश्विनौ देवावाध
त्तां पुष्करस्रजाविति। तथैव तदेव हिरण्यं सव्येपि कर्णे निधाय मेधां इत्येतामेव ऋचं जपेत्। वृत्तौ तु तस्य कु
मारस्य मुखसमीपे आत्मनो मुखं निधाय जपति। सूत्रे उपनिधायेत्युक्तत्वात्। ऋक्त्रयेणास्य युगपदं
सावभिमृशेद्यथा प्रथमास्मिन्भवेतीद्रश्रेष्ठानीत्यपरा तथा ॥२०॥ तृतीया त्वस्मे प्रयंधीति कुमार्ये स्यादमंत्रक
मिति। अस्यार्थः। अथ ऋक्त्रयेण अस्य अंसौ युगपदभिमृशेत्। स्तनबाह्वोर्मध्यप्रदेशो अंस इति वृत्ति
कारः। अस्मे भवेत्यादि ऋक्त्रयं पठित्वा अस्य बालकस्य अंसद्वयमभिमृशतीत्यर्थः। इह तु शक्यते युगप
दंसौ स्प्रष्टुं प्रथम ऋक्। अश्मा भव परशुर्भवस्येषा। इंद्रश्रेष्ठानि द्रविणानि धेहीति द्वितीया अस्मे प्रयं
धीति तृतीया। अत्र बहुधा विप्रतिपन्नाः केचन सकृन्मंत्रं पठित्वा पर्यायेण अंसाभिमर्शनं वदंति। अन्ये
तु मंत्रविभागं कृत्वा अंसाभिमर्शनं कुर्वंति कथं। अश्माभवेत्यनेन दक्षिणमंसमभिमृशेत्। इंद्रश्रेष्ठा
न्यस्मे प्रयंधीति द्वाभ्यां सव्यमंसमभिमृशेत्। सूत्रे तु स जीव शरदः शतमिति इंद्रश्रेष्ठानीति ऋक्त्रय ३५
मध्ये इति करणान्मंत्रविभागो बलीयान्। अपरे तु सकृदेव मंत्रं पठित्वा अंसाभिमर्शनं वदंति। न च

मंत्रविभागः न च पृथगभिमर्शः एवं पक्षत्रये विद्यमाने पित्र्याणामपि पक्षाणामन्यतमं पक्षमवलं
ब्य कर्म कुर्वतो न दोषः सर्वेषां गमकत्वात्। तेनात्र त्रीन्मंत्रान्सकृदुक्त्वा युगपदेवोभावंसौ स्पृशेदिति भ
गवता भाष्यकारेणायं पक्षः परिगृहीतः। स एव सम्यगिति। एतच्च जातकर्म कुमार्यै अमंत्रकं भवति।
तच्चावश्यमेव कर्तव्यं तत्राह मनुः। अमंत्रिका तु कार्येयं स्त्रीणां विधिरशेषतः इति। मंत्रमस्मे भवेत्याद्यु
मुक्त्वांसौ युगपच्छिशोः। स्पृष्ट्वा तथेंद्रश्रेष्ठानि द्रविणान्यादिकामृचं। अस्मे प्रयंधीत्याद्यां च जपित्वांसौ
पुनः स्पृशेत्। इदं कर्म कुमार्याश्च सर्वं कार्यममंत्रकमिति। कुमार्या मधुसर्पिःप्राशने अंसाभिमर्शने
पि न मंत्रः तूष्णीमेव भवतीति केचन। पत्न्याः स्तनं प्रक्षाल्य इमं कुमार इत्यादि मंत्रं पठित्वा आयुर्व
र्चो यशो बलमिति प्रदक्षिणं स्तनं प्रदाप्य स्तनपानं कारयति। तदस्मिन्शास्त्रे नास्ति शाखांतरविष
यमिति ज्ञातव्यं। अत्र कुमारस्य मध्वादिपानस्य प्रयोजनमाहाचार्यः। गर्भांबुपानदोषाणामपनुत्यै
शिशुं पिता। प्राशयेन्मधुनाप्यर्थं साज्यं हेमरसं शुभं। स्वर्णेन कर्णयोर्युग्मस्पर्शितादेव तच्छिशोः। मं
त्र एव वृचयोग्यत्वं स्याच्च दुर्वासनः शुचिः। मंत्रालंभनमात्रेण शुचिः स्यान्मलवाससः। रक्षायुषोर्विवृ
ध्यर्थं माजिघ्रेति पिता स्फुटं। तावन्नामस्मरेत्तस्य स्तनं माता थ पाययेत्। प्राग्जानकर्मणो यस्मात्स्त

Indira Gandhi National
Centre for the Arts

२६

नपानंनशस्यतइति।इदमपिहोमपूर्वकंकुर्यादितिकेचिद्वदंति।तत्प्रकारमाहभगवान्।केचित्सहोमकमिदंक
र्मेच्छंतिमनीषिणः।तत्राकृत्वापुरस्तात्र्यमनादेशाद्भुतिस्ततः।हुत्वाग्निरिंद्रइत्यादिदेवतापंचकस्यच।पश्चा
त्कर्मेदमाचार्यास्ततःस्विष्टकृदादिकं।उपविष्टान्ततंतत्रकुर्वीदृश्चयथाक्रमामिति।जयंतोपि।येतुहो
ममिच्छंतितेनादेशाज्याहुतीर्हुत्वास्विष्टकृतःप्रागिदंकर्मकुर्वंति।ततःस्विष्टकृदादिहोमशेषंसमापृ
यंति पितुरन्योयःकश्चित्करोतिचेत्सःस्नात्वास्विष्टकृदादिसमापयेत्।जातकर्महोमेत्वग्निनिर्ण
यमाहसंग्रहकारः।जातकर्मादिसिध्यर्थंयोव्याहृतिभिराहृतः।सोग्निःपौरुषइत्युक्तःशालाग्निर्लौ
किकस्तयेति।अत्रपरिस्तृतिर्नित्या।अनादिष्टाज्यहोमेषुतत्रनित्यापरिस्तृतिरितिपरिभाषावचनात्।
जन्मकालेदातुर्दानफलातिशयउच्यतेतत्रवराहपुराणे।यावत्कालेकृतेजातेननालश्छिद्यतेनृपः।चं
सूर्यो द्रोपरागेणतमाहुःसमयंसमं।जननाशौचाभावमप्याहजैमिनिः।यावन्नछिद्यतेनालंतावन्नाप्नोतिसू
तकं।छिन्नेनालेततःपश्चात्सूतकंतुविधीयते।जन्मदिवसेप्रतिगृहीतुःप्रतिग्रहनिषेधाभावउ
क्तोव्यासेन।जातेकुमारेतदहःकामंकुर्यात्प्रतिग्रहं।हिरण्यधान्यगोवासःतिलाश्वंमधुसर्पिषां।। २६
इतिजातकर्म।। ।।अथनामकरणं।द्वादश्यांनामकरणंनांदीश्राद्धेकृतेभवेत्।पुंसांयुग्माक्षरा
णिस्युर्विपरीतानियोषितां।।२३।।अस्यार्थः।जन्मदिनमारभ्यद्वादशदिनेनांदीश्राद्धंकृत्वानामकर

णंकुर्यात्।उक्तंचमनुना।नामधेयंदशम्यांतुद्वादश्यांवास्यकारयेत्।पुण्येतिथौमुहूर्तेवानक्षत्रेवा
गुणान्विते।इतिव्यासः।नामधेयंदशम्यांतुकेचिदिच्छंतिसूरयः।द्वादश्यामपरेन्येतुमासपूर्णेतथा
परे।अष्टादशेहनितथावदंत्यन्येमनीषिणइति।प्राप्तकालेनिषेधमाहगर्गः।व्यतीपातेचसंक्रांतौ
ग्रहणेवैधृतावपि।श्राद्धंविनाशुभंनैवप्राप्तकालेपिमानवः।अन्यच्च।अमासंक्रांतिवृद्ध्यादौप्राप्त
कालेपिनाचरेत्।कुमाराणांयुग्माक्षराणिसमाक्षराणिस्युः।कुमारीणांतुअयुग्माक्षराणि।।पक्षेघो
षवदित्यादिरेवकारादनादतः।स्वस्यसमेदेवदत्तायब्रूतेतंब्राह्मणानुवदेत्।।२२।।नामाभिवादनीयंचापि
त्राह्यापनीतितइति।अस्यार्थः।घोषवदादिपक्षःसूत्रकारेणोक्तः।घोषवत्।अत्रप्रातिशाख्येवर्गाणांप्र
थमावर्णाद्वितीयऊष्मसंज्ञकाःहकारवर्ज्याश्चाघोषाः।शिष्टंघोषवदुच्यते।अस्यार्थः।प्रतिवर्गेप्रथमद्वितीय
वर्णाःऊष्मसंज्ञकाश्शषसहाश्चहकारंवर्जयित्वाअघोषवंतः।शिष्टंघोषवदुच्यते।अवशिष्टंवर्णजातंघोषवत्।आदिशब्दात्सक्षांतरे
कर्शवानामकर्तव्यमितिघोषवद्वर्णेजातंआदौयस्यनाम्नःतत्तथोक्तं।रुद्रदेवोभवइत्यादि।दर्शितं।अं
मपिघोषवदाद्यंतरंतस्थमभिनिष्ठानांतमितिसूत्रार्थः।घोषवदादिनामसमाक्षरंभवति।तथाचतुरक्षरंकर्तव्यंशिथरत्तः
तरिस्थेतमपिभवति।अंतःनाममध्येअंतस्थावर्णोयस्यपरउवाइति।अंतेयस्यअःइतीय
पुरंदरविनायकइतिपुनःकथंभूतंअभिनिष्ठानांतंअभिनिष्ठानोविसर्जनीयः।युग्मानित्येवपुं
थौत्रेवदर्शितंद्व्यक्षरंचतुरक्षरंवाद्व्यक्षरंप्रतिष्ठाकामःचतुरक्षरंब्रह्मवर्चसकामो

Indira Gandhi National
Centre for the Arts

सामयुजानिस्त्रीणामिति सूत्रार्थः। युग्मानि लेनेतु तत्र एवकारेण समाक्षरं नामनियम्येन। अत्र एवकार
अवधारणार्थः। न पूर्वाणि लक्षणानि। तस्माद्दोषवदादीत्यस्य अनादरो वा। त्वं जनार्दननामासि। ततो
२७ ब्राह्मणान्प्रति। अस्मै जनार्दननाम्ने कुमाराय स्वस्ति भवन्तो ब्रुवन्त्विति वदेत्। तथैव तेपि ब्रूयुः। ततो
व्यवहारार्थं नाम कुर्यात् नियमेन व्यवहारनाम्नि कृते सति अभिवादनीयं च नक्षत्रजं नाम कर्तव्य
मिति। यथाग्रे संध्यावंदनादौ अग्निं गुरूंश्च नमस्करिष्यति। अनेनैव नाम्ना येन नाम्ना उपनयनानं
तरं अग्न्यादिदेवताचार्यादींश्च अभिवादयति। तच्च समीहितं कुर्यादिति। तन्मातापितरावेव
विज्ञायेतां। केपि यथा न शृण्वंति तथा कर्तव्यं। व्यावहारिकं नाम कृत्वा अभिवादनीयं च कर्त
व्यं। तत्तु कस्यापि पुरतो वक्तव्यं न तत्राशीर्वचनं भवति। यथा व्यवहारनाम गृहीत्वा तस्मै जना
र्दननाम्ने स्वस्त्यस्त्विति तथात्राशीर्न भवतीत्यर्थः। तत्तु पित्रोर्हृदि आउपनीतितः उपनयनपर्यंतं
मातापितृभ्यामेव वदितव्यं। उपनीतस्य आचक्षते अनेन नाम्ना अभिवादयस्वेति। अत्र भगवान्। येनना
म्नोपनीतोसौ करिष्यत्यभिवादनं। तच्चास्मिन्नेव समये कर्तासौ नामकर्मणः। अभिवादननामेदम २८
स्य स्याउच्येत सा उपांशु निर्दिशेच्चैतन्न जानीयुर्यथा परे। तच्च नामोपनयने स्मरेतां पितरौ शिशोः।
स्त्रीणां तु अयुग्माक्षराणि नामधेयानि भवंतीति। यथा सुभद्रा सावित्री वसुदत्तादि नामानि भवंति

इदमपि कर्म केचित्सहोमकमिति ब्रुवते। तस्य सहोमप्रकारमाह भगवान्। अत्रापि होमवत्पक्षे जात
कर्मवदादितः। पुरस्तात्तंत्रमाचार्यः कृत्वा नाद्देश आहुतीः। ततस्तेनैव पुण्याहप्रकारेण यथापुरा। नामा
धिस्मिन्नाध्यायततः स्विष्टकृदादिकं उपरिष्टात्तंत्रं कुर्याच्चैव यथाक्रमं। कुमार्याश्चैवमखिलं
कर्म कुर्यादमंत्रकमिति। अस्मिन्कर्मणि गुरुमूढादिदोषो नास्तीत्याह बृहस्पतिः। प्रसूत्याः क्रिया सर्वा
क्तः कालो मासे दिनेरपि। तस्यां न दोषो मूढत्वं वक्रे वा जीवशुक्रयोः। मुहूर्ते संग्रहविशेषवक्तः। पूर्वा
ह्नः श्रेष्ठ इत्युक्तो मध्याह्नो मध्यमः स्मृतः। अपराह्णं च रात्रिं च वर्जयेन्नामकर्मणि। इति नामकरणं। अथ
निष्क्रमणं। चतुर्थे मासि पुण्यर्क्षे शुक्ले निष्क्रमणं भवेत्। स्नानं स्वलंकृतं चाभिहितस्वस्त्ययनं शिशुं। आ
दाय गेहान्निष्क्रम्य गच्छेयुर्देवतालयं। अभ्यर्च्य देवतां सम्यगाशिषो वाचयेत्ततः। कृत्वा प्रदक्षिणं गेह
मानयेत्ततः स्वकमिति। २५॥ अस्यार्थः। जन्मदिनमारभ्य चतुर्थे मासि पुण्यर्क्षे पुण्यनक्षत्रे शुक्ले
पक्षे अनुकूलदिने शिशोर्निष्क्रमणं भवेत्। तत्रायं विधिः। बालकस्य स्नानालंकरणादिकारयि
त्वा स्वस्तिवाचनपूर्वकं तं बालकं मातापित्रादयो ब्राह्मणपुण्यस्त्रीभिः सह गृहं निष्क्रम्य देव
तालयं गच्छेयुः। देवतां सम्यक् संपूज्य ब्राह्मणैराशिषो वाचयित्वा देवतालयं प्रदक्षिणीकृत्य ततः
स्वकं गेहमानयंति नीराजनादिकं लोकव्यवहारानुसारेण। मातृपक्षगृहे यद्वा मातुलादिगृहे

Indira Gandhi National
Centre for the Arts

नयेत्। तदाशीर्वचनाद्यैः स्याद्दीर्घायुरभिनंदितः॥२६॥ अयं तस्य मतेनायं लिखितः शिशुनिष्क्र
मः। अस्यार्थः। ततः मातृष्वसृगृहे मातृष्वसृगृहं प्रतिबालको नेतव्यः यद्वा बालकं मातुलादिगृहं न
३८ येत् तेषामाशीर्वचनाद्यैरभिनंदितः दीर्घायुः स्यादित्यादिकं मे प्रशंसा। अर्थात्पुनः स्वगृहानीय
यमहोत्सवं ब्राह्मणभोजनं च कुर्यात्। अयं शिशुनिष्क्रमः जयंतमतानुसारेण निरूपित इति। अत्र
भगवान्। सोऽमी चतुर्थे षष्ठे वा शिशुनिष्क्रमणं गृहात्। विदधीतास्य पित्रादी हितैषी पशुरक्षकः। पूर्व
पक्षे शिशोर्जन्मनक्षत्रानुगुणे शुभे। नक्षत्रे गुणसंपन्ने तिथिवारादिसंयुगे। स्नापयित्वा शिशुं पूर्वं भूष
यित्वा ततो द्विजान्। भोजयित्वा थ तृप्तैः स्तैः कृतपुण्याहवाचनं। निर्गमय्य गृहाद्देवं नीत्वाथो देवे
तालयं। गंधमाल्यादिभिस्तत्र पूजयित्वाथ देवतां। प्रणमय्य च तं बालं ततो देवालयस्थितैः। विद्वद्भि
र्ब्राह्मणैराशीर्वादाद्यैरभिनंदितं। परिगृह्य ततः स्थानान्निष्क्रमय्य ततः शिशुं। मातुलादेः समासत्रबं
धोः प्राप्य मंदिरं। तत्रोपहारदानाद्यैराशीर्भिश्चाभिलालितं। कुमारं परिगृह्यैनं प्रापयेत्स्वगृहं तत इति ३८
निष्क्रमणं॥ ॥अथान्नप्राशनं॥ अथ पुण्येऽह्नि षष्ठे तु मासेऽन्नप्राशनं भवेत्॥२७॥ कृत्वाभ्युदयिकं श्रा
द्धं दधिमध्वाज्यसंयुतं। अन्नं तं प्राशयेदन्नपतेऽन्नस्यादिमंत्रतः॥२८॥ क्रमयोगेन वान्नादि पक्षो
क्तं प्राशयेद्द्विजः। अमंत्रकमिदं कुर्यात्प्राशनं योषितामपि॥२९॥ अस्यार्थः। षष्ठे मासे पु

ण्यदिने अन्नप्राशनं कर्म कुर्यात्। अर्थ प्रातः स्वस्तिवाचनाभ्युदयिके कृत्वा दधिमध्वाज्यैः एतत्त्रयं
तमन्नं सुमुहूर्ते प्राशयेत् अनेन मंत्रेण स चायं मंत्रः अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः
प्रप्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे अनंतरं अमंत्रकं व्यंजनादीनि प्राशयेत् आ
जादिपक्षोक्तगृह्यगतं अजादिमांसप्राशनं गृह्योक्तं तत्तत्कामनया इदमत्र गृह्ये आजमन्नाद्य
कामस्तैत्तिरं ब्रह्मवर्चसकामो घृतौदनं तेजस्कामः क्षीरौदनं पशुकामः दध्योदनमिंद्रियका
मः दधिमधुघृतमिश्रमन्नं प्राशयेत्सर्वे कामो भवतीति। कुमारीणां तु अनेनैव प्रकारेण प्रा
शनं मंत्रवर्जं भवति। अत्र भगवान् जन्मप्रभृति षष्ठस्य मासेऽन्नप्राशनं शिशोः। प्रशस्तेऽहनि
मौहूर्ते विहिते शोभनेऽपि च मुहूर्ते ब्राह्मणानन्नदानाद्यैः प्रपूज्य च पुण्याहवाचयित्वा तेन
ऽर्घ्यपुष्पाद्यलंकृतैः उपविश्यासने शुभ्रे प्राङ्मुखं बालमंतिके अंके वा दधिमध्वाज्यमिश्रम
न्नं सुसंस्कृतं मंत्रेणान्नपतेऽन्नस्येत्यादिना प्राशयेत्सकृत्। यथेष्टं प्राशयेत् पश्चात्सौधये
न्नमुखं शिशोः इदं कर्म कुमार्याश्च सर्वं कार्यममंत्रकमिति। अन्नहोमपूर्वपक्षेण क्रमेणा

Indira Gandhi National
Centre for the Arts

हासएवहोमस्यापिविधानेनह्यनादेशाहुतिर्भवेदिति।अन्नप्राशनानंतरंजीविकापरीक्षाकर्तव्येतिमा
र्कंडेयप्रदर्शिता।अग्रतोथविन्यस्यशिल्पभांडानिसर्वशः।शस्त्राणिचैववस्त्राणिततःपश्येत्तु
३९ लक्षणं।प्रथमंयत्स्पृशेद्बालस्ततोभांडंस्वयंतदा।जीविकातस्यबालस्यतेनैवतुभविष्यतिइति।अं
नप्राशनस्यकालोनारदप्रयाहनारदः।जन्मतोमासिषष्ठेस्यात्सौरेणोत्तमंमंनदं।तदभावेष्टमेमासे
नवमेदशमेपिवा।द्वादशेवापिकुर्वीतप्रथमान्नाशनंपरं।संवत्सरेवासंपूर्णेकेचिदिच्छंतिपंडिताः।
शुक्रेमोढ्यादिदोषोनास्ति।।तिविधिरत्ने।बालान्नभोजनविधौगुरुशुक्रमौढ्यमासप्रसुक्तम्
शुभंनाधिमासदोषः।नास्त्येवसायनविधाविहमासिषष्ठेयुग्मेचमासिपरतःशुभचंद्रपक्षे।
दृश्यंनप्राशनं।। ।।अथचौलकर्म।।तृतीयेवत्सरेचौलंकुर्वीतास्योत्तरायणे।शुक्लपक्षेशुभर्क्षे
तुकृत्वाभ्युदयिकंतथा।।३०।।यथान्वयंवाकेशांश्छिंदुप्नोत्सासहेव्ययनेस्वस्त्यादिवाचयेत्स्ववेम
द्विमूर्तेषुकर्मसु।।अस्यार्थः।जन्मतआरभ्यतृतीयेसंवत्सरेचौलकर्मभवति।चौलमितिकर्मना ३९
मधेयंभवति।अस्यकुमारस्येतिसंबंधः।तृतीयेवर्षेसत्युत्तरायणेतत्रापिशुक्लपक्षेशुभनक्षत्रे

ज्योतिःशास्त्रानुकूलदिनेएतत्कर्मभवति।तत्पूर्वेद्युः।अस्यकुमारस्यश्वःकरिष्यमाणंचौल
कर्मांगभूतंअभ्युदयिकंकरिष्यइतिसंकल्प्ययथोक्तमाभ्युदयिकंकृत्वाअपरेद्युःकृतोपि
ताकृतमंगलस्नानःअर्थप्राप्तस्वस्तिवाचनंकारयित्वायथान्वयंकुलधर्मानुसारेणकोयं
कुलधर्मानुसारइतिकेषांचिन्मतेउपनीत्यासहउपनयनकर्मणासहचौलंभवति।यस्मिन्
पक्षेचौलमुपनयनंचयुगपद्भवति।तत्रचौलंकृत्वाउपनयनंभवति।तत्रपूर्वंस्वस्तिवाचनंवि
हितः।कृतिपूर्तेषुकर्मसुभवति।वृद्धिमंगलंतेनपूर्तानिपारपूर्णानितेषुकर्मसुस्वस्तिवा
चनंभवति।तस्मिन्नेवकालेस्याद्वतस्नानोपनायनं।।३१।।अन्यत्रापिविवाहोस्यादितिसूत्र
कृतोमतमिति।अस्यार्थः।एतस्मिन्नेवकालइतिउदगयनआपूर्यमाणपक्षेकल्याणेनक्ष
त्रेमहानाम्न्यादिगोदानांतानिचत्वारिवेदव्रतानिसमावर्तनोपनयनेचकुर्यात्।वर्षनियम
स्तुभिन्नः।यथाअष्टमेवर्षेब्राह्मणमुपनयीतेतिमन्यात्।अत्रगृह्यं।उदगयनेआपूर्यमा
णपक्षेकल्याणेनक्षत्रेचौलकर्मोपनयनगोदानविवाहाइति।एतत्कर्मलौकिकाग्नावौपासन स

Indira Gandhi National Centre for the Arts

ऽयो वा भवतीति संदेह आह। चौलकर्मोपनयने विवाहः प्रथमस्तथा। आतानि स्नानमित्येषां लौकिका
प्रभवति स्थितिरिति॥३२॥ अस्यार्थः। चौलं उपनयनं आदौ विवाहश्च यदा च द्वितीयं विवाहं
४० करोति विद्यमानभार्यः तस्मिन्नेव गृह्याग्नौ कुर्यात्। व्रतानि महानाम्न्यादीनि स्नानं समावर्त
नं येषां कर्मणां लौकिकाग्नाविति स्थितिरिति। व्रीहिपूर्णशरावं स्याद्यवपूर्णं तथापरं। माषपूर्णं
तथान्यस्यात्तिलपूर्णं तथापरं। एतानि च शरावाणि न्यसेदुत्तरतोऽनलादिति॥३४॥ अस्यार्थः॥
पूर्णपात्रविधानानंतरं एतानि चत्वारि शरावाणि व्रीहियवमाषतिलपूर्णानि शरावाणि कृत्वा
एकं शरावं व्रीहिपूर्णं अपरं यवपूर्णं अन्यत् माषपूर्णं चतुर्थं तिलपूर्णमिति। एतानि चत्वारि शि
रावाणि अनलात् अग्नेरुत्तरदेशे क्रमेण स्थापयेत्। ततः किं कुर्यादित्याह। कुमारं मातुरुत्संगं
आरोप्य प्रत्यग्वद्विभुजः। अस्यार्थः। मातुरुत्संगे कुमारः [illegible] भुजः प्रत्यगग्नेः पश्चिमभागे निधेत्।
अत्र चौलकुमारस्य प्राधान्यमिति कुमारस्यैव सूत्रकारिकायामपि अग्नेः पश्चिमभागे उपवे ४०
शनं। यतः कुमारप्रमुखं हि चौलमपि। कुमारस्य मातुरुत्संग आरोप्य। अथानडुहमन्यस्मिं

च्छरावे गोमयं क्षिपेत्।३५। शमीपर्णानि चान्यस्मिन्नुत्सो मातुः समीपत इति। अस्यार्थः। अनंतरमु
पवेशनानंतरं अन्यच्छरावद्वयं मातुस्तथा कुमारस्य समीपे अग्रतः स्थापनीयं। एकस्मिन् शरावे आनडु
हं गोमयं अभूमिस्पृष्टमिति शानको वृषभसंबंधि गोमयं क्षिपेदिति स्थापयेत्। अपरस्मिन्पात्रे शमी
पर्णानि शमीपत्राणि स्थापयेत्। मातुर्दक्षिणतो ब्रह्मासनं सपवित्रं च।३६। कुशपिंजूलान्मातुर्गृही
त्वास्ते पिता तथवा। कुर्यादाघारपर्यंतं माज्यसेकादि पूर्ववत्।३७। इदमादौ विवाहे तेनैव आज्यभागका
त्रिति। अस्यार्थः। कुमारस्य मातुर्दक्षिणभागे ब्रह्मा तिष्ठतु। यद्यस्ति ब्रह्मा तदा कुशपिंजूलकानां सप्तक
त्रयं एकविंशतिं गृहीत्वा आस्ते तदभावे पित्रा वा कुशधारणं कार्यं। ततः आज्यसेकादि आज्यसेकान्तमआ
ज्यपात्रे आज्यप्रक्षेपः ततादिकं कर्म आज्यसेकादि भवति। आघारपर्यंतं पूर्ववत्कुर्यात्। अत्र कर्मसु आज्य
भागेन कार्यं इदं चौलमादिभूतं कृत्वा विवाहपर्यंतं नैवेष्टेन समंतो। इतरत्र कृताकृतो। अत्र चौलादौ
पक्षेपि न भवति। इत्यतो प्रधानो हीति वक्तुमाह। अग्न आयूंषीति तिसृभिः प्रजापतय इत्यृचा।३८। स्रु
वेणाज्याहुतीर्हुत्वेति अस्यार्थः। अग्न आयूंषीति तिसृभिर्ऋग्भिः प्रजापतय इति ऋचा चास्रुवेणैव द्रव्य
होमसाधनेन एताश्चतस्र आज्याहुतीर्हुत्वा शीतोष्णांभस्य थानयेत्। पश्चात्स्थित्वा कुमारस्य शी
तोउष्णा च आपः।३९।। पाणिभ्यां भाजने तस्मिन्युगपन्निनयेदथ। उष्णेन वाय उदकेनेहीत्यनेनमंत्रेण
दिति।४०।। अस्यार्थः। अथ हवनानंतरं एकस्मिन्पात्रे शीतोदकं अन्यस्मिन्पात्रे उष्णोदकं पाणिभ्या

Indira Gandhi National
Centre for the Arts

गृहीत्वा आनयेत्। यच्च प्येन पात्रप्रदेशपादानांतं कृत्वा तथाप्यत्र द्रव्यद्रव्यस्याधारमंत्रेणायं न
४१ न संभवतीति। आधारत्वेन पात्रापेक्षायां शिष्टव्यवहारसिद्धत्वाय वलितेदृ हरिद्राघलेके
नेमृत्साद्येन तत्तदुक्तमुदकं गृहीत्वा केनचित्कर्मकुशलेन गृहीतेऽन्यस्मिंस्तथा अलंकृ
ते पात्रे तृतीयेपात्रांतरे युगपदेव पाणिभ्यां गृहीत्वा क्षिपेत्। मंत्रं पठित्वा तृतीयपात्रेशी
तोष्णकोदप्रक्षेपः केन मंत्रेण उष्णेन वायउदकेनेहि। एतावंमंत्रेणक्षिपेत्। अने
न मंत्रेण उदकनिश्रयनं भवेत्। एकदेशं गृहीत्वा सोनवनीतं च वे तसः दध्नोर
समुत्पादनेन। स्तोच्चे नवनीतकं॥४१॥ प्रदक्षिणं कुमारस्य शिरस्त्रिः क्लेदयेदथ।
आरभ्य वामतः कर्णप्रदेशात्क्लेदनं भवेत्॥४२॥ स्याच्चेत्सदृ हितिः केशान्चपाक्षिया
हिमंततः। निदध्यादोषधेस्तायस्वैनामित्यस्यु दक्षिणे केशपक्षे कुमारस्य हृदयेतत्कु
शत्रयं इति॥४३॥ अस्यार्थः। ततः पिता स्वस्थानउपविश्य। शीतोष्णजलपूर्णपात्रं भूमौ नि ४१
क्षिप्य पात्रस्थितानामेकदेशं गृहीत्वा दक्षिणपाणिना गृहीत्वा कस्मिंश्चित्पात्रे स्थापितं नव
नीतं च सहैव गृहीत्वा कुमारस्य शिशो वामतः कर्णादारभ्य प्रदक्षिणं त्रिः क्लेदयेत्। आ

र्द्रं कुर्यादित्यर्थः। नवनीताभावे तु नवनीतस्थाने दध्नो रससमुत्पादितरससिक्तवस्त्रपीडनेन भवति।
कथं क्लेदनं भवेत्तदेव कणोति मंत्रेण क्लेदयेत्। आदितिः केशान्वपतापउदं तु वर्चसइ
त्यनेन मंत्रेण क्लेदनं स्यात्। एवंवारत्रयं मंत्रवेत्या क्लेदनं संपाद्य ततः पाणिस्थकुशसप्त
कत्रयमध्ये कुशत्रयं गृहीत्वा अस्य कुमारस्य दक्षिणे दक्षिणकर्णसमीपस्थे केशपक्षे
केशपक्षोनाम कर्णसमीपमूलप्रदेश उच्यते। तत्र कुशत्रयं हृदयाग्रं यथा स्यात्तथा कर्ण
मूलप्रदेशस्थापयेत् कुशात्रसंस्थापयेत्। पिंजूले क्षुरन्यस्य स्वधितेमैनं हिंसीः॥ अथपी
उयनीयथ क्षुरस्ताम्रमयो भवेदिति॥४४॥ अस्यार्थः। तत्रस्थेषु कुशेषु स्वधिते मैनं हिंसी
ति रिमंत्रेण ताम्रमयं क्षुरं न्यसेत् स्थापयेत्। सूत्रे तु निष्पीडयेति पदं वर्तते तस्यार्थं शृणोति।
पिंजूले क्षुरस्थापनं सूत्रगतस्य पदस्यार्थ इत्यपेक्षायां अवपीडयतीत्यर्थः। अस्यसूत्रग
तपदस्य अयमर्थः। क्षुरस्ताम्रमयो भवति। वपनपर्यंतं पात्रासादसमये तस्य क्षुरस्य न
न आसादनं कर्तव्यं। यत्तु सूत्रे लोहितेन क्षुरेण प्रच्छिनत्तीति तत्र वलिकारणलोहशब्दस्ता
म्रे वर्तते रजतादिषा पिवर्तत इति कृत्वा अपूर्वार्थता ताम्रमयो गृह्यते। अत्र विषये विशेष

Indira Gandhi National Centre for the Arts

माहदुरुशिष्य:। क्षुरस्य निर्यं लोहत्वात्ताम्रत्वाये हलोहगी:। गृह्यांतरे षुबकुषुक्षुरं ताम्रमयोय
त:। ततः क्षुरस्थापनानंतरं किं कर्तव्यमित्याह। येनावपदिति छिंद्या। छिंद्यान्नाग्रकान्कुशा
४२ न्। एकीकृत्य शमीपर्णे स्ताश्चमातु प्रयच्छति।४५॥ छेदनं तु सकेशानां पिंजूलानां भवेदिह।
निदधाति च सामाता तानानडुहगोमये॥४६॥ अस्यार्थः। येनावपदित्यादि मंत्रं पठित्वा सके
शान्कुशांछित्वा नागग्रकान्केशांश्च शमीपत्रैः सह एकीकृत्य कुमारमातुर्हस्ते दत्वा सा च अनडुहे
गोमये स्थापयति। पूर्ववत्कुशपिंजूलनिधानादि समं भवेत्। येन धातेति मंत्रो यं छेदने तु विशेष्य
ते॥४७॥ तृतीये च चतुर्थे च पिंजूलादि समं भवेत्। तृतीये येन भूयश्च चतुर्थे छेदनं त्रिभिः॥४८॥ ए
वमेवोत्तरे पक्षे त्रिरेवं छेदनं भवेदिति। अस्यार्थः। कुशपिंजूलनिधानादि पूर्ववत्कृता। अनेनैव प्रका
रेण पुनरेतत्कर्म समं भवति। छेदने मंत्रविशेषः। इतरत्सर्वं समानं। द्वितीयछेदने येन धातेति मंत्रेण
भवति। तृतीयछेदनेपि कुशपिंजूलादि निधानं समं भवति। तथा चतुर्थछेदनेपि। तृतीयछेदने तु येन
भूयश्चेत्ययं मंत्रो विहितः। चतुर्थछेदने तु त्रयोपि पूर्वोक्ता एव मंत्रा भवंति। एवं दक्षिणकृत्यं समा
प्य वामकेशपक्षे तथैव कुर्यात्। तत्र वामकेशपक्षे चतुर्थछेदनं नास्ति। अर्थान्मंत्रपाठो नास्ति। यत्क्षु ४२
रेणेति मंत्रेण क्षुरधारां निमृज्य च॥४९॥ आरभ्यांते आमूलप्रदेशांतं निमार्जनमिति॥ अस्यार्थः।

ततः यत्क्षुरेणेति मंत्रेण क्षुरधारामार्जनं भवति। अग्रत आरभ्य मूलपर्यंतं मार्जनं भवति। तन्मार्ज
नं पिता करोति। अंगुष्ठतर्जनीभ्यामिति शिष्टाचारः। तथा च शिलायां मार्जनमिति केचित्। शीतोष्णा
भिरिति प्रैषेणानुशिष्याच्च नापितं। ततः स्विष्टकृदाद्येतस्यात् कुमार्या अमंत्रकमिति अस्यार्थः।
शीतोष्णाभिरित्यादिकेन प्रैषेण नापितं वपनं कर्तारं। अनुशास्ति आज्ञापयति। ततः वपनानंतरं मंग
—लद्रव्यैः स्नापयित्वा यथापूर्वं समीपे उपवेश्य अनंतरं स्विष्टकृदादि पर्युक्षणांतं एतत्कर्म भव
ति। कुमार्यास्तु एतत्कर्म मंत्रवर्जं सर्वं भवति। व्रीह्यादिपूर्णान्येतानि नापिताय प्रयच्छति॥५१॥
शिखाश्च अपि कुमारस्य कर्तव्या ऋषिसंख्यया इति। अस्यार्थः। व्रीह्याद्यैन पूर्णानि चत्वारि पात्राणि ना
पिताय दत्वा अन्यदपि स्वविभवानुसारेण तं नापितं प्रेषयेत्। अस्य कुमारस्य शिरसि तत्र तत्र स्था
ने कुलाचारानुसारेण केशरक्षणं। एकशिखास्त्रिशिखः पंचशिखो वेति बौधायनः। केषांचिद्द्वौ
त्र्यवरद्वयं केषांचित्त्र्यवरत्रयमिति कुलधर्मे केशवेशान्कारयेदिति। अत्र केशवेशत्वं नाम कुमा
रा शिरसि तत्र तत्र स्थाने कुलाचारानुसारेण केशरक्षणं। गृह्येत्साचते कुमार्ये। अस्यार्थः। अवृताअ

Indira Gandhi National
Centre for the Arts

मंत्रकमित्यर्थः। आवृन्मात्र एव भवति न मंत्र इति। आवृन्मात्रं नाम तूष्णीं भवति। एतत्सर्वं कर्म एवं बसाति क
न्या विषये अमंत्रक होमो प्रसज्येत। अमंत्रकस्य होमस्य क्वचिदपि अदृष्टत्वात्। ननु द्वितीये उभयत्रे
४३ स्यव द्दष्ट इति शंका न कार्या। तत्रापि हि प्रजापतये स्वाहेति मंत्रोस्त्येव तस्माद् अत्र सर्वं कर्म मंत्रवर्जं नि
भवतीति। सिद्धं। अत्र भगवान् पूर्वं फरा भ्युदयिकं श्राद्धं कृत्वा परेहं स्नानं बालमलं कृत्य पुण्याहं वा
चयेद्द्विजैः। ततः कौतुकमाबध्य मुहूर्ते शोभने नलं। प्रतिष्ठाप्योत्तरे तस्माद् दर्भानास्तीर्य तेष्वथ। नूतनानि
शरावाणि चत्वारि व्रीहिभिर्यवैः। माषैस्तिलैश्च प्रत्येकं पूरितान्येकशः क्रमात्। प्राक्संस्थं सादयेत्त
त्र यथालाभे तु गतमैः। व्रीहिभिः पूरियेत्पात्रं प्रसङ्गे शोततोन लाभेतु। सन्येकृते चौलकृतः समीपजन
नीशिशोः। अंकेनबिभ्रती पुत्रमासीनत्नात्रा द्युमुखी सती। तस्याः पुरस्तादग्नेश्च पश्चादानडुहं शकृत्। अस्म
स्म दृम्भूमिविन्यस्य शरावे सादयेत्ततः। शमीपर्णानि वान्यस्मिंश्शरावेन्य सम्भृतले। तत्रे वसादये द्देशे शकृसोत्तरस ४३
पार्श्वतः। ततः कुमारस्य पिता हस्तैर्बिभ्रत्कुशांकुरान्। एकविंशति मासीनरिशशोर्मातुश्च दक्षिणे। पुतु
रन्यो भवेद्यास्य क्षे स्मिं चौलकृन्नरः। ब्रह्मत्वेन हि यो विप्रो धारयेद्धा कुशांकुरान्। अस्मिन्पक्षे पितेवा

स्फ कर्ता चौलस्य कर्मणः। अत्रैव समये कुर्यात्स्फरस्यापि परिग्रहं। अन्वाधानाद्यनूयाजनिधानांतं पुर
स्तनं। तंत्रं कृत्वा निषद्येतं दक्षिणे शुचिमात्मनः। अन्वारब्धो विधायेध्मनिधानादिपुशोषितं। पुराकृत्वा
ज्यभागो च प्रधानाहुतिमाचरेत्। तत्राघ आयुर्षी त्याद्येर्जुह्वा मंत्रैस्त्रिभिः पुनः। प्रजापते त्वदेवाथ्याहृ
तित्रितयेन वा। व्यस्तेनाथो समस्तेन क्रमेण जुहुयादथ। बालस्य प्रत्यगासित्वाशीतोष्णे वारिणी पृथक्।
न पात्रद्वयस्थे आसिक्ते हस्ताभ्यामन्यभाजने। उष्णे वाय इत्यादि मंत्रेण स्थाप्यतत्पुनः। नवनीतेन दध्ना वा संमिश्री स्य
कृत्य पाणिना। समादीयादितिः केशान्वपत्वित्यादि मंत्रतः। शिरो वा मकर्णांतमारभ्या त्रिः प्रदक्षिणं। उंदेस्य
त्सु उंदनमंत्रं पुनः पुनरुदीरयेत्। दक्षिणे केशपक्षे थ बालस्य त्रीन्कुशांकुरान्। बालाभिमुखपर्यंतान्पाठि
त्वा मंत्रमोषधे। त्रायस्वैनमिति न्यस्येदन्यमंत्र पृथक्कृतान्। उच्चार्य मंत्रं स्वधिते मैनं हिंसीरिति क्षुरं।
संधाय सांकुरैः केशैः तद्येनावपदादिकं। यथास्यादिति पर्यंतं मंत्रमुच्चार्य खेलिकं। प्रछादितां शमीपर्णैः संयो
ज्य च कुशांकुरान्। प्राक्तूलकेशान्बालस्य तस्य मातुः करो दिशेत्। सा च तां निक्षिपेत्सर्वांश्शकृत्यानडुहे स
ह। अनेन विधिना कुर्याद्द्वितीयं केशकर्तनं। मंत्रस्कयेन धातादिः कृतनेत त्र मन्यते। पुनस्तथैव कुर्वीत

Indira Gandhi National
Centre for the Arts

तृतीयं केशकृंतनं। मंत्ररूपेण भूयश्च तंत्रं पूर्ववदाचरेत्। पूर्वोक्तमंत्रत्रितयं क्रमेणोपसमाचरेत्। चतुर्थं कृंत
नं कुर्यात्सावधानमतंद्रितः। एवमुत्तरतः केशाः पक्षे पिछेदनत्रयं। कुर्यादादित आरभ्य न चतुर्थं समाचरेत्॥ मं
४४ त्रं तु यत्क्षुरेणेति प्रक्रांतं समुदीर्य तु। क्षुरस्य धारामुपरिष्टादारभ्याभः परामृशेत्॥ वप्तारमनुशिष्येनं मंत्रेणोचाप र्यं
बोधयेत्। वप्ताथ तोयैः शीतोष्णैः पूर्वसेकावशेषितैः। बालस्य सकलान्केशानार्द्रकृत्यार्द्रपाणिना। वंशावा
रक्रमोपेतां शिखां। कृत्वा वपेच्छिरः। अथो गतकेशं स्नातं तमुपवेश्य यथा पुरा। आरभ्यास्विष्टकृद्धोममूर्ध्वतं
त्रं समापयेदिति। एतच्चौलकर्मेतानामभीप्सां। संस्काराणां फलमाह। याज्ञवल्क्यः। एवमेनः शमं या
ति बीजगर्भसमुद्भवमिति। अत्र चौलकर्मणि निवृत्ते तद्दिनेनद्धहे मोकुः प्रायश्चित्तमुच्यते। पाराश
रप्रायश्चित्तकांडे। निवृत्ते चूडहोमे तु प्राङ्नामकरणात्तथा चरेत्सांतपनं भुक्त्वा जातकर्मणि चैव
हि। अतोन्येषु तु भुक्त्वान्नं संस्कारेषु द्विजोत्तमः। नियोगादुपवासेन शुध्यते निंद्यभोजनात्॥ इति चौ
लकर्म॥ ॥अथोपनयनकर्म। ब्राह्मणस्योपनयनमुक्ते काले भवेद्यथा॥ ५३॥ कृत्वाभ्युदयिकं श्राद्धं पू ४४
र्वेद्युर्वा परेहनि। अस्यार्थः। उक्तकाले इति अष्टमे वर्षे ब्राह्मणमुपनयेत्। गर्भाष्टमे वेति गृह्योक्तकाले

भवति। गर्भप्रभृत्यष्टमे वोपनयेत्। तत्रादौ पूर्वेद्युः। अर्थान्मंडपतले स्वस्तिवाचनपूर्वकं नांदीश्राद्धं कुर्यात्।
तत्रेयं प्रतिज्ञा। अस्य कुमारस्य वेदाध्ययनाधिकारार्थं श्वः करिष्यमाण उपनयनांगभूतं स्वस्तिवाचनं त
थैव नांदीश्राद्धं कुर्यात्। उपनयनं नाम सावित्र्या ब्राह्मणमुपनयीतेति कात्यायनः। संस्कारेण बटुराचार्यादि
समीपं नीयते येन तदुपनयनं करणकारकमिदं गुर्वादिसमीपनीतिरुपनयनमिति भावसाधनं। हरदत्तस्तु।
पितृकुलाद्विविधवदाचार्यकुलप्रापणं शिरोरूपनयनमिति प्रणीतवान्। कवपरिशिष्टकारस्तु। ज्यो
तिर्विदुक्तसमये कुमारमुखदर्शनं। उपानयं तु तं प्राङ्कुर्याज्ञिकास्तत्त्वदर्शिन इति। अत्र भगवान्। पूर्वेद्यु
रेव सकलान्संभारांश्च यथोचितान्। संभृत्याभ्युदयिकश्राद्धमपि कुर्याद्यथाविधि। नानेव स आहा तत्रा
दौ परिधानार्थं कल्पयेन नववस्त्रकं। शिरोवगुंठनं चैव नवमन्यत्प्रकल्पयेत्। यथोक्तमजिनं वापि कल्पये
द्वगुंठनं। उपवीतं च संपाद्य तथा कृष्णाजिनं मृगाजिनं। यथोक्तमेखलां दंडं यथोक्तं च प्रकल्पयेत्। एवं
संभृत्य संभारान्पूर्वेद्युश्च यथोदितानिति। अपरेद्युः कृतं स्नानमंगलं कुर्यादाशिषो वाचयेद्यथोति
॥५२॥ अस्यार्थः। कृतमंगलस्नानं तादृशं कुमारमलंकुर्यात्। आशिषो वाचयेत्स्वस्तिवाचनं कारयेत्॥

Indira Gandhi National
Centre for the Arts

भगवानपि। अपरे ष्फः कृतस्नानभूषणस्वस्तिवाचनमिति। भुक्तभोज्यस्याशिरसो वपनं स्नानमेव
च। एवंभूतं कुमारं तमुपस्थाप्यांतिके तनः॥५४॥ ज्योतिःशास्त्रविदुक्ते तु मुहूर्ते शोभने तनइति।
४५ अस्यार्थः। भुक्तभोज्यं येन सः भुक्तभोज्यस्तस्य यथेष्टभुक्तवचनं तादृशस्य कुमारस्याशिरसो वप
नं। यदि चौलकर्म उपनयनं कुलधर्मानुसारेण उभयमपि कर्म युगपदेव क्रियते। तदा आदौ वि
हितं चौलकर्मांगत्वेन वपने सिद्धेपि ततः क्रियमाणमुपनयनांगत्वेन वपनस्यावश्यकत्वं। चूडा
कर्मणि यस्के शबेषधारणं क्रियते कुलधर्मानुसारेण तदिह नास्ति इयान्। विशेषः तत्स हे भुक्तवंतं
वापितत्रारसं मंगलद्रव्यैः स्नापयित्वा कौपीनादिकं परिधाय तिलकं कृत्वा। एवंभूतमलंकृतं कु
मारं अंतिके समीपे अर्थाद्धामप्रदेशे उपविश्य। अग्ने दक्षिणत उपवेशविधानात्। ज्योतिर्विदुक्ते
शुभसमये बालकः समीपे स्थाप्यः। यथा विवाहे शुभलग्ने निरीक्षणं। एवमुपनयने समीपो
पवेशनं शुभलग्ने कर्तव्यं। तथा चजयंतः। अपरे ष्फः स्नानमलंकृतमभिहितस्वस्तिवचनं भुक्त ४५
वंतं वापितशिरसं पुनरपि स्नातं कुमारमेव स्थाप्य ततः शोभने स्व मुहूर्तेनेति। भगवान्। कृतकौतु

कबंधं च कुमारं कृतभोजनं। उप्तोत्तमांगं भूयोपिनीतमात्मसमीपतः। संनिधाय गुरुः पाण्यां मुहूर्ते
पुनः स्नानमिति। आज्यसंस्कारपर्यंतमुपलेपादि पूर्ववत्। परिधानं भवेदस्य वाससेवाहतेन तु।
भवेत्प्रावरणं वासः कृष्णाजिनमथापि वा॥५५॥ एवंभूतं कुमारं तं कुर्याद्यज्ञोपवीतिकमिति॥ अ
स्यार्थः। ततः शुचिरपि कर्मांगं द्विराचम्य कुशास्तृते आसने उपविश्य प्राणानायम्य तिथ्यादि
स्मृत्वा अस्य कुमारस्य सम्यग्ब्राह्मण्यं वेदाध्ययनाद्यधिकारसिध्यर्थं द्विजता सिध्यर्थं च उप
नयनकर्मणि होमं करिष्य इति संकल्प्य स्थंडिलोपलेपनादि पूर्ववत्कुर्यात्। आदिशब्देन उल्ले
खनपरूपात्रासादनादि आज्यसंस्कारपर्यंतं कृत्वा ततः। परिधानार्थं सदशमहतं धौतं नवं व
स्त्रं गृहीत्वा तं परिधाप्य अन्यदपि अहतं प्रावरणार्थं दद्यात्। कृष्णाजिनं प्रावरणार्थं अत्रैव
सनं ब्राह्मणके चन काषायं वसनमंगीकुर्वंति। एवं प्रावरणानंतरं मंत्रवद्यज्ञोपवीतं दद्यात्
जयंतः उपलेपनाद्याज्यसंस्कारांतं करोति। अथैनं पाकं वस्त्रं परिधाय अच्छिन्नेन वस्त्रेण
वा कृतप्रावरणं दक्षिणं बाहुमुद्धृत्य शिरोपिधाय वा सोसे प्रतिष्ठाप्य यतीति वचनात्। एवं

Indira Gandhi National
Centre for the Arts

भूतं प्राङ्मुखमवस्थाप्य यज्ञोपवीतिनं कृत्वा यथाशास्त्रमाचमयतीति । अत्र भगवान् । तत्रं कृत्वा
ज्यसंस्कारपर्यंतमवधानतः अथोत्थाय गुरुर्वह्नेः पश्चात् स्थित्वा माणवं प्राङ्मुखमवस्थाप्य परिधा
५६ प्यैकमंबरं । अथास्य दक्षिणकरं किंचिद्दीर्घं प्रसारितं स्थापयित्वा द्वितीयेन वाससा वाजिनेन वा
अवगुंठ्य ततः स्तस्य करस्याग्रं वंगुठिते निक्षिनिप्य । ब्रह्मसूत्रं तु वितत्याः प्रसार्य च । वामांसे
स्थापयित्वैतत्तथा कृष्णमृगाजिनं । शिरोवेष्टं गुरुमुपरि निक्षिप्योपनिधाय च । ततः शास्त्रोविधि क
नायत्नेनाचमयेदपइति । आचांतमुत्तरेणाज्यं यज्ञपात्राणि चानयेत् । ५७ ॥ अंतरेणाग्निमा
गा स्मानं दक्षिणे रूपवेशयेत् । बर्हिरास्तरीं दिस्यात्स्रुवसम्मार्जनादिकं । ५८ । अस्यार्थः । यज्ञोपवीतधारणानं
तरं कृताचमनं माणवकं आज्यं च यज्ञपात्राणि आनयेत् । आज्यं यज्ञपात्राणीति षष्ठ्यर्थे द्वितीया । आज्यस्य
यज्ञपात्राणां च उत्तरेण उत्तरदिग्भागेन माणवकं आनयेत् । पुनः अग्निमात्मानं चांतरेण अग्नेरात्मनश्च अंत ४६
रेण नयेत् । तं माणवकमानीय आत्मनः दक्षिणभागे उपवेशयेत् । अत्र सर्वत्र द्वितीया षष्ठ्यर्थे ज्ञातव्या । एतदुत्त
रतो गत्वा दक्षिणत उपवेशनमपूर्वायां तथा च वृत्तौ उत्तरतः उत्तरभागाद्ब्रह्मचारी तु तीर्थेन प्रविश्य आचा

एतस्मिन्

र्यस्य दक्षिणत उपविशेत् । तीर्थेनाम प्रणीता पश्चिमदेशः तु स्यात् एवार्थः । यज्ञपात्राणां पश्चिमदेशेन प्रवि
श्य आचार्यस्य दक्षिणत उपविशेदिति । ततः बर्हिरास्तरणं । अनलोत्सस्य गास्तीर्य बर्हिरास्तरणादिकमिति । स्रु
वसम्मार्जनं तत्पूर्वं यत्तु चाज्यं तत् आचांतकुमार माज्यं यज्ञपात्राणि चांतरेणाग्निमात्मानं चांतरेण दमायत्वाथ
त्मानो दक्षिणत उपवेशयतीति । तथा च शौनकः । आचांतवंतमाज्यानि यज्ञांगादुत्तरेण तं नीत्वा माणवमाचार्य
वह्निं चात्मानमंतरागमयित्वात्मनः पार्श्वे दक्षिणे चोपवेश्यतमिति । समन्वारब्धे ब्रह्मचारिण्येवेत्तरतः कुर्या तु
दाघारपर्यंतं चोक्तो ज्याहुतीरपि । ५९ ॥ आज्यभागौ नैवेद्याविकल्पं पूर्वमेव तु । अग्रेस्तरतस्तिष्ठदाचार्यः
प्राङ्मुखस्ततः । अकुर्वन्नात्मनोग्नेश्च व्यवायं गच्छतीतरः । आचार्यस्य पुरस्तात्तु तिष्ठेत्तस्य प्राङ्मुखस्ततः । ६१
अव्यवायस्तु संस्कारकर्मस्वग्निकुमारयोरिति ॥ अस्यार्थः । स्रुवसंमार्जनानंतरं एतस्मिन्ब्रह्मचारिणि
समन्वारब्धे सति दक्षिणबाहुलग्ने सति । यत्र यत्र अन्वारब्ध पदं तत्र दक्षिणबाहुसंलग्नेन भाव्यं । अथानंतर
मितरः आचार्यः । अघारपर्यंतं अग्निमुखे कृते सति । ततः चोक्तो अष्टस्राष्ट्रपीत्याद्याः च तस्रः आज्या
ज्याहुतीर्जुहुयात् । आज्यभागानंतरं । ततः आचार्यः अग्नेरुत्तरदिग्भागं गत्वा प्राङ्मुखः सन् तिष्ठेत् । इत
रो ब्रह्मचारी आत्मनः अग्नेश्च व्यवायं व्यवधानमकुर्वन् गच्छति । अग्निना सह ब्रह्मचारिणः अंतरं न कार्यमिति
आचार्यप्रदक्षिणीकृत्य नगच्छेदित्यर्थः । अग्रे आचार्यस्य मध्यात् गत्वा प्राङ्मुखः सन् आचार्यस्य

Indira Gandhi National
Centre for the Arts

पुरतास्तिष्ठेत्। अग्निकुमारयोः संस्कारकर्मस्थ। अव्यवायः अपश्य॥ न दूरास्थितरित्यर्थः। जयंतः। अथो
४७ पविष्टेतस्मिन्परिधिपरिधानादिकृत्वा समन्वारब्धे कुमारे इध्माधानादि प्रधानाज्यंतं करोति। तत
उत्तरतोग्नेराचार्यः प्राङ्मुखस्तिष्ठति। ततो ब्रह्मचार्यप्युत्थायाग्नेरात्मनो व्यवायं परिहरन्। अग्नेरुत्त
रतो गत्वा आचार्यस्य पुरस्तात्प्रत्यङ्मुखस्तिष्ठति। शौनकः। परिध्याधानमारभ्यानूयाजस्थापनाव
धि। तंत्रं कृत्वा पुरस्तेन संस्पृष्टः पाणिना गुरुः। इध्माधानादिकं शेषमाज्यभागाहुती विना। पुरस्ता
तंत्रमाचार्यः प्रधानाहुतिमाचरेत्। अग्न आयूंषि पवस इत्यादिश्च्योरुहोमः कृतः पुरा। तेरेव मंत्रैरत्रापि
जुहुयात्ताननुस्मरन्। हुत्वैवमुत्थायाचार्योग्नेरुत्तरतोनिके। प्रदेशे प्राङ्मुखस्तिष्ठेच्छिष्योप्युत्थाय
वाह्निना। व्यवधानं परिहरन्गत्वाचार्यस्य पूर्वतः। आचार्याभिमुखस्तिष्ठेत्तावपटमेत्स्वयमंजलिं।
ब्रह्मचारिण आचार्यः पूरयेदद्भिरंजलिं॥ ६२॥ आचार्यस्यांजलिं त्वन्यः पूरयेद्वै ततो गुरुः। तत्सवितु
र्वृणीमह्य इति नीयांजलिमंजलौ॥ ६३॥ अवक्षारयतीत्यर्थः स्वेन पूर्णेन मंजलिं। देवस्य त्वेति गृह्णीयात्पा
णिं सांगुष्ठमस्य च॥ ६४॥ असावित्यत्र नेत्यनामस्यादेवमुत्तरयोरपि। अप्पूरणादित द्वयस्यादन्योमंत्रो
करग्रहे। सविताते हस्तमग्रभीदित्यग्निराचार्य इत्यथ। आचार्यो देवसवितरित्यवक्षारविमोक्षयेदिति। ४७
॥ ६५॥ अस्यार्थः। इतः परं तिष्ठतोरेव कर्म विधीयते ततः आचार्यः प्रथमं ब्रह्मचारिणोंजलिमद्भिः

पूरयेत्। अन्यः कश्चिदुदासीनः वैदिककर्मकुशलः आचार्यस्यांजलिं पूरयेत्। ततो गुरुराचार्यः किं
कुर्यादित्याह। तत्सवितुरिति विश्वामित्र ऋषिः सविता देवता अनुष्टुप् छंदः। अवक्षारणे विनियोगः।
एवं ऋष्यादि पूर्वकं तत्सवितुर्वृणीमह इति मंत्रेण अस्य ब्रह्मचारिणः अंजलौ स्वांजलिं निमीय प्रक्षिप्य अ
वक्षारयति। अवक्षारयतीत्येतत्सूत्रे वर्तते तस्यायमर्थः। पूर्णेनास्य पूर्णमवक्षारयत्यासिच्य पू
र्णार्धस्यार्थमुत्तरार्धेन विवृणोति। स्वेनांजलिना ब्रह्मचारिणोंजलिमासिच्य परिपूर्ये तं पूर्णमव
क्षारयतीत्यर्थः। अवक्षारणं कारयतीत्यर्थः। ततो गुरुः। शिष्यस्य सांगुष्ठं देवस्य त्वेति मंत्रेण पा
णिं गृह्णीयात्। अनादेशाद्दक्षिणमेव गृह्णाति। पाणिग्रहणमंत्रे असाविति पदस्थाने अस्य शिष्य
स्य नाम संबुध्यंतं मंत्रांते गृह्णाति। मंत्रं पठित्वाहस्ताभ्यां हस्तं गृह्णामि विष्णुशर्मन्। एवमनयोः
स्याचारद्वयं कर्तव्यं। एवमुत्तरयोरपि कर्मणोरित्यर्थः। तदेव स्पष्टी करोति। अप्पूरणादि उदकपू
रणादि पूर्ववत्स्यात् सविता ते हस्तमग्रभीदिति मंत्रः। द्वितीयहस्तग्रहणे अग्निराचार्यस्तवेति तृतीय
२ करग्रहे इत्येतत्समानं ततो गुरुः देवसवितरेष ते ब्रह्मचारी मित्यादिकं मंत्रं पठित्वा स्वयं ब्रह्मचारिणमीक्ष
येत्। स्वयं मंत्रं पठित्वा ब्रह्मचारिणं तूष्णीमेव आदित्यं दर्शयेत्। यथा आदित्यो द्रष्टुं पार्यते तथा आदित्यम

Indira Gandhi National
Centre for the Arts

बलो कयेत्। दृष्टौत्। आचार्यग्रहणं ज्ञापनार्थं अन्यत्रेक्षणे ब्रह्मचारिणो मंत्रो नाचार्यस्योत्तर आदित्यमीक्ष
येत्। मित्रस्यत्वा चक्षुषा प्रतीक्षइति। अत्र ब्रह्मचारिणो मंत्रः सिद्धः। जपंतः। अथ ब्रह्मचार्यंजलिं करो
४८ ति। तत आचार्यो स्यांजलिमद्भिः पूरयित्वा तस्योपरि स्वयमप्यंजलिं करोति। तमाचार्यांजलिमन्यो
द्भिः पूरयित्वा तत्सवितुर्वृणीमह इत्यनया पूर्णेन स्वेनांजलिना शिष्यस्यांजलिं पूर्णमवसेचयति।
ततो देवस्यत्वा हस्तं गृह्णाम्यसाविति अनेन यजुषा ब्रह्मचारिणो दक्षिणं पाणिं सांगुष्ठं आत्मनो
दक्षिणेन पाणिना गृह्णाति। असाविल्यस्य पदस्य स्थाने ब्रह्मचारिणो नाम संबुध्या निर्दिशेत्।
सवितास्ते हस्तमग्रभीद्हस्ता धिति॥ यथा हस्तं गृह्णाति असा विति पदस्थाने स्य नाम संबुध्या निर्दिशेत्। देव दत्त अग्ने इति। तत
तीयमप्यंजलिं पूरयित्वावक्षायाम्निराचार्य स्तवास्तोदेवदत्तेति पूर्ववद्देव हस्तं गृह्णाति। यत्रास्ति
नेनादित्योद्दृष्टव्यः तं प्रदेशं गत्वा शिष्यमानीय देवसवितः स मामृतेयेतं मंत्र उक्तो दित्यमीक्षये
दिति। अत्र भंगवानौघटयेस्त्वयमंजलिं निदधाति तत मप्यन्यो चारिणा पूरयेत्। ततः तत्सवितुर्वृणी
महे वयमित्यादृचा नया। शिष्यांजलौ स्वांजलिस्थमवक्षार्योदकं गुरुः। शिष्यांजलिगृतादवोव ४८
क्षार्य स्वेन पाणिना देवस्य त्वेति गृह्णामीत्यंतं यजुरुदीर्यतु। शर्मांतं नाम संबुध्या निर्दिश्य च बटोः

२ शिष्यांजलिव्हारिपूर्णं २

पुनः सांगुष्ठं दक्षिणं पाणिं गृह्णीयात्। स्वेन पाणिना। एवमेव पुनः कुर्याद्दंजल्योः पूरणादिकं मंत्रस्त
त्राग्निराचार्यस्तवेत्यादि परिग्रहे। विद्यते नान्यद्दखिलं तत्र पूर्ववदाचरेत्। मंत्रेण देव सवितरे
ष ते त्यादिना गुरुः। आदित्यमीक्षयं शिष्यमथो भावपि पूर्ववदिति। कस्येति परिदायेन प्रजा
धिपतयेततः। युवा सुवर्द्धचेतः कुर्यात्प्राङ्मुखं दक्षिणावृतं॥ ६७॥ अस्योपर्यंसयोः स्वस्य पाणी
४९ कृत्वा हृदं स्पृशेत्। तं धीरा चेतः स्वा ब्रह्मचार्यहनोक्षणे॥ ६८॥ पूर्यहतं बचश्चेव सुनराथं मिदं कृ
तं। अत्र पर्यहनं नास्तीत्याह हेतुं च वृत्तिकृत्॥ इति। ६९॥ अस्यार्थः। ततः कस्य ब्रह्मचार्यसीत्यादि
मंत्रेण प्रजापतये ब्रह्मचारिणोपरिदाय मनसा परिकल्प्य एनं ब्रह्मचारिणं मंत्रार्थं संस्मरन्प्रजा
धिपतये ब्राह्मणे मनसा परिकल्प्य यत्र सूर्यावलोकनं तत्रैव युवा सुवासाइत्यर्धर्चेन दक्षिणाव
र्तं दक्षिणांगेन प्रदक्षिणमावर्त्य शिष्यं प्राङ्मुखं कुर्यात्। ततस्तस्याउत्तरार्धेन तं धीराइत्यने
न मंत्रेण अस्य ब्रह्मचारिणः अंसयोरुपरि स्वस्य पाणी कृत्वा अंसयोरुपरि देशतः युगपत्रीवा
हृदयं स्पृशति। उत्तरार्धजपस्तु हृदयस्पर्शने भवति। ततो ब्रह्मचारिणा सह गुरुः यथाप
वं अग्निसमीपे पश्चिमभागे उपविश्य। अग्निकार्यं करोति तत्र प्रसंगाद्हरहः कृत्यमुच्यते

Indira Gandhi National
Centre for the Arts

उत्तरत्र प्रयस्यहं पर्यूहनोक्षणपूर्वकं कार्यमिति । यच्च गृह्येपरिसमूहनमुक्तं तत्तु उत्तरार्थं प्रयस्येतव्यं अत्र प
रिसमूहनं नास्त्येव कर्मणः आदावेतच्च पर्यूहनोक्षणयोर्विधीयमानत्वात्तस्मादिह उपनयनकार्यमध्ये यद्गृह्योत्त
४९ दुत्तरार्थं प्रयस्यहं वेदितव्यं तस्मादिह नास्ति प्रयः अतः वृत्तिकृद्दच्च पर्यूहनं ना । तत्र हेतुमप्याह । अग्ने सस्कृतत्वादि
ति जयंतः अथोपस्थाय अग्निसमीपमागत्य पूर्ववदेव तिष्ठतः तत्र लिंगादेनं प्रजापतेपरिददामीति मनसो
संकल्प्य परिददामीत्येवं मंत्रमुपांशु वदति । ततो युवा सा इत्यनेनार्द्धर्चेन ब्रह्मचारिणा प्रदक्षिणमावर्तयति ।
प्राङ्मुखं करोतीत्यर्थः । ततः शिष्यस्यांसयोरुपरि पाणी कृत्वा तं धीरास इत्यनेनार्द्धर्चेन तस्य हृदयदेशम
भाभ्यां पाणिभ्यामालभेत् । अथाचार्यः पूर्ववदेवोपवीति । ततो ब्रह्मचारी गुरुः यथा यं परिहरन्नग्निमभि
वि चार्यस्य दक्षिणत उपविशति । शौनकः । तिष्ठतो मुत्तरेणाग्निमन्योन्याभिमुखौ ततः धात्रे परिददाम्यन सा
मिति संकल्प्य पूर्वकं । कस्य ब्रह्मादिकं मंत्रं ददाम्यं तं गुरुर्जपेत् । युवा सुवासा इत्याद्यमथार्धर्चमुदीरयेत् । द
दक्षिणमुपावर्त्य प्रापयेत्प्राङ्मुखं बटुं । अस्यांसयोरुपरि ततः साभ्यां पाणी हस्तात्मनो गुरुः । तं धीरासः कवय उ ४९
न्नयंत्याद्यमथोत्तरमर्द्धर्चमुक्त्वोरोदेशं हस्ताभ्यां युगपत्स्पृशेत् । तत पूर्ववत्कारीत गुरुः शिष्योपि
च्यामिनाव्यवधाने परिहरन्नग्निमेगत्वेति गुरोः आसीतास्य दक्षिणतस्येति । तूष्णीं समिधमाद
ध्यादग्नौ प्रादेशसम्मितं एतत्पश्चाचार्यवादध्यादग्नये समिधं इति ७०॥ स्पृष्ट्वाग्निं तेजसा

मे तिस्रिः संमार्ष्टि नत्तो मुखं । प्रक्षाल्य हस्तमनलमुपस्पृश्य आवमार्ष्टि यथा ॥७१॥ ओष्ठावलोमकौ कु
मेति तिस्रः संमार्ष्टि नत्तो मुखं । प्रक्षाल्य हस्तमनलमुपस्पृश्याव मार्ष्टि यथा ॥७२॥ अस्यार्थः । इदानीं स
वासंवृत्तो नाग्निमार्जनो एवं त्रिरेव मृज्याग्निमुपरुणयमयीत्यथेति ॥७२॥ अश्वत्थखदिरपलाशादीनां य
मिद्धोमं विदधाति । आग्नेयो प्रादेशमात्रां समिधं जुहुयात् । अश्वत्थखदिरपलाशादीनां य
ज्ञवृक्षाणां समिद्भवति । तूष्णीमिति पदं प्राजापत्यं भवति । ब्रह्मचारिव प्राजापत्य इति
श्रुतिमूलत्वात् । तूष्णीमेव समिद्धोम इति एकः पक्षः श्रौते द्वितीयाध्याये नित्याग्निहोत्र
प्रकरणे प्रथमाहुतिः समंत्रकं हुत्वा तूष्णीं भूयसीमसंसृष्टां प्रागुदगुत्तरतो वा प्रजा
पतिं मनसा ध्यायेत् । तूष्णीं होमेषु सर्वत्र पूर्वो हुत्यपेक्षया भूयसी मृषिका असंसृष्टा
असंलग्ना ईशान्यभागे पेक्षणीया आहुतिरूप । रेनो चितं ईशान्यभागे उत्तरभागे वा दि
तीयाहुतिः पूर्वाहुतिः स्कम्य मध्यप्रदेश एवं प्रजापतिं ध्यात्वा होमः स्वाहेति मुखेनोच्चारणं ।
इति सूत्रदर्शनाच्च तूष्णीं समिद्धोमपक्षे प्रजापतिध्यानं प्रतीयेत । स्मार्तसूत्रे उपनयप्रकरणे
मंत्रेण होके । एकेन मंत्रेण सामिद्धोमं कुर्वंति । तत्रायं मंत्रः । अग्नये समिधमित्यादि
हशब्द अभिमतज्ञापनार्थ इति द्वानिकारः । ततः समिद्धोमानंतरं अग्निं स्पृष्ट्वा दक्षिण

Indira Gandhi National
Centre for the Arts

पाणिं अंसौ गतां मुखं सम्मार्ष्टि तेरूप परमाणुभिः तेजसामिति मंत्रेण त्रिः सम्मार्ष्टि अनंतरं हस्तं प्र
क्षाल्य पुनस्तथैव मुखं सम्मार्ष्टि ०पुनस्तथैव तृतीयं मार्जनं कथं कर्तव्यमिति अरोमकौ ओष्ठौ संवृतौ
५० कृत्वा तादृशं मुखं सम्मार्ष्टि इत्यर्थः। निर्लोमप्रदेशमोष्ठयोर्गोपयित्वा ओष्ठाभ्यामेव त्रिरेव मृज्य त्रिर्मार्जनं
कृत्वा ततउत्थाय मयि मेधामित्यादिभिः षड्भिर्मंत्रैरग्निमुपतिष्ठेत्। आच मइत्यनेन। पउपतिष्ठेत्। संस्थाग
पइति श्रौते निगदितत्वात्। जयंतस्तु। निर्लोमप्रदेशाचोष्ठौ संवृतौ तत्र चारुलाटप्रदेशादारभ्य अन्यद्भिर्मा
र्ष्टि इति ज्ञात्वा अथ दक्षिणं पादं वाचार्यस्योपगृह्य च। नाम्नाभिवादनीयेन। शिरः स्वस्यावनम्य च।७३।
अधीहीत्यादिकं प्रैषं ब्रह्मचारी ब्रवीत्स्वयं। ब्रह्मचारिण आचार्यः परिधानीयो ससा।७४॥ पाणिभ्यामा
त्मनस्तस्य पाणी गृह्णात्यतः परं इति। अस्यार्थः। ततउपविश्य दक्षिणं उपविश्य जानूभौ निपात्य आचा
र्यस्य पादौ उपगृह्य स्पृष्ट्वा अत्र मनुरभिवादने व्यत्यस्य पाणिना पाणिमुपसंग्रहणं गुरोः सव्येन सव्यस्प्र
ष्टव्यो दक्षिणेन तु दक्षिणः गुरोरुक्तप्रकारेण पादावुपसंगृह्य यत्स्वं मातापित्रोर्हृदि स्थितं अभिवादनीयं
मत्तदिदानीं आचार्यस्य ब्रह्मचारिणमेतत्ते अभिवादनीयं नामेति बोधयति शौनकोपि भूतले दक्षिणं ५०
जानु पातयित्वा भिवादयेत् इत्युक्तं प्रथमं पश्चादात्मीयं गुह्यनाम च। शर्मशब्दात् मुच्चार्य ततो ना
माहमस्मि भो। इति चोक्तो गुरोः पादौ पाणिभ्यामपि संस्पृशेत्। सव्यं सव्येन च चरणं दक्षिणेन

तु दक्षिणमिति अनेन नाम्नात्मानमाचार्यादीन्नमस्कुरुस्व स्वस्य शिरः अवनम्य अथ ब्रह्मचारी अधी
हि भो सावित्रीं भो अनुब्रूहि। इमं प्रैषं ब्रूयात्। प्रैषा आज्ञारूपः शब्दप्रयोगः। ततो गुरुरात्मनः पा
णिभ्यां ब्रह्मचारिणः परिधानीयवाससा सह तस्य पाणिद्वयं गृह्णाति शिष्टव्यवहारात् परि
धानीयवाससा आच्छादनं तस्य परिधानीयवस्त्रैकदेशेनन प्रावरणीयेन अनित्यत्वात्
आं भूर्भुवः स्वः सहितां वाचयेदथ।७५। पादं पादं च सावित्र्याः स्वयमुक्त्वाथ वाचयेत्। न
तत्स्व अर्द्धर्चमर्धर्धमृचं तमथ वाचयेत्। एवं वक्तुमशक्तश्चेन्नं यथाशक्ति वाचयेत्। स्थापयेद्ध
त्समीपे स्वमर्ममस्यूर्ध्वांगुलिकरमिति अस्यार्थः। अथ स्वयं प्रणवव्याहृतिपूर्वकां सावि
त्रीमुक्त्वा तां वाचयेत् कयारीत्या पादमात्रमेकवारं वाचयित्वा अनंतरमर्द्धर्चमर्द्धर्चं वाचयि
त्वा तृतीये ऋचं सर्वां वाचयति। अर्थे चेद्यदि तथा गृहीतुं न शक्नोति तदा यथाशक्ति वाचये
त् पादं पादं कदेशमित्यादिप्रकारेण त्रिवारं तथैव वाचयेत्। शक्त्यभावादनुक्तं स्यात्विं वि
धिस्तु पादशः अर्द्धर्चशः सर्वामित्येवं मुख्यपक्षः। तीक्ष्णबुद्धेरिति माणवकस्य श्लोकमात्र

Indira Gandhi National
Centre for the Arts

५१ श्लोकद्वयं वाश्रवणमात्रानंतरं ग्रहीमुंशस्कस्यापि। उद्देशक्रमस्तु पादतआरभ्य भवति॥ नियमवि
धिसामर्थ्यात्। उपदेशानंतरं अस्यमाणयकस्य हृदयं स्पृष्ट्वे आत्मनो दक्षिणं पाणिं ऊर्ध्वांगुलिं स्थाप
यति मंत्रेण करतलं स्थापयेत्। मम व्रत इत्यादि मंत्रः। आबध्य मेखलां मौंजीं दंडं हस्तेक्रमानंततः। आदि
शेद्ब्रह्मचर्यं च सांप्रतं ब्रह्मचार्यसि॥७७॥ अपोशानेति मृचादावुक्रमाचनं कुरु। कर्म कुर्वेति संध्या
दिविहितोपासनादिकं॥७८॥ दिवामास्वाप्सीरित्यस्य दिवानिद्रां न कुर्विति। आचार्याधीन इत्यस्य
मयानुज्ञात एव सन्॥७९॥ मंत्रराशिमधीष्व हं ब्राह्मणान्नि समाहितः। शेषार्थमेवमुक्त्वाथ कालमेकं
च निर्दिशेदिति॥८०॥ अस्यार्थः। मेखलारूपिणीं मौंजीं कटिप्रदेशे आबध्नीयात्। तन्निर्माणप्रका
रमाहाचार्यः। त्रिवृता मेखला कार्या त्रिवारं स्यात्समावृता। तद्ग्रथयस्त्रयः कार्याः पंच वा सप्त वापु
नः। वेदत्रयेणावृतोऽहमिति मन्येत स द्विजः। तद्ग्रथयस्तदंगान्नित इदं स्यान्नि संस्मरेदिति। जयंतस्तुअ
थ मेखलामाबध्नाति त्रिवृतां ग्रंथिनैकेन त्रिभिः पंचभिरेयं वेत्युक्तो ग्रंथिविकल्पो भवतीति मौंजी
बंधने मंत्रस्तु अस्मदाचार्यगृह्ये नास्ति। तथापि अविरोधेन शाखांतरस्थोपि ग्राह्यः। तथा चाप ५१

८

स्तंबः। मौंजीं मेखलां त्रिवृतां प्रदक्षिणमुत्तराभ्यां परिवीयेति। उत्तराभ्यामियं दुरुक्तेति ऋग्भ्यां बौ
धायनेपि। अथ मौंजीं मेखलां त्रिवृतां त्रिः प्रदक्षिणां परिधापयन्वाचयति। इयं दुरुक्तात्परिबा
धमाना इति परिवीतामनुमंत्रयते। ऋतस्य गोप्त्रीत्यनया ऋचा ग्रंथिं करोति प्राणापानयोः स्थिरासि समा
विस्त्रस इति नाभिदेश इति। मेखलाबंधनानंतरं माणवकं दंडं दत्वा मानं परिमाणं तद्यस्येति समान
कः। तत्तद्गृह्ये केशसंमितो ब्राह्मणस्येति परिमाणमुक्तं पादतलमारभ्य। मंत्रस्तु शाखांतरे द्र
ष्टव्यः। स च सुश्रवः सुश्रवा असीति। स्तु बोधिकारिकायां आददीथे तो पालाशं दंडं सुश्रव आ
दिनेति। स्मृतिरूपेण त्वाचार्यो मंत्रमाह। अदात्तं दमयितामां मार्गे संस्थापयेत्स्वयं दंडः कु
रेस्थितो यस्मात्तस्माद्दक्षयतो भयमिति। ब्रह्मणा ते ब्रह्मयुजे ति च मंत्रः। ततः ब्रह्मचर्यमादिशे
त्। अत आरभ्य त्वं ब्रह्मचार्यसीत्युपदिशति व्रतं। गृह्ये ब्रह्मचार्यस्य पोशान कर्म कुरु दिवामास्वा
प्सीराचार्याधीनो वेदमधीष्वेति इत्यस्यार्थं श्लोकद्वयं विवृणोति। अपोशानेति पदद्वयं व्याक
रोति अपः अशान आचमनं कुरु। कुत्रेत्याह। मृचादिषु सर्वेष्वपि। आचमनस्थलेषु आच

Indira Gandhi National
Centre for the Arts

मनं कुर्विति। उपदिष्टो नु। अपोशानेत्यस्य सूत्रस्य मूलं आदौ मन्त्रादुक्तप्रकारेण आचमनं कुर्वि
५२ त्यर्थः। अनयेव रीत्या उत्तरत्र सूत्रार्थो द्रष्टव्यः। कर्म कुर्विति सूत्र पदं व्याख्याति। यच्छास्त्रविहितं संध्या
दि विहितोपासनं कुरु दिवा मा स्वाप्सीः स्वस्य दिवा निद्रां न कुर्वित्यर्थः। आचार्याधीनो वेदमधीष्वेत्यस्य
मया अनुज्ञात एव सन्। त्वं मन्त्रराशिं वेदमधीष्व अध्ययनं कुरु। ब्राह्मणानि च अधीष्वेति समाहि
तः सन् एकाग्रमनाः सन्। अधीष्व मन्त्रब्राह्मणयोर्वेद उक्तत्वात्। अपोशानेत्यादीनां प्रेषणामथमु
क्तप्रकारेण उक्ता स्वीकृत्य स्वब्रह्मचार्यस्य व्रतस्य एकं कालं एकमेव विधिं निर्दिशेत् उक्तस्य येतु।
केचन उपनयनप्रभृति षोडशे वर्षे गोदानं तस्मागेव महानाम्न्यादीनामाचरणं। अपरे तु व्रतक्लेशम
सहमानस्य उपनयनकालादूर्ध्वं गोदानकालादर्वागेव व्रतपरिसमाप्तिमंगीकुर्वन्ति। एवं त्रिवि
धः कालः वेदग्रहणान्तमेको ब्रह्मचर्यकालः एकस्तु द्वादशवर्षपर्यन्तं अपरस्तु असहमानः गुर्वाज्ञ
या व्रतपरिसमाप्तिं कुर्यात्। एवं त्रिष्वपि पक्षेष्वेतं पक्षमाश्रित्य नियमं कुर्यात्। अतः प्रवृत्तौ तु त्रिविधं ५२
स्नानं दर्शितं। विद्यास्नानं व्रतस्नानं विद्याव्रतस्नानमिति। यस्तु द्वादशेभ्यः प्राग्वेदमधीत्य स्नाति

स विद्यास्नातकः। यस्तु द्वादशवर्षाणि ब्रह्मचर्यं कृत्वा अधीतविद्यः स व्रतस्नातकः। यस्तु पुनर्द्वाद
शवर्षाणि ब्रह्मचर्यं कृत्वा अधीतविद्यास्नाति स विद्याव्रतस्नातकः। विद्यान्ते गुरुसन्यर्थ्य स्नानं। स्ना
नं तु विद्यायाः अन्ते विहितं अतस्तु मध्यमुत्सृज्य अन्तमारण्यकमधीत्य स्नायात्। रहस्ये च आरण्य
कं प्राधान्येन स्नानमनिमित्तमधीत्य स्नातको भवति। विद्याव्रतस्नानमित्यत्र उभयोरप्याचरणं।
उक्तरीत्या समग्रं परिसमाप्य स्नायादिति। परिषेचनपर्यन्तं कुर्यात् स्विष्टकृतादिकं। अप्रत्याख्या
यिनं पूर्वं याचेद्भिक्षां भवानिति॥८१॥ भवतीत्यथवा याचेदप्रत्याख्यायिनी यदि। व्रीह्यादन्यतमं ल
ब्ध्वा गुरवे वेदयीत तत्॥८२॥ अहःशेषं ततस्तिष्ठेत्सायं संध्यामुपास्य च। पूर्णपात्रनिधानांतं तु पले
पादि पूर्ववत्॥८३॥ विप्राणां भोजनायालं तूष्णीं निर्वाप्य पाचितं। तूष्णीं प्रोक्ष्याघारादि अपर्णांतंक
रोत्यथेति॥८४॥ अस्यार्थः। आज्येनैव स्विष्टकृदादि परिषेचनपर्यन्तं स्थालीपाकोक्तप्रकारेण भवति।
ततः ब्रह्मचारी भिक्षां याचयेत् प्रार्थयेत्। कमादौ याचेत्प्रार्थयेत्। अप्रत्याख्यायिनं प्रार्थितो नास्ती
ति यो न ब्रूयात्। स अप्रत्याख्यायी तादृशं भवितं याचयेत्। प्रथमं भिक्षायामयं नियमः। अर्थादुहसा।

Indira Gandhi National
Centre for the Arts

नमपि याचेत। अप्रत्याख्यायिनमिति अविशेषेणोपादानात्। ब्रह्मौदनार्थं भिक्षायामयं नियमः। अनु द्वितीय
प्रवचनीयार्थं भवान् भिक्षां ददात्विति। तथा मंत्रस्मरणात्। अथवा। अप्रत्याख्यायिनीं गृहस्थस्त्रि
५३ यं वा याचयेत्। भवती भिक्षां ददात्विति ब्रूयात्। तत्र तंडुलव्रीह्याद्यन्यतमं पद्धविप्यं लब्ध्वा प्राह्णे गुरवे
निवेदयीत एतस्मामिति। चतुर्होमब्राह्मणेषु यो भिक्षां याचितव्य आचार्यस्मृतौ। अप्रत्याख्यायिनी
नारीमप्रत्याख्यायिनं नरं। ब्रह्मौदनार्थं × भोजनं × विप्रार्थं सकृत्पृथ्वान्यां चयेत्तदा। पात्रं गृहीत्वा संया
च्य भिक्षामाहृत्य तत्स्वयं। निवेद्य गुरवे दत्त्वा प्रेषं स्मृत्वा समापयेत्। शौनकः। ब्रह्मचारी भिक्षारभे
पकं ब्रह्मौदनं चरुं। द्विजान्भोजयेत्पश्चाद्द्रव्यं भिक्षितबांधवान्। भिक्षेत्पात्रहस्तः सन् प्राप्यप्रा
प्यं तदेति कं। अग्रे भिक्षेत जननीमप्रत्याख्यायिनी च या। पश्चात्पितरमन्यो पि ये वा स्युर्बांधवा स्त
तः। ततस्तदन्नं तरं ब्रह्मचारी अवशिष्टं दिनशेषं सूर्यास्तमयात्। प्राक् अवशिष्टं घटिकामात्रं दि
वसं पर्यंतं तिष्ठेत्। नोपविशेत्। यदि तथा कर्तुं न शक्नोति तदा व्रतलोपे आचार्यः तदनुग्रहार्थं गा ५३
यत्रीं जपेत्। सहस्रमात्रं शतमात्रं वा ततः संध्यासमये प्राप्ते संध्यावंदनं कारयित्वा अनंतरं ब्रह्मौ

दनं होमं प्रारभेत्। तत्रैवं प्रयोगः। शुचिरपि कर्मांगं द्विराचम्य प्राणानायम्य तिथ्यादि स्मृत्वा एवं
गुणविशिष्टायां तिथौ अस्य ब्रह्मचारिणः ब्रह्मचर्येण वेदोक्तफलप्राप्त्यर्थं अनुप्रवचनीयं चरुहो
मं करिष्ये। अनुप्रवचनीयमिति कर्मनाम। अनुप्रवचननिमित्तमनुप्रवचनीयं तद्भवान्ददात्विति भा
षणनियमः। अनुप्रवचनीयं भिक्षेद्वक्तुमतः। अनुप्रवचनीयं श्रपयेति गृह्येवर्तते तस्मादस्य कर्मणः
शास्त्रतो लोकतश्च प्रसिद्धः। अनुप्रवचनीयं श्रपयित्वेति होमार्थं ब्राह्मणभोजनसमर्थं च तथा
स्थालीपात्रं स्थूलतरं पाकसमर्थं योजयेत्। ततः संकल्पानंतरं उपलेपाद्यग्निप्रतिष्ठापनांतं कृत्वा
अन्वाधानादि कृत्वा तत्रान्वाधाने सदसस्पतिः सविता ऋषयः प्रधानदेवताः चरुद्रव्येण शेषेण
स्विष्टकृतं इत्यंतरं समानं पूर्णपात्रं निधानांतं कृत्वा ततः पवित्रद्वयं प्रणीतां ततः शूर्पेणासादयित्वा
निर्वपणं कुर्यात्। विप्राणां भोजनसमर्थं यावितं व्रीह्यादिकं। उत्तरत्र होमविधानदर्शनात्।
देवतात्रयोद्देशेन प्रत्येकं तूष्णीं मंत्र चतुरश्चतुरो मुष्टीन् निर्वपति। निर्वपणस्य ब्राह्मणभोजनप
र्याप्तस्य विहितत्वात्। यावदपेक्षितमधिकं वा शूर्पे प्रक्षिपति। अनंतरं पवित्रे उपरिस्थाप्य तथैव नि

Indira Gandhi National Centre for the Arts

र्वाप संख्यं प्रोक्षणं कुर्यात्। अर्थाद्दधिकानामपि प्रोक्षणं भवति। प्रोक्षणानंतरं समयाचारादिसंस्का
रः कार्यः। ब्रह्मचारी चरुश्रपणांतं कुर्यात्। अस्याशक्तौ करोत्यन्यः श्रपणांतमिति क्षितिरिति। अत्र
५४ विहिताद्दाचार्यो वा कुर्यात्। आचार्यायभृतस्थालीपाकादिति निवेदयेत्। अन्वारब्धो गुरुः कु
र्यादाघारांतमतः परं। चर्वाहुतित्रयं हुत्वा सदसस्पतिमित्यृचा। ऋचा तत्सवितुस्तद्दृषिभ्य इति
मंत्रतः॥८६॥ कुर्यात्स्विष्टकृदाद्यं तेचान्नेन द्विजभोजनं। अस्याशक्तौ करोत्यन्यः श्रपणांतमिति
क्षितिरिति॥८७॥ अस्यार्थः। चरुश्रपणानंतरं ब्रह्मचारी आचार्याय श्रृतो यं स्थालीपाकः स होम
योग्यः संपन्नः इति तस्मै गुरवे निवेदयेत्। ततो गुरुरन्वारब्धे दक्षिणस्कंधे लग्ने सति ब्रह्मचारि
णि आघारांतं कुर्यात्। स्थालीपाको यद्युद्वासनादिकं आघारांतं कुर्यात्। आघारांतमिति निर्देश
आज्यभागयोर्निरासनार्थं अतः परं चरोराहुतित्रयं जुहोति। प्रथमाहुतिः सदसस्पतिमित्यनेन मंत्रे ५४
णा द्वितीया तत्सवितुरिति ऋचा। तृतीया तु ऋषिभ्य इति। अत्र विभाज्य होमः। उत्तरस्थालीस्थितस्यव
चनाद्यः कारिकारेणैव उत्तरत्र। अष्टकाप्रकरणे इति ज्ञापितत्वात्। कथमित्याह। मंत्रोक्तदेवतानां

का

तु तूष्णीमेवाथ निर्वपेत्। चतुरश्चतुरो मुष्टीन् प्रोक्षणं च तथा भवेत्। सहैव श्रपयेदत्र नास्ति युद्धरणं
तथा। आदिष्टमंत्रहोमेषु सर्वत्रैवं प्रतीयतामिति। अयमर्थः। यत्र वैदिकमंत्रैर्होम आदिश्यते तत्र निर्वाप
प्रोक्षणे तूष्णीमेव कुर्यात्। तत्तद्देवताभ्यः। यत्र तु केवलनाममंत्रैर्होमः। यथा अग्नये स्वाहेत्यादौ तत्र देवतासं
ख्यया पात्रांतरे हविर्विभज्य होमो भवतीत्यर्थः। तस्मादिह प्रकृते ब्रह्मौदनहोमे पि वैदिकमंत्रैर्होमस्य वि
द्यमानत्वात् न चरोर्विभाग इत्येवमर्थं उत्तरप्रकरणांतरगतमिह प्रदर्शितं। अत्र ब्रह्मशब्दः ब्राह्मणवाच
कः। वेदस्तत्त्वं तपो ब्रह्म ब्रह्मा विप्रः प्रजापतिरित्यभिधानात्। ततः स्विष्टकृदादि परिसमूहनपर्युक्षणां
तं समाप्य अवशिष्टेन स्थाल्योदनेन ब्राह्मणान्भोजयित्वा अस्याशक्त्याक्रियस्याधे स्यार्थं स्कपूर्वमे
वोक्तः। द्विजान्भुक्तवतो वेदसमाप्तिं वाचयीत चेति। अस्यार्थः। तादृशान्परितुष्टान्द्विजान्वेदसमाप्तिं
वाचयीत अस्य ब्रह्मचारिणः निर्विघ्नेन वेदसमाप्तिं वाचयी। अस्य ब्रह्मचारिणा निर्विघ्नेन वेदसमाप्ति
रस्त्विति भवंतो ब्रुवंतु। तेपि तथैव हृष्टमानसः आशीर्वचनं प्रतिब्रूयुः॥ ब्रह्मौदनकर्मसमाप्तं॥ ॥
अथ ब्रह्मचारिनियमः॥ क्षारादिवर्जमश्नीयात् ब्रह्मचारी दिनत्रयं। शयीताधश्चतुर्थेह्नि मेधाजननं

माचरेत्॥८८॥ यद्वा द्वादशरात्रं स्यादुत मब्दमथापि वा। तदा तदंत एवस्यान्मेधाजननकर्मं च॥८९॥ अस्या
र्थः। ब्रह्मचारी दिनत्रयं व्रतदिनमारभ्य दिनत्रयं क्षारलवणवर्जमश्नीयात। अधः शयनं च कुर्यात। चतु
५५ र्थदिवसप्राप्ते मेधाजननाख्यं पलाशपूजादिलक्षणं कर्म कुर्यात्। अथवा द्वादशरात्रं व्रतं स्यात् दिवस त्र
दिरूपं कुर्यात्। संवत्सरं व्रतं कुर्याद्वा तथा सति। द्वादशरात्रपक्षे त्रयोदशे दिने मेधाजननं कुर्यात्। संवत्स
रपर्यंतपक्षे व्रतसमाप्त्युत्तरदिन एव मेधाजननमिति। शौनकोपि। एवं कृतव्रतस्यास्य चतुर्थदिवसं तु
रः। त्रयोदशे वाब्दांतेवा मेधाजननमाचरेदिति। आग्नेयी दक्षिणा पश्चाद्दक्षिणा निंदिता दिशः। अनि
दितायामन्यस्यां पलाशं शाखवर्जितं॥८९॥ तस्याभावे सशाखं च कुशस्तंबमथापि वा। त्रिः प्रद क्षि
णमुत्संतमंभः कुंभेन तं बटुं॥९०॥ ~~अस्यार्थः~~। आचार्यो वाचयेन्मंत्रं सुश्रवः सुश्रवा इति। तं त्रिवमे
खलादीनि व्युदस्यान्यानि धारयेत्॥९१॥ अस्यार्थः॥ आग्नेयी दिक् दक्षिणा दिक् पश्चिमदक्षिणा
नैर्ऋती दिक्। एताः दिशः निंदिताः एताः दिशो वर्ज्याः। एतास्वनिंदितायां प्रशस्तायां दिशि यत्र भवेत् पलाशं द्रु
जयेत्। ततः ब्रह्मचारी कर्मांगं द्विराचम्य प्राणानायम्य। तिथ्यादिस्मृत्वा आत्मनः कृताधीत धारणशक्ति
शाखवर्जितं एकशाखामित्यर्थः। शाखांतरेण भाव्यं न तादृशो यदि न लभ्येत तथासत्यनुकल्पमाचष्टे। तस्या
भावे सशाखं चेति। तस्याप्यलाभे कुशस्तंबं वा पूजयेत्।

संपादनार्थं मेधाजननाख्यं कर्म करिष्ये। ततः उदकपूर्णकुंभं अर्थात् ताम्रमयं पाणिभ्यां गृहीत्वा मंत्रे
ण पलाशं तेनोदकेन ईशानीदिशमारभ्य मंत्रेण प्रदक्षिणं त्रिः सिंचेत्। ततस्तु तन्मंत्रमाचार्यो
ब्रह्मचारिणं वाचयति। उदकुंभेन तं पलाशं प्रदक्षिणं सिंचंतं बटुं मंत्रं वाचयेत्। सुश्रवः सुश्र
वा इति। तत्रैव पलाशसंनिधौ मेखलादीनि व्युदस्य दूरीकृत्य अन्यानि गृह्णीयात्। शौनकः। सु
वासा नैऋत्यामाग्नेयी दिशं याम्यां च नैर्ऋतीं। वर्जयेत्वा दिशो निंद्या। स्तस्तोन्यस्यां दिशि स्थितं प
लाशं यत्नतस्तत्र मेधाजननमाचरेत्। अनेकमूल मित्येव पलाशस्य विशेषणात्। मूलप्रभृ
त्येवोद्भूत शाखा भेदसमन्वितं। सर्वथा यस्य कस्यापि पलाशालोस्य त्वसंभवे। कुशस्तंबमुपागम्य
तं कुंभेन तवारिणा। प्रदक्षिणं त्रिः परितः सिंचंतं ब्रह्मचारिणं। वाचयेन्मंत्रमाचार्य सुश्रवः सु
आसि श्रवा इत्येवमादिकं। भूयात्सममतमनुधानतः प्रतिदक्षिणं मंत्रमप्यभ्यावर्त्य वाचयेत्। ततः पूर्व
धृतं वस्त्रं मेखलाद्यास्तिलं बटुः पाशात्लो मूलं संत्यज्य सर्वाण्यन्यानि धारयेत्॥ गृहान्प्रती
याद्रुर्वादेः समस्तैर्बंधुभिः सह। पथि स्व स्यापनाम्नं चान्वदेत्सुबोधवैः सह। अग्रतोस्यान्नेयु
न

Indira Gandhi National
Centre for the Arts

रोचारिधारां च संप्रसंस्य ततः सन्मंगलैर्दीपैः पूर्णकुंभादिभिर्युतः। प्रापयेद्गृहमाचार्यः पुण्याहं
वाचयेद्द्विजैरिति। आचार्योपि। कुर्यात्त्रिमेखलां वेदिं सर्वतो द्वादशांगुलां। शुचौ प्रागुत्तरे भागे
५६ तस्य मेधां समर्चयेत्। पलाशशाखां तन्मध्ये पत्रांकुरसमन्वितं। आर्द्रां वाथ कुशस्तंबं समूलं स्था
पयेद्गुरुः। मेधा मा चाहमतिमान्मेधायेनमइत्यथ। गंधपुष्पाक्षतैः सम्यग्युपचीभिः पुरा। इक्षु पादि
निवेदयस्तं सक्तुमिश्रं सयावकं। समोदकं निवेद्यं पुनश्चाभ्यर्च पूर्ववत्। प्रणम्य तस्यै मेधा
यै व्रतीनिःसारयेज्जलं। उच्चैरनुश्च चोमंत्रं जलं गृह्य प्रदक्षिणं। संस्राव्य तां नमस्कृत्य तथा कु
र्यात्पुनः पुनः। एवं त्रिवारमावर्त्य दंडाजिनकमंडलून्। वेद्यां निक्षिप्य च स्नात्वा वाससी च विनि
क्षिपेत्। मेखलां चोपवीतं च धृत्वान्यानि विनिक्षिपेत्। वाससी तस्य गुरवे मेधाजननकर्मणि।
दद्यात्तावल्लभत्तस्यैकोपीनं न प्रवर्तयेत्। पुण्याहवाचनं कृत्वा ब्राह्मणांश्चापि भोजयेत्। तमाव
हति सा मेधा मेधाजननकर्मणः। तत्कर्तव्यं प्रयत्नेन व्रतस्युः वसमाप्तयइति॥ ॥इति मेधाज
ननकर्म॥ ॥अथ नैमित्तिकमुपनयनं॥ वेदांतरमधीत्यैवमृग्वेदं येत्वधीयते। उपनीतिरियं ५६
तेषामलंकरणवर्जिता॥२२॥ यदि तदुपनीतस्य प्रायश्चित्तं तदा भवेत्। कृताकृतं तु वपनं मेधाज

ननमेव च॥२३॥ मेधाजननसद्भावे व्रतचर्या भवेदिह। अनुप्रवचनीयं च तदभावे द्वयं न च॥२४॥ परिदा
नं न कार्यं स्यान्निमित्तानंतरं त्विदमिति॥ अस्यार्थः। प्रमादवशाद्व्यतिक्रमे निमित्तकमुपनयनमि
ति तत्कथं। ब्राह्मणेन चत्वारो वेदा अध्येतव्याः। तत्र स्वशाखोक्तवेदाध्ययनमादौ कुर्यात्। तत्र ऋग्वेदादि
क्रमेण अध्ययनं विधीयते। यदि देशकालाद्यनुरोधेन नानाप्रमादैः ऋग्वेदाध्ययनप्रसंगो न स्यात्॥
तदा ब्रह्मचारिणा वेदांतरमधीत्यापि ऋग्वेदः पठनीयाः। अध्यापकलब्धे तत्र व्युत्क्रमेणाध्ययनजं
नित प्रत्यवायापनोदार्थं प्रायश्चित्तत्वेन ब्रह्मचारिणः पुनरुपनयनं विधीयते। कथमित्याह। वेदां
तरमधीयेऋग्वेदाध्ययनं कुर्वंति तेषामेव वक्ष्यमाणप्रकारेण उपनीतिर्भवति। तत्प्रकारमाह। अत्र ब्र
ह्मचारिणः अलंकारा न संतीति यदा उपनीतस्यापि एतदुपनयनं प्रायश्चित्तरूपेण भवेत्। तत्र वप
नं कृताकृतं मेधाजननं पलाशपूजनं कृताकृतं। कृते गुणविशेषः। अकृते न प्रत्यवायः। यदि मेधाजननं
क्रियेत तदा अक्षारलवणाशी ब्रह्मचारी अधःशायी त्रिरात्रमित्येवं व्रतमाचरेदिति। अनुप्रवचनीयं च कु
र्यात्। ब्रह्मौदनहोमइति। मेधाजननस्याकरणपक्षे द्वयं व्रतचर्या अनुप्रवचनीय पक्षे न स्यादिति। कृ
ब्रह्मचार्य। सीसूर्दिमंत्रेण ब्रह्मचारिपदानं नास्ति पक्षद्वये पि इदमुपनयनं निमित्तजन्यमिति हेतोः।
पूर्वस्या वाचयेत्स्थाने तत्सवितुर्वृणीमहे॥२५॥ भिक्षितान्नं द्विवारान्ना वाचार्याया तस्तुष्टये॥ मणितोत्र

Indira Gandhi National
Centre for the Arts

५७ विशेषोऽयं समानमिति रुद्रदेवेन ॥९६॥ अग्निकार्यं च भिक्षायाः प्रागूर्ध्वं वा तदुच्यते । पर्यूहनोक्षणे स्या
त्तामादावंते च कर्मणः ॥९७॥ तूष्णीं समिधमिध्म इत्यादि स्कपस्थानादि पूर्ववत् । वेदस्वीकरणं यावत्ताव
द्वं समाचरेत् ॥९८॥ अथ वोद्दिदशाद्दस्याद्ब्रह्मचर्यमिति स्थितिः । उपाकरणपर्यंतं सावित्र्या ब्रह्मय
ज्ञकं ॥९९॥ अस्यार्थः । पूर्वस्याः सावित्र्याः स्थाने गायत्र्या उपदेशात् अवसरे गायत्र्याः स्थाने तत्स
वितुर्वृणीमहे वयं देवस्य भोजनं । श्रेष्ठं सर्वधातमं तुरं भगस्य धीमहि । इति त्र्यं पाद्यादिकमनुपूर्वपठ्य
येत् । नियमविधिर्भवतीति कृत्वा दिवा रात्रौ विति प्रातः संध्यां विधाय वेदाभ्यासं कृत्वा भैक्षं कुर्यात्
रात्रावपि सायं संध्यामुपास्य भिक्षां कुर्यात् । सिद्धान्नं याचयेत् । आचार्यतुष्टिपर्यंतं आत्मतुष्टिपर्यंतं
अन्नं भक्षयेत् । यदा गुरुरशक्तो भवति तदा तदर्थं भैक्षं संपादनीयमिति भावः । अन्यथा आत्मतुष्ट्यर्थं
संपादनीयं । अयं विशेषः । कथितः कात्यायनेन मृतेन केन उपनयने अउकाररहितं कृतोहतेके
शवपनादि इत्यादि लक्षणं । इतरत्समानं नित्येन मितं केचोपनयने । भिक्षायाः प्रागूर्ध्वं वा अग्निकार्य
मुच्यते विधीयत इत्यर्थः । उभयमपि भवति । तत्र अग्निकार्यविधानं पूर्वोक्तमेव तत्र पर्यूहनोक्षणेन विधी ॥५७
यते स्मिन्ता । अत्रानुक्रमेण । आदावंते प्रत्याहस्यास्तां तूष्णीं समिधं क्षेपः । मंत्रेण वा इत्यादि पूर्ववत् । यामयि
मेधामिति तथैवोपस्थानं । एतदग्निकार्यं वेदाध्ययनपर्यंतं ब्रह्मचर्यं भवतीति व्यवस्था । ब्रह्मयज्ञोऽपि ब्रह्मचा
रिणः कर्तव्यः । तत्र उपाकरणपर्यंतं सावित्र्या ब्रह्मयज्ञकमिति । वेदाध्ययनसाध्यस्य ब्रह्मयज्ञस्य उपाकरणं विना

× कार्यमिति । अथवा द्वादशवर्षपर्यंतं × २

वेदाध्ययनराहित्येऽनुपाकृत्याधीयाच्छन्दांसि श्रूयते । अतः कथं नित्यब्रह्मयज्ञसिद्धिरिति । शौनकोऽपि । येवे
दांतरमध्येतुं तस्य त्र विधानं । तत्कृतोपनयनो धीत्यन येन सकृदुद्विजः । द्वितीयमिमं मृग्वेदमध्येतुमभिवां
छयारन ह्वोक्तविधिना पुनरप्युपनीयत । केशानां वपनं क्रियते वा मेधाजननकर्माणि विशेषं वह्न्यानेनं कर्त
व्य पक्षाश्रयणे मेधाजननकर्मणः । अलोदनस्य होमस्य त्रिरात्रादिव्रतं तथा । कस्य ब्रह्मादिमंत्रेण परिदानमेव
नेष्यते । तत्रोदगयादिश्च कालानां पेक्ष्यते पुनः । तत्सवितुर्वृणीमहे वयमित्येव पादिका ऋक् सावित्री परिग्रा
ह्या यद्यदन्यसमीरितं । अन्योपनयने तत्तदउकारादिवर्जितं । इहापि सर्वं कुर्यात् स्कपनीतः पुनर्भवेदिति ।
अत्र समंथे नियमो नास्तीत्याहाचार्यः । उत्तरायणकालादि नियतिर्नेविधीयते । निष्पस्थोपनयने चालक्ता
रस्कस्कवत् इति । इत्युपनयनकर्म ब्रह्मचारिधर्माश्च ॥ छ ॥ महानाम्न्यादि कर्तव्यं तत्तत्काले व्रतत्रयं । उक्तेका
ले द्वादश्यं तं वपनाद्यपनीतिवत् । नवां मौंजीं दंडं दत्वा स्विष्टकृदादि अथ । संवत्सरं यदा संपूर्णे तु उत्तरायणे ॥२०१
शुक्लपक्षे बहिर्ग्रामाद्विविक्ते देश मेत्य च । पूर्णपात्र निधानांतमुपलेपादि पूर्ववत् ॥२॥ स्विष्टकृद्धोममुक्ते यत्तदो
निरूप्य प्राश्य तत्र चेति । अस्यार्थः । महानाम्नीव्रतं महानाम्नीव्रतं महाव्रतमुपनिषद्व्रतं चेति । उदगयन
काल शुक्लपक्षे कर्तव्यं तत्तत्काले एकं समाप्य अपरं कर्तव्यमिति भावः । उपनीतिवदुपनयनेवत् । वपनादि कर्म
द्वादश्यं तं २ कार्यं वा परिदद्यामीत्यंतं कायस्या ब्रह्मणे त्वां ददामीति । एतदंतं कुर्यात् । ततः मौंजी धार्याविव
पिदंडः । अथ स्विष्टकृदादिहोमशेषं समाप्य । संवत्सरपर्यंतं महानाम्नीव्रतांगं ब्रह्मचर्यादि एतदाचरेत्

Indira Gandhi National
Centre for the Arts

५

पुनः महानाम्नीव्रतानंतरे पूर्णे संवत्सरे आते उदगयने शुक्लपक्षे अग्निं प्रतं ग्रामाद्बहिः विविक्ते प्रशस्ते पवित्रे दे
शं प्राप्य तत्रादायुपलपादिप्रणीतापात्रस्थानपर्यंतं पूर्ववत्कृत्वा ततो वटु ब्रह्मचारी होमार्थं निर्वपणं दैवतो
५८ द्देशं कुर्यात् तथा निर्वपेत् यथा स्वस्य च भोजनसिद्धिर्भवेत् । इति । आत्मनो भुक्त्यर्थं यः निर्वापो भुक्तिभोजनं अ
लं समर्थं तस्मान्निरूप्य निर्वापयत्येव नु हवींष्यष्टिला नाप्युपचेत्यक्ष मान्यायाय निवेदयेत् । उपच्छति व्रतला
पांस्तान्दर्से प्रतिपच्ये स्यथ । वह यो व्रतलोपाश्चास्तुनरावर्तये द्वृते । ४ । लोप स्थाप स्रपुके पुनरावर्तये द्वृते ॥
लेनाचारव्ध आचार्याद्द्ध्मानादि पूर्ववत् । ५ । हुत्वाग्नावग्निरित्यादि मंत्रैश्चतस्रो आहुतीः अथ ततः स्विष्टकृतेव शेषं च
कूर्मोऽनिधापयेत् । एत इत्याद्यशनांतमाह मतः प्रेषमिति । अस्यार्थः । तत्र तिलान पिस्थाल्यां प्रक्षिप्य पाकं कु
र्यात् बहुः पक्वं हविरावाचार्याय निवेदयेत् । ततः आचार्यः ब्रह्मचारिणं व्रतलोपान् पृच्छति । त्वया कानि व्रतान्याच
रितानि कानि लुप्तानि वेति । अथ ब्रह्मचारिणा प्रतिवचने दत्ते मया आचरितानि न वेति । यद्याचरि
तानि तदा कृतार्थता । अथ चेद्बहूनि लोपाः स्युः तदा कुरु । लोपं चाधर्मश्चाविचार्य लाघवं प्रायश्चित्तं प्रति
निस्पृः तदा कृतार्थदा । अथ चेद्बहूनि लोपान् ब्रूयात् तत इति पांसुरूणं लोपध्वंचाविचार्य लाघवप्रायश्चित्तं अन
लोपगुरुत्वे पुनरावृत्तिः तदेव पुनरावर्तयेत् । आपत्स्वयुक्तेषु लोपेषु तस्यावर्तनं नास्ति किंतु प्रायश्चित्तेन ५८
ब्रह्मचारिणा अन्वारब्धः आचार्यः पूर्ववदिध्माधानादि अग्निरित्यादिभिर्मंत्रैश्चतस्र आहुतीर्हुत्वा ततः स्विष्टकृद
र्धमवयते । अवशेषस्य मम सवस्थापयदिति प्रीतोयते उत्तरत्र कोस्विष्टकृद्धोमविधानदर्शनात् ॥
अवशिष्टश्चरुस्थालीस्थः तस्मो स्थापयन् । ततो गुरुः तरेतत्सर्वमशानेति प्रेषमाह । तस्मिन्

---

यस्मिन्ये स्थालीपाकान्नं भुक्त्वा । भुक्तवंतं तमाचांतं जलपूर्णांजलिं ततः ॥ ७ ॥ त्वं व्रतानां व्रतेत्यादि ईक्ष
कर्ववद्दिवाकरं । उपस्थाप्याथ कुर्वीत मीलितास्यं च वाग्यतं ॥ ८ ॥ त्रिः प्रदक्षिणमावेष्टय वाससाथ
मुखं शिरः । उक्ते करात्रमित्यादि प्रेषं स्विष्टकृदादयस्थेति ॥ ९ ॥ आवश्यकेभ्य इतरच्छयनस्नानभोजनं । अ ५९ २
कुर्वन्नेकरात्रं च ब्रह्मचारी नयेदथेति ॥ अस्यार्थः । भोजनांते उच्छिष्टले पस्य आचमनं कृत्वा जलपूर्णम
जलिं दत्वा तादृशं ब्रह्मचारिणमुत्थाप्य त्वं व्रतानामित्यादि मंत्रं जपंतं सूर्योपस्थानं कारयित्वा ततः तूष्णी
मेव वस्त्रेणाक्षी संमील्य मौनमंगीकृत्य गुरुर्ब्रह्मचारिणमुपदिशति । चक्षुर्मीलनं कुरु । ततो ब्रह्मचारी अ
हतेन वाससा शिरो मुखं त्रिः प्रदक्षिणमावेष्टय एकरात्रमित्यादिप्रेषमुक्त्वा स्विष्टकृदादिहोमशेषं स
माप्य अवश्यकेभ्यः शरीरव्यापारेभ्यः इतरेषु शयनासनभोजनादिष्वन्यान्नमकुर्वन् । वर्जयन्नेक
रात्रं नयेत् । महानाम्नीव्रतांगभूतं एवं व्रतसमाप्तिलक्षणं उत्तरकृत्यमाह । ईशान्यां च विहायाग्निं प
श्चादग्नेस्तृणेषु तु । ईशान्यग्नेषूपविष्टो वीक्ष्यमाणास्तु तां दिशं ॥ १० ॥ शिष्योऽपि स्वमुखप्रक्षाल्याग्न्या
चार्यौ प्रदक्षिणं । कृत्वा तस्योपसंगृह्य पादौ तेषु तृणेषु च ॥ ११ ॥ ईक्ष्यमाणो दिशं प्रत्यग्दक्षिणामुपविश्य
चेति । अस्यार्थः । ग्रामाद्बहिर्गत्वा प्रशस्ते देशे ग्रामस्य ईशान्यभागे अग्निं प्रतिष्ठाप्य ततोऽग्नेः प्रत्यग्विभागे

Indira Gandhi National
Centre for the Arts

ईशान्यग्रकान्दर्भान्नास्तीर्य तेषु दर्भेषु उपविश्य तामेव ईशानीं विलोकयन्न वक्ष्यमाणं कर्म कुर्यादिति। ततः
शिष्योपि स्वमुखं पुष्पास्यं। अत्र पिहितस्य मुखस्य प्रक्षालनं कार्यं शक्यत्वात्। अथ ग्रामसुष्णीषं विमो
५९ चनं तत्कालमाचेत तथैव पूर्ववत्रापि संध्यावंदनाद्यावश्यककर्मांगाचमनादावप्यनुसंधेहं। ततस्तयैव वेष्टि
तशिरा एव शिष्यः अग्निमाचार्यं प्रदक्षिणीकृत्य आचार्यसमीपे गत्वा गुरोः पादौ पूर्ववदुपसंगृह्य स्पृष्टान्त
नास्तृतकुशेषु नेर्ऋत्यभिमुखः तामेव दिशमीक्षमाण उपविशेत्। स्वेन पृष्ठेन तस्य पृष्ठं संदधाति ततः पूर्वं॥
२२॥ मनसा महानाम्नीर्भो अनुब्रूहीति तं गुरुं। पृष्ठेन दहरुसन्नान्तलोपान्सतो गुरुः॥९३॥ स्वयं स
मीलनं कुर्यान्महानाम्नीऋचो गुरुः। त्रिः पुरीषपदेरुक्तो तस्योष्णीषं विमोचयेदिति॥९४॥ अस्यार्थः।
ततस्तथाभूतो बटुराचार्यपृष्ठेन स्वपृष्ठं मेलयं नास्ते। ततः मुखोच्चारणं विनेव केवलं मनसा महाना
म्नीर्भो अनुब्रूहीति प्रेषं तं गुरुं मनसा ब्रूयाद्ज्ञापयेदिति भावः। ततो गुरुः प्रमादादवशात्तद्विवो सन्ना
न्नतलोपान्स्पृष्टेत्। स्वीकृते व्रते व्रतलोपो जातो न वेति वदेत्। अथ गुरुः। स्वस्य अक्षिणी संमील्य म
हानाम्नीर्वचः पुरीषेपदैः सहत्रिर्वदेदिति। अथ महानाम्नीवचनानन्तरं शिष्यस्योष्णीषं विमोचयेत्।
हरीकुर्यात्। ईक्षयेदर्कमीक्षेत मित्रस्येति द्वयेन तु। सूसंभारादि सावीक्ष्य मित्रस्य चइति तथा॥९४॥ ५९
मित्रस्येत्यादिमंत्रेण पुनरादित्यमीक्षयेत्। ईक्षणे कदिशामंत्रां ब्रह्मचारिण एव तु॥९५॥ मंत्रांतेक

समीक्ष

र्म कर्तव्यं सर्वत्र करणं स्मृतमिति। अस्यार्थः। आदित्यं विलोकयेति शिष्यं वदेत्। ततः शिष्यः॥
मित्रस्य चर्षणीधृतः इत्येकः॥ मित्रस्य त्वा चक्षुषेत्यपरः। एवं मंत्रद्वयं पठित्वा सूर्यं विलोक
यत्। मित्रस्य त्वा चक्षुषानुवीक्ष्य इति मंत्रेण तथैव दिशोप्यनुवीक्ष्य मित्रस्य त्वा चक्षुषा प्रतिपश्यामि
यास्मान् द्वेष्टि यं च वयं द्विष्मस्तं चक्षुषा हेतुं छद्। अनेन मंत्रेण शिष्यः पुनरादित्यमीक्षेत अर्कदर्शने
दिशां दर्शने ब्रह्मचारिणः स्वमंत्राः पठनीयाः न त्वाचार्येण परिभाषोक्तमपि मंदबुध्यनुग्रहार्थं पुनः स्म
रयति। सर्वत्र मंत्रं पठित्वा कर्म कर्तव्यमिति मंत्राणां करणरूपत्वात्। करणं तु कार्यात्पूर्वभावि भवतीति
नियमात्। उक्ताचार्य इत्यादिना मंत्रान् भूमिमुपस्पृशत॥९६॥ अनुप्रवचनीयश्च कार्योयं मदं
दं उच्यते। महानाम्नीभ्यः स्वाहेति सा तत्र्यास्थानं इध्म इति॥९७॥ अस्यार्थः। अरण्यकांडउपनिषद्भा
गवेदांते भूमिस्पर्शने जपमंत्राः। भूमिस्पर्शे द्याईके इत्यादि अग्न इन्द्रान मइद्वानमऋषिभ्यो मंत्रकृ
द्भ्यो मंत्रपतिभ्यो नमो वो अस्तु देवेभ्यः। शिवा नः शंतमा भव सुमृडीका सरस्वती। मा ते व्योम संदृशि॥ म
इंकर्णेभिरित्येकः। भद्रं इद्राग्नी इत्येकः। उपनिषच्छब्देन वेदांत विभागः। मंत्रब्राह्मणयोर्वेद नामधेयमि
ति सर्वेषामपि वेदानां मंत्रविभागः संहिताविभागो ब्राह्मणविभागश्चेति वेदभागद्वयं नोच्यते। तत्रापि
कर्मकांड ब्रह्मकांडात्मक ब्राह्मणे ब्रह्मबोधनाय प्रवृत्तस्य ब्रह्मकांडस्य उपनिषच्छब्दवाच्यतो। अर

Indira Gandhi National
Centre for the Arts

ण्यकं चेति। तत्र उपनिषज्जपे आरोहे उक्तमंत्रैर्भूमिं स्पृशन्नेव उक्तमंत्रांज पित्वा उपनिषदं पठेत्। उपनिषत्
स्विलिंगः। आरोहतान्व्यक्तमनुसरामः। स्फुषेजनमित्यपरः। कयानश्चित्र इति त्रयो मंत्राः। स्योना पृ
६० थिवीत्येकः। ततस्तैत्तिरीयमंत्राः। उदितःशुक्रियं दधे। तमहमात्मनि दधे। अनु मामैतु इंद्रियं। मयि श्रीर्मयि य
शः। सर्वसप्राणः सबलः। उच्छिष्ठाम्यनु माश्रीः। उत्तिष्ठन्तु मा यंतु देवताः। अदब्धं चक्षुरिषितं मनः। सूर्ये
ज्योतिषां श्रेष्ठो दीक्षे मा मा हिंसीः। ततस्तच्चक्षुरिति भूमिं स्पृशन्नेव एतान्मंत्रान्पठित्वा आसने सायं संध्या
वंदनं विधाय अग्निकार्यं च कृत्वा पूर्ववदनुप्रवचनीयहोमं कुर्यात्। ततः सावित्र्याः स्थाने महानाम्नीभ्यः
स्वाहेत्येतावानेव विशेषः। अत्राहाचार्यः। स्मृतिरूपेण। सर्वत्र वपनं शस्तं तद्व्रते भूपनीतिवत्। वपना
दिप्रदानांतं कृत्वा कर्म व्रतेषु तु। तद्व्रतं वर्षमात्रं च चरस्वेति विनिर्दिशेत्। चरिष्यामीति शिष्यस्तु व्रतं नाम्नी
वरेद्गुरुः। दिवाब्रह्मौदनं कृत्वा चरेत्संवत्सरं व्रतं। देवतायतनं गत्वा नदीतीरमथापि वा। क्षेत्रं वनं वाप्य ग्राह्यं प्र
थमं श्रावयेद्व्रतं। उक्ताश्चैते महानाम्न्याः क्रियाः सम्यक्तथापि चेति। कुसराद्यकरणे फलमाह स एव। प्राश्न
णांते तिलान्क्षिप्त्वा तंडुलैः श्रपयेच्चरुं। तृप्यंति कुसरान्नेन महानाम्न्युक्तदेवताः। सर्वे हविःशेषभोजने कारण
माह स एव। आत्मनो यत्तु पर्याप्तं हविः संश्रपयेद्द्विजः। तावदेव महानाम्न्या भुक्तात्तत्र न शेषयेत्। व्रतिना भुक्तशि ६०
ष्टान्नं भोक्तुं नार्हति कश्चन। स्कंभस्त्वा यन्तस्तस्मात्सर्वं मश्नाति हि स्वयमिति। अंजलिसेचने कारणमाह स एव। रवेर्व्रतपनेस्त

स्तेयेत्वत्तस्य परिपूर्तये। भुक्त्वा पानीयांजलिं पूर्णं शिष्यः सिंचति मंत्रवित्। गुरुश्च तत्सह अ
यान्मंत्रं भोनोः कृतांजलिः। संमीलनं वाग्यमनं शिष्यः कुर्यात्तत्परं। संमीलनादौ कारणमा
ह स एव। आलोक्यालोकनेनासीद्भाषणाच्च भाषणात्। तद्दोषस्यानुपपत्त्यर्थं मौनं संमी
लनं भवेत्। कर्तव्यतां महानाम्न्यां मौनस्याहुर्द्विजातिनः। दुष्टदर्शनवर्जं वा दशकं वा च वत्स
रं। एकरात्रं त्रिरात्रं वा यथोक्तत्त्व प्रसिद्धये। तस्मात्संमीलनं कार्यं तथा वाग्यमनं तथा॥ स
मुखशिरोवेष्टने कारणमाह स एव॥ व्रतीरैशाद्यः प्रभृतिः श्रवणांतं यदाश्रुचिः। कंठादूर्ध्वं स
माश्रित्य वसंति व्रतिनं क्रूराः। केशान्वसंति वसवो रुद्राः श्रोत्रे च चक्षुषी। आदित्या नासिका
द्वारे वषट्कारश्च कस्तथा। व्रतिनो गात्रजं तोयं पातुकामा इमे क्रूराः। त्रयस्त्रिंशद संस्येव महानाम्न्याः
प्रभावतः। तेषां संत्राणनार्थाय वेदत्रयमनुस्मरन्। अहतेनांबरेणात्र वेष्टयेत्समुखं शिरः। दर्शनार्
हितानां च दुष्टानामाहतेनैर्णां। वस्वादयः क्रूरास्तस्माच्छिरसो वेष्टनं भवेत्। शुश्रूषा सिद्धये तस्य गुरो
रादौ महर्षयः। आत्मनोपायनार्थं च चक्रिरे नुग्रहं महत्। संमीलनादौ तु कालविशेषमाह स एव। संमी
लनं वाग्यमनमुष्णीषेण च वेष्टनं। एकरात्रं त्रिरात्रं वा नद्व्रतांते चरेदिति। क्रूराणां मानतृप्त्यर्थं तथा कु

Indira Gandhi National
Centre for the Arts

चेतिरेहि द्विजाः। व्रतस्य श्रवणेनैव देवानां संप्रियो भवेत्। तथा संवत्सरं सर्वमशक्तो वा प्रवर्तितुं। त्रिरात्रं
चैकरात्रं वा यत् कार्यमिति स्थितिः। एवंभूतोऽस्य यत्कालो भवेतिगुरुणो दिनइति। अनंतरं कर्तव्य
६१ माहस एव। संध्यात्रयं तथा भूतः कुर्यान्नान्यत्तु किंचन। एकरात्रं त्रिरात्रं वा नयेदुपविशन् द्विजः।
नशयीत नचोत्तिष्ठेदन्ते संध्याचैमौदतः। अथ रात्र्यां व्यतीतायां संध्यामात्रमुपास्य चानथो भूत
स्तदानेव कुर्यात्स्नानादिका न क्रियाः। वत्सतरीबंधने कारणमाह स एव। रक्षां वत्सतरीतां वत्सं
स्वरूपां त्रिहायणीं। वायव्यां दिशि बध्नाति महानाम्न्या असंश्रवे। घ्नन्ति तु पशूनां सा रक्षा वत्सत
री मता। देवानां सुप्रिया सा तु सुपेरूपं निगद्यते। योगिनो मुनयः शांताः पिशंगा ऊर्ध्वरेतसः। शुद्धामा
श्रियतां वस्तु भिक्षं तेवा समाश्रिताः। पश्चिमोदकसमुद्रे तु गिरिर्नाम्ना प्र[illegible]जनः। प्रभंजनाश्रयः श्रीमा मं
न्वसत्यमरसंश्रयः। नानाश्चर्यमये तस्मिन्वायुः पुरवरोत्तरे। जगत्प्राणो वसत्येव भुवनाह्लादकार
कः। तस्मिन्वसंति मुनयो योगसिद्धा महोजसः। योगशास्त्रप्रणेतारः पिशंगा नाम योगिनः।
तेषां कश्चिन्नवानादौ वायुर्वायव्यमुत्तमं। पुराणं शिवदं साक्षात् शिवमाहात्म्यसूचकं। तेपिश्रोतुम
हानाम्नीं व्रतं द्रष्टुमेव वा। अयास्यंति महात्मानस्त्वाद्रिरेरूर्ध्वरेतसः। विश्रामार्थं प्रवद्धा। ते तेषां वत्स ६१
तरी द्विजः। तस्यां दिशि व्रते तस्मिन्नस्यामश्रवणे तदा। अश्राव्यतां महानाम्न्यास्त्विभिश्चापित

था तदा। असंश्रवे तां बध्नाति शुभ्रां वत्सतरीं द्विजः। नेच्छंति तामृते वत्सं किंचिदन्यदिहासनं। स शुद्धत्वा
द्वायुभूतास्ते शुद्धां श्रमसचारिणः। तां मध्ये गुरवेदद्यात् इक्ताभावे सितापि वा। हरस्त्वेमापतेश्च त्वानस्य
द्रास्यं तिर्वा स्थितं। महानाम्नीपठनकाले गुरुशिष्ययोरन्योन्यपृष्ठभागसंधाने कारणमाह स एव।
ततो पराजिता दिशायां विधाया न्यं यथाविधि। पर्युक्षणां तंतस्य कृत्वा प्रपविशेद्गुरुः। मुखवासः
समुपूय मुखं प्रक्षाल्य वारिणा। अग्निं प्रदक्षिणीकृत्य गुरुश्चैवाभिवादयेत्। पृष्ठेन पृष्ठं संधाय गुरोरा
स्थान एव च। इक्षन्तु पदीशा राक्षसीसयत्नस्थितः। स क्रियाच प्रतिष्ठा च देवानामपराजिता। गुरु
स्तन्मुख आसीनस्संशृण्वानो गुरूदितं। देवाश्च ऋषयश्चास्यां दिश्येते निवसंति हि। श्रोतुकामा
महानाम्नीभृताः स च किंतारतदा। तेषां संत्राणनार्थाय अस्करणां तथैव च। नेत्राग्निर्दहा नीक्ष्णा
सीताशं चैनेकृती। मृतकल्यान कुप्यंति निश्चेष्टाश्च तिनेक्षिताः। निवर्तयितुं व्याधितुं देवानशक्ताः स्कः
स्करेतराः। देवान्सा गुरुराशास्थ नीक्ष्णसश्रावयेद्गुरुः। मानयन्निव गान्भनुष्यात तनूप्ये भूयतस्तदा। अं
तरेण समायातुं केचिदिच्छंति राक्षसाः। तावत्तु व्रतलोपार्थं मायया गुरुशिष्ययोः। तेषां निरसना
र्थाय संधीयते त्र पाश्चिमा विधिः। व्रतलोपप्रश्नादौ कारणमाह। वसिष्ठाद्व्रतपूर्वस्य व्रतिनो नान्यथा
कृतं। स्थापनादनुतापनद्दोषसक्षीयते कृतः। यस्मात्तस्मात्तु गुरुणा पृष्ठो लोपे न तप्यते। स्वः सर्वा

Indira Gandhi National
Centre for the Arts

सकृत्वा तु ते च पश्चिमतः स्थिताः। अस्कृतादि विभ्रमोचाविचरंति स्वमायया। एवं ज्ञात्वाचरेत्कर्मकार
णानि ह विनमः। श्रोतान्स्मार्तांश्च मिश्रांश्च कुर्यात्स्कंदसिद्धये। रहस्यमस्मद्गुरोस्तत्रूपे च विंशति
६२ कर्मणां। उक्तमिति शेषः। अत्र हविःश्रपणविशेषमाह। हविरेकादशपर्यंतं विहितं स्वत्रैकृमि। ब्रह्मोद
नं तु विहितं तद्धविः सम्यक् हि पुरुषमिति। महानाम्न्यास्तु विदा मघवन्नित्याद्या ऋचः। एवा ह्येवेवा ह्याग्ने
त्यादि नव पुरीषपदानि त्रिवारं ब्रूयात्। तथा च शौनकः। तृतीयारण्यकस्यांते समाम्नातास्तु या ऋचः।
विदा मघवन्विदा गातुमित्युपक्रमसंयुताः। ता महानाम्न्य इत्युक्ताः पुरीषपदसंज्ञकैः। एवा ह्येवादिभिः
सार्द्धं संमीलितविलोचनं त्रिरनूच्याथ शिष्यस्येति। इति महानाम्नीव्रतं॥ ७॥ अथ महाव्रतं॥
महानाम्नीव्रतं प्रोक्तं महाव्रतं तथोच्यते। पूर्ववद्व्रतमाचेष्ट संवत्सरमिदं चरेत्॥ १८॥ पूर्णे संवत्सरे देशे
विविक्ते उपविश्य च। प्राङ्मुख आवपस्येनं महाव्रतमतः परं॥ १९॥ अनुप्रवचनीयादि कुर्यादर्के सपा
दिकं॥ महाव्रताय स्वाहेति सावित्र्याः स्थान इष्यते॥ २०॥ अस्यार्थः। महानाम्नीव्रतमुक्त्वा महा ६२
व्रताभिधेयं व्रतांतरमिदानीमुच्यते। व्रतस्वीकृते सति महानाम्नीव्रतरीत्या संवत्सरमाचरेत्।
अस्य व्रतस्यापि स्वीकरणप्रकारस्तु महानाम्नीव्रतस्वीकरणप्रकार एव। पूर्णे हि तथैव विविक्ते दे
शे प्रागग्रेषु दर्भेषूपविश्य आचार्यः ब्रह्मचारिणं महाव्रतमाश्रावयेत्। ओसन[illegible]गश्रावस

दित्यर्थः। आवयेदित्युक्तत्वाद्ब्रह्मचारिणो नात्र पाठः। किंतु श्रपणमात्रं न कारयित्वा पूर्वोक्तैरेवमं
त्रैः पूर्ववदाज्यमभिस्रयेत्। आचार्यशिष्यावपि पूर्वोक्तमंत्रान्जपित्वा पूर्ववद्भूमिं स्पृशेतां। पूर्ववदनु
प्रवचनीयहोमार्थमभिक्षित्वा तद्गुरवे निवेद्य पक्वाहोमं करोति तत्र स। विश्वास्थाने महाव्रताय स्वाहे
ति जुहुयात्। एवं होमशेषं समापयेत्। अत्र मगेयात्। महाव्रतेपि प्रथममंत्रादेशेन माचरेत्। पूर्णे
वे विजने शुद्धे देशे या मार्द्द द्वहिर्भवेत्। प्राक्कूलदेशे आसीनं प्राङ्मुखं संयतं गुरुः। शिष्यो भिवा
द्यमथ मंत्रोतु कामं महाव्रतं। मो इत्युक्त्वा चत्र्यथ ममा वायो नदनंतरं। अनुब्रूहीति वदनु या वित्तात
समीपतः। आसीनं प्राङ्मुखः शांतः प्राक्कूले दर्भसंस्तरे। प्रार्थितस्त्विरनुब्रूयादाचार्यो व्यमहाव्र
तं। इंद्रोपक्रमसंयुक्तं प्रथमारण्यकश्रुति। मित्रस्यत्वादिभिर्मंत्रैः पूर्ववदर्कैमीक्षयेत्। जपित्वा
मंत्रसंघातमुभावग्रदृक्का दिकं गुरुशिष्यौ स्पृशेतां वेयथापूर्वं महीतलं। अनुप्रवचनीयं च पूर्वव
दनुद्रुत्याथ। महाव्रताय स्वाहेति द्वितीयो मंत्र इष्यते। इदमत्र गत्य। समानसंभारवर्जमेष द्वयोः
स्वाध्यायधर्म आचार्यवदेकः फाल्गुनायां श्रवणायां अनधीतपूर्वाणामध्यायसो व्याध्यायधीतपू
र्वाणामधीतपूर्वाणामिति। अस्यार्थमाह वृत्तिकृन्नारायणः। यदिह महानाम्न्यध्ययनं संनिधिके
मुक्तं तत्साम्य उत्तरयोरपि महाव्रतोपनिषदोराख्यायोर्व्रतमनुयुज्य श्रवणात् महानाम्नीव्रतेन स

Indira Gandhi National
Centre for the Arts

मानरूपं कर्तव्यं । अयमेव योर्विशेषः । पूर्वस्मात्संभारवर्जमिति । संभारो नाम औषध्वहि ग्रामादित्यारभ्य
पुनरादित्यं मित्रस्य त्वा चक्षुषेत्येवं मंत्रेन तद्द्यित्वेत्यर्थः । एतदुक्तं भवति । महाव्रतोपनिषदारण्याययोर्व्रत
६३ मनुपुन्यसंवत्सरादूर्ध्वमुदगयने पूर्वपक्षे ग्रामाद्बहिर्गत्वा श्रवणांतमेव कर्तव्यं । नान्यद्धोमादीनि । ए
एवं महाव्रतोपनिषद्व्रतयोरध्ययनविधिर्व्रतमनुपुन्यसंवत्सरं चारयित्वोदगयने पूर्वपक्षे ग्रा
माद्बहिर्गत्वा आचार्यसकाशात्त्रिः श्रुत्वानुप्रवचनीयं चरुं कृत्वा ततोऽध्ययनं कर्तव्यमिति । एतद्दिन
यारध्ययनं संपादनीयमित्यर्थः । अयमिति विशेषो महाव्रतोपनिषदोरध्ययनं भवति यद्येकाधीतृशि
षः । तदा आचार्यवद्वृत्वा अधीयत यथाचार्यो पुराजितायां दिशमभिसमीक्षमाणो ब्रूयात् । एवमके
अच्छिद्यस्तामेव दिशमभिमुखोऽधीयीत । यदि द्वौ बहवो वा तदानायं नियम आदरणीयः । अत एवं तत्
ज्ञापेत एकाहो बहवो वाधीयीरन्निति । अध्ययन एवायं नियमः । श्रवणत्वेकदेश एव व्रतादेशोनादरन्तु
प्रवचनीयानां स्यसंस्कारातेस्य न सिद्धो प्रमाणाभावात् । एषाम्महानाम्न्यादीनां अध्ययनकाल उच्य
ते । श्रवणमात्रमेव कृत्वा एवमनधीतवंतो यतेषामयं कालः । फाल्गुनमासमारभ्याश्रावण्याः पौर्णमास्या ६३
यः कालः सर्वेषामध्ययनकालः । यधीतं पूर्वोक्तं अस्मिन्काले धीयीरन् । तिष्यपूर्णमासी पूर्वावधिः श्राव
णपौर्णमासी परावधिर्यस्य कालस्य स काल इत्यर्थः इति ॥ इति महाव्रतं ॥ ॥ अथोपनिषद्व्रतं ॥

श्रावयित्वोपनिषदमादित्यावेक्षणादिकं । अत्रोपनिषदे स्वाहा सावित्र्याः स्थाने इष्यते ।२१। अस्या
र्थः । तथैव ददात्यंते उपनयनवत्कृत्वा न दण्डमौञ्जीनवं दद्युः तथैव दत्वा स्विष्टकृदादिहोमशेषं समा
प्य । उक्तनियमान्पालयन्वर्तयेत् । तत्र पूर्णे हि उक्तकाले ग्रामाद्बहिः शुक्लप्रदेशे गत्वा महाव्रतव
त्स्थित्वा आचार्यं प्रति माणवको ब्रूयात् । भो उपनिषदं ब्रूहीति । ततस्तु आचार्यो माणवकं अथातः
संहिता उपनिषदिति तृतीयारण्यकश्रुतिमुपनिषदं त्रिरनूच्य पूर्ववदर्कमीक्षयेत् । ततो माण
वकः सायंकाले दनुप्रवचनीयहोमं करोति । तत्र सावित्र्याः स्थाने उपनिषदे स्वाहेति जुहोति । इयान्
विशेषः । अत्र भगवान् । व्रतादेशेन पूर्वं यत्कृतं कर्म महाव्रते । सकलं तदनुष्ठेयं तथैवोपनिषद्व्रतो
अत्रोपनिषदं भो स्वनुब्रूहीति याचितः । आचार्यो थात इत्याद्यां तृतीयारण्यकश्रुतिं । त्रिरनूच्या
पूर्ववच्चार्कमीक्षयेत् । अत्रोपनिषदे स्वाहा अनुप्रवचनीयके । द्वितीयो होममंत्रः स्यादन्यत्सर्वं यथापुर
ति । अत्र मौञ्जीदण्डादिषु विशेष उच्यते पाराशरेण । यदस्य विहितं कर्म पत्सत्र यान्यमरयःळा । योदगप
अवचनं तत्तदत्र व्रते षपीति ॥ इत्युपनिषद्व्रतं ॥ अथ गोदानव्रतं ॥ ॥ गोदानं चौलवत्कार्यं षोडशेन
उच्यते । अंकोपवशनं नास्ति श्मश्रूणां मुण्डनं भवेत् ॥२२॥ अदितिः श्मश्रूणि वपत्वापं दंतु वर्चसे
पिंतूऽदिनिधानीतं श्मश्रुपक्षे भवेदिह । निर्मार्जनं विशेषोऽयं श्मश्रूणि च शिरो मुखं ॥२३॥

Indira Gandhi National
Centre for the Arts

अस्यार्थः। गोदानाख्यं चौलकर्म चौलकर्मप्रकारेण कर्तव्यं तत् षोडशे वर्षे कार्यमित्युच्यते। तत्रोपलेपनाग्नि
पत्रा प्रतिष्ठादि प्रधानहोमान्तं विधाय तथैव शीतोष्णाभसीपात्रे युगपत्प्रासिच्य क्रेदनादि कुर्यात्। तत्र विशेषः। तृ
६४ तीयेन वर्षे यद्विहितं चौलं तत्रयाविहिता इतिकर्तव्यता सात्र कर्तव्येत्यर्थः। तत्तु तृतीये वर्षे विहितं इदं तु षोडशे
विधीयत इति। अस्मिन् गोदानकर्मणि कश्चन विशेषः। अत्र अंकोपवेशनं मातुरुत्संगोपवेशनं तन्नास्ति। चौ
ले सोदकेन नवनीतेन वा मतः। कर्णप्रदेशमारभ्य शिरस्त्रिरुन्दनं भवति। तत्स्थाने इह श्मश्रूणां मुण्डनं भवति। इ
याने व विशेषः। अत्र सोकायार्थं श्लोकप्रकारेण स्वयमेव मंत्रं वदर्शयाते। अदितिः श्मश्रूणि वपत्वापउंदंतु
वर्चसइति मंत्रेण श्मश्रूणां वाम प्रदेशमारभ्य तथैवाद्रीकरणं भवति। पिंजूलादि निधानान्तं नाम ब्रह्महस्तास्थि
वर्चस इति मंत्रेण प्रद
तेषु कविंशति कुरेषु त्रिनं कुरादौ नोयकु माराभिमुखं पश्चिमाग्रान्कृत्वा ओषधे त्रायस्वैनमिति मंत्रेण सश्मश्रुका
क्षिणश्मश्रुभागे निधाय तेषंकुरेषु क्षुरं स्वधिते मैनं मितिमंत्रेण निधाय येनावपदिति मंत्रेण सश्मश्रुका
न्कुशांकुरांश्छित्वा तानंकुरान्प्रागग्रान्कृत्वा शरावाशमीपर्णान्यादायते सहैकीकृत्य मातुः करे दद्यात्। साचमा
ताता न् सश्मश्रू शमीपर्णकुशांकुरानानडुहे गोमये प्रागग्रं निदध्यात्। एतदेव निधानान्तं श्मश्रुपक्षे भवेत्। इ ६४
हगोदानकर्मणि क्षुरमार्जने अयं विशेषः। यत्क्षुरेणास्मिन्मंत्रे प्रथमार्धान्तं उत्तरार्धश्चैनं पठनीयः। वपा
वप सि श्मश्रूणि शुंधि शिरो मुखं इति पठन्नवमृज्यादित्यर्थः। शासने नापितस्यायं विशेषः प्रेष उच्यते॥२४॥

केशश्मश्रुलोमनखान्युदकसंस्थानि कुरु विंति। अस्यार्थः। नापितमाहूय प्रेषविशेषेण तं शिक्षयेत्। शीतो
ष्णाभिरद्भिरवर्थकार्याणोक्षण कुशली केशश्मश्रुलोमनखान्युदकसंस्थानि कुर्विति। अयमेव नापितशा
सनप्रेषविशेषः केशादीन्युदकसंस्थानिवापयित्वा स्नानमाह। स्नात्वा च वाग्यतः शेषमहः शेषं नयेदथ॥२५॥
आदित्ये स्तमिते वाचं विसृजेताति केगुरोः। उक्त्वा वरं ददामीति दद्यादो मिथुनं तत इति॥२६॥ अस्यार्थः। वप
नानंतरं स्नानं कृ। त्वास्मिन्दिन कुदादिहोमशेषं समाप्य मौनी भूत्वा दिनशेषं तिष्ठन् येत्। आदित्ये गुरोरंतिकं गत्वा
मौनं विसृज्य भो आचार्य त्वदर्थमपेक्षितं वरं ददामीति वचनं उक्त्वा आचार्याय गोमिथुनं अनड्वाहं गां च दक्षि
णात्वेन यावित्त्वाच्च दद्यात्। स पूर्ववद्व्रतादेशः संवत्सरमिदं चरेत्। व्रते व्रतेषु सर्वेषु प्रसिद्धं केशधारणं॥२७॥
अस्यार्थः। स व्रतादेशः पूर्ववद्भवति आदेशो नाम आज्ञारूपोर्थः। इदं गोदानव्रतं संवत्सरपर्यन्तं चरति गुरुरा
दिशति। अयं व्रतादेशः तेन च व्रतं ब्रह्मचारी संवत्सरपर्यन्तं चरेत्। सर्वेषामपि महानाम्न्यादिषु केशधारणं प्रसि
द्धं। कर्मांगत्वेन वपनं भवति स्वेच्छया न कार्यमित्यर्थः। अत्र भगवान्। गोदानं नाम यत्सोपं चतुर्थं व्रतमस्य
तु। महानाम्न्यादिभिः सार्धं पोवांपर्यं तु विद्यते। अवालत्वाज्जनन्यं कोनिवेशो प्यस्य नेष्यते। केशशब्दोपि
देशेषु श्मश्रुशब्दमुदीरयेत्। श्मश्रूणामेव संसेको त्र न केशानामिति रितं। केशांश्च पविंसत्रापि श्मश्रूणीति
समीरयेत्। केशपक्षे तु कर्तव्यं श्मश्रुपक्षे न दाचरेत्। क्षुरादिमार्जने मंत्रे यत्क्षुरेणादि केष्वपि। श्मश्रूणि

Indira Gandhi National
Centre for the Arts

६५ ऽधीत्य कृत्वार्थं शिरोमुखमुण्डीरयेत् । यशीतोष्णाभिरित्यादिमंत्रेणापि तत्रासनः । तत्र केशश्म
श्रु लोमनखानीति पक्षांतरे उदकसंस्थानि कुशपिंडीकृत्य उदुंबरमूले रयेत् । ततः स्नातेः समीपस्थ
तस्मिन्नुस्थिष्ठ कुद्दादिकं । उपरिष्टादनेन गमाचार्यस्य समीपयेत् । शिष्यः स्नात्वा ततावाचा नियम्या
दिव सक्षयात् । तिष्ठदस्तमितं सूर्यं गुरोरंतिकमागतः । वरं ददामीत्युक्त्वा च गोवृषं वा गुरवे दिशेत् । असं
भवे गोवृषयोर्भिक्षित्वा वा गुरोर्दिशेत् । उत्तरत्र गुरुस्तस्य वस्त्रं व्रतमादिशेत् । सर्वास्य व्रतं च यत्सप्र
सिद्धं केशधारणमिति ॥ इति गोदानव्रतं ॥ ॥ अथ समावर्तनाख्यं कर्म ॥ ॥ गुरवे तु वरं दत्वा स्नायी य
त तदनुज्ञया । वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वा । व्रतपक्षे तु गोदानार्थमारण्याध्ययने कृते ॥ २८ ॥ वि
द्यांते गुरुमाहारं कथमर्थं करवाणि ते । यमर्थमाह तं दत्वा तेनानुज्ञामवाप्य च ॥ २९ ॥ आचार्याय स्वमेनं चे
द वमण्यादीन्प्रकल्पयेत् । आचार्यो येव कल्पितेन उभे ते भयो यदीति ॥ ३० ॥ अस्यार्थः । समावर्तनं वक्तु
मादौ तस्य समयमाह । वेदशब्देन चत्वारो वेदाः प्रदृश्यंते चतुर्णामपि वेदानां पाठः कार्यः । चतुर्णां तेषां मो
त्रयाणां द्वयोरेकस्य वा पाठः कार्यः । वेदशब्दस्य कस्त्र प्रयोगात्स्वशाखोक्त वेदस्यावश्यत्वे केन पाठो ६५
ऽभ्यसेत । वेदानां पारं नीत्वा अथवा महानाम्न्यादीनां चतुर्णामपि व्रतानां पारं नीत्वा उभयोर्वे
द व्रतयोर्वा पारं नीत्वा । व्रतपक्षेपि यदा केवलं व्रतानामेव पारं नीत्वा स्नायात् । तदा गोदानार्थं ज्ञानेप

र्यंतं पठित्वा कर्मनिर्वाहार्थं विद्यांते आरण्याध्ययने कृते सति स्नानं करोति तदा विद्यांतता । स्नातकस्तु
त्रिविधः । विद्यास्नातो व्रतस्नातो विद्याव्रतस्नातश्चेति ॥ गुरूपासनं यावद्यथावद्बोधापर्यंतं
वेदशास्त्राभ्यासं कृत्वा दक्षिणादिभिस्तोषितेन गुरुणाभ्यनुज्ञातः स्नानं करोति स विद्यास्नातः
महानाम्न्यादि चत्वारि व्रतानि यथोक्तं चरित्वा व्रतांते गुरुणा स्नानार्थमभ्यनुज्ञातः स्नातको व्रत
च स्नातकः । विद्याभ्यस्य सम्यग्व्रतानि चरित्वा निलदंते स्नातको विद्याव्रतस्नातको भवति । विद्यांते व्र
तांते विद्याव्रतांते माणवको गुरुमाचार्यं पृच्छति । अहं तव अर्थं धनं त्वदर्थं किं करवाणि । इति शिष्य
णोक्तः । स गुरुः यमर्थमाह यादृशमर्थं याचते । तस्मै संपाद्य तत्सात स्माद्गुरोरनुज्ञामवाप्य स्नान
सामग्रीं संपादयेत् । तथा च शौनकः । अधीत्य वेदशास्त्राणि कृत्वा वेदव्रतानि च । चत्वारि गुरवे
दत्वा यथाशक्ति च दक्षिणां । ततस्तेनाभ्यनुज्ञातः समावर्तनमारभेदिति । आचार्यो विपद्येत च
तुरो वेदानत्रीन्द्वावेकमथापि वा । तोषयेद्दक्षिणाभिस्तु गुरुं भक्त्या विचक्षणः । धनं पित्रापि बंधु
भ्यः समाहृत्याथवा पुरात् । राजभ्यो वा गुरुं सम्यक् तोषयन्साधुको भवतीति । ३१ । गुरुदक्षिणादानम
नुः । अपूर्वं गुरवे किंचिदुपकुर्यात धर्मवित् । स्नास्यंस्तु गुरुणाज्ञप्तः शक्त्या गुर्वर्थमाहरेत् । क्षे
त्रं हिरण्यं गामश्वं छत्रोपानहमंततः । धान्यं वासांसि शाकं वा गुरवे प्रीतिमाहरेत् । इति प्रश्न तम

Indira Gandhi National
Centre for the Arts

नुसरति। तामेवसामग्रीं विकृणोति। आचार्यायात्मनेच मण्यादीन्याभरणानि उपकल्पयेत्संपादये
त्। यद्युभयार्थंसंपादितुमशक्तस्तदाचार्यस्यसंपादयेत्। इदमत्रगृह्यं। मणिं कुंडलेवस्त्रयु
ग्मं छत्रमुपानद्युगलं स्रजमुन्मर्दनमनुलेपनमांजनमुष्णीषमित्यात्मनेचाचार्यायच यद्युभ
६६ गं छत्रमुपानद्युगलं स्रजमुन्मर्दनमनुलेपनमांजनमुष्णीषमित्यात्मनेचाचार्यायच यद्युभ
योर्नविदताचार्यायैवेति। कुर्वितिस्वयमेवैतत्समावर्तनसंज्ञकं कर्मस्वयमेवकुर्यात्। इतिकर्त
व्यतामाह। प्रागुदग्याग्रानाध्मकृतमुक्तःस्वस्त्ययनंस्वयं॥३१॥ प्रागुदीचीस्वयंगच्छेत्तस्यांवैयज्ञि
यस्यया। शाखेशानींगतातस्यांछित्वाप्रादेशसम्मितां॥३२॥ आहृत्यसमिधंभूमेरन्यत्रनिदधी
त। स्वांदत्वागांभोजयाद्द्विजान्गोदानोक्तंकरात्यथेति॥३३॥ अस्यार्थः। उदग्ययनाद्युक्तकालप्राप्य
तिस्त्रांदत्वागांभोजयाद्द्विजान्गोदानोक्तंकरोत्यथेति
स्वयमुक्तस्वस्त्ययनः ब्राह्मणैःस्वस्तिवाचनंनांदीश्राद्धंचस्वयमेवकृत्वाकर्मारंभात्। अतएव
स्मृत्यंतरे। आसमावर्तनात्पूर्वंपिताकुर्यात्तुनांदिकाःसमाहृतःस्वयंकुर्याद्दाद्येपाणि[illegible]पितातो
ततःस्वस्तिवचनानंतरंस्वयमेवस्ववासोपक्षयाइदानीं दिशांगत्वातस्यांदिशायांयज्ञियवृक्ष ६६
स्यईशानभागलग्नायाःशाखायाःतस्याःप्रादेशमात्रांमेकांसमिधांसमिधंछित्वा
तांगृहीत्वास्वमंदिरमागत्यतांसमिधंभूमेरन्यस्मिन्स्थलेकस्मिंश्चदुपरिप्रदेशेनिदधी
त। तत्रसमिल्लक्षणेगृह्योक्त्या बुधमेनाद्येकामःपुष्टिकामस्तेजस्कामोवाब्रह्मवर्चसकामि।

मउपवातामुभयीमुभयकामइति। अस्यार्थः। महानारायणः। उपवाताशुष्कायामित्यर्थः। एकोभागः
शुष्कःअपरआर्द्रः आर्द्रवाभवेत्। अथकर्मांगं द्विरावभ्यप्रानायम्यतिथ्यादिस्मृत्वाआत्मनःव्रतस
मापिंकृत्वासमावर्तनकर्माधिकारार्थंइमांगांअस्मैब्राह्मणायसंप्रददे। तथैवगोदानस्मृतिप्राणनां
दीश्राद्धंकृत्वाकर्मांगत्वेनब्राह्मणभोजनंकृत्वागोदानोक्तंकर्मकरोति। गोदानकर्मणियादृशीइति
कर्तव्यतासैवात्रापिकर्तव्येत्यर्थः। गोदानवर्जंतुचौलसदृशंभवति। ब्रह्मचारीकर्मांगं द्विरावभ्यकुशा
स्तृतेआसनेउपविश्यप्राणानायम्यतिथ्यादिस्मृत्वाआत्मनःभार्यासंग्रहादिअधिकारार्थंसमावर्तनंक
र्मकरिष्ये। तत्रादौरुद्रिलोपलेपनादिअग्नआयूंषीतितिसृभिःप्रजापतेनेकेस्याचप्रधानहोमंतं
दृगंगोदानवत्कृत्वा। चौलकर्मवद्गोदानोक्तंसर्वंसमावर्तनेपिभवति। अस्मिन्कर्मणिगोदानाद्ययनमा
जेनादिमंत्रेषुकेशान्विशेषद्रष्टव्य। [illegible] पादान्यूह्यानिवक्ष्यात्रवाच्यंत्रायस्वमामितिमामाहिंसीरितिब्र
याद्यथासमितिवापरं॥ तेनमआयुषेसेवमृह्यमंत्रद्वयेपिच। मामआयुरितिचान्यत्सर्वंगोदानवद्
वेत्॥३५॥ अस्यार्थः अत्रसमावर्तनाख्येकर्मणियान्यूह्यानिपदानिऊहानामऊहनामउचितपदप्रक्षेपः।
नादृशानिपदानिअत्रवक्ष्मीतिग्रंथकृदाह। तान्येवदर्शयति। ॐषधेत्रायस्वैनमित्यस्मिन्यकमित्यत्रमा
मित्यस्यपदस्यऊहःप्रक्षेपःकर्तव्यः। ॐ षधेत्रायस्वमामिति। स्वधितेमैनंहिंसीरित्यत्रमामाहिंसीरित्यू

Indira Gandhi National
Centre for the Arts

६७

हः। स्वधिते मामा हिंसीरिति जरदष्टिर्यथासादित्यत्र यथा समित्यूहः। तथा द्वितीयछेदनमंत्रेण तेन तः
आयुषे वपामीत्यत्र तेन म इत्यूहः। तृतीयछेदनमंत्रे पितेन म इत्यूहः। यत्क्षुरेणेति क्षुरधारा
मार्जनमंत्रे शुंधि शिरो मुखं मास्यायुरित्यत्र माम आयुः प्रमोषीरित्यूहः। अवशिष्टमन्य
त्सर्वं गोदानवद्भवेत्। प्रवापि गोदानवद्भवेत्। केश श्मश्रु लोमनखान्युदक्संस्थानि कुर्वीत। अभ
त्सर्वं गोदानवद्भवेतु। प्रवापि गोदानवद्भवेत्। करंजबीजं मंत्रकं पिष्टेनोन्मर्दयेत्। न तु शीताद्भिः स्ना
णं प्रैषनापितमनुशिष्यात्। वपनं चात्र भवति। करंजफलं एकं बीजं पेषायित्वा सर्वांगमु
न्मार्ज्यं तावद्यावत्स्नातकेतनइति ॥ ३६ ॥ यत्र यस्मिन्करंजफलं एकं बीजं पेषायित्वा सर्वांगमु
न्मार्ज्यं तावद्गच्छेत्स्नातकेतनइति ॥ ३६ ॥ यत्र यस्मिन्करंजफलस्य बीजं समीपमागत्य युवमित्यनया
द्धपेत्। ततः शीतोष्णैरुदकैः कृतः स्नानैः। अनंतरमाचम्य वह्निसमीपमागत्य युवमित्यनया
स्त्र आच्छादयेत्। तेन स्वयं। मन्त्रावृत्तिरियं दृष्टा वृत्तो नारायणस्य तु ॥ ३७ ॥ आचम्याश्मनस्तेजइत्या
द्यां सव्यमीक्षणं। एतेनैव तु मंत्रेण पश्चाद्दक्षिणमीक्षणं ॥ ३८ ॥ कुंडलं चाश्मनस्तेजइति श्रोत्रं मल
कुर्यात्। अनेनैव तु मंत्रेण पश्चात्सव्यमलंकुर्वीति ॥ ३९ ॥ अस्यार्थः। अग्निसमीपं गत्वा युवं वस्त्रा=
मीत्यनेन मंत्रेण अहतवस्त्रद्वयेन परिधानं प्रावरणं च भवेत्। अयमेव मंत्रः। परिधानप्रावरण
च वर्तते वृत्तिकारेणोक्तं स्यात्। मंत्रस्यावृत्ति दृष्टा नारायणवृत्तौ। वस्त्रधारणानंतरं द्विराच
म्य अश्मनस्तेजोसि चक्षुर्मे पाहीति मंत्रेण सव्यं वा मनेत्रं प्रथममंजेत्सकलं कुर्यादित्यर्थः।

उजे

अनंतरमनेनैव मंत्रेण दक्षिणनेत्रं सकृदंजनं कुर्यादिति। अश्मनस्तेजोसि श्रोत्रं मे पाहीति मंत्रेण श्रोत्रं कुं
डलं प्रथमं दक्षिणे कर्णे परिधाय पश्चादनेनैव मंत्रेण सव्यकर्णमपि सकुंडलं करोति। अत्र ग्रंथकारः क
थयति कुंडले अलंकुरु। अलंकारार्थं गृहाणेत्यर्थः। अत्रैव परिस्पंद एव्यं कज्जलेन प्रथमं वामनेत्रमंक्त
पश्चाद्दक्षिणमिति। कुंडलधारणे तु प्रथमं दक्षिणकर्णे धृत्वा पश्चात्सव्यकर्णे धारणं भवति। अत्रैव दर्पणा
वलोकनं कर्तव्यं। तथा चापस्तंबः। अथादर्शमवेक्षेत यन्मे वर्चः परेत इति। कुंकुमाद्यनुलिप्ताभ्यां पाणिभ्या
पूर्वमाननं। अनुलिप्येतरंगाणि पश्चात्प्रक्षालयेत्करावितिः ॥ ४० ॥ अस्यार्थः। कुंकुमादिमंगलसामग्री
मनुलेपनार्थमुभाभ्यां पाणिभ्यां गृहीत्वा आदौ मुखमनुलिप्य तदनेनैव मंगलद्रव्यानुलेपनेनैव सर्वा
गाण्युद्धर्त्य पश्चात्करौ प्रक्षालयेत्। यद्यनुलेपनं परकर्तृकमस्ति तु मुखावयह तथाप्यन्यस्य कृतमनुलेपनं वि
धिप्राप्तं स्वनेवानुलेपनं कर्तव्यमिति ज्ञायते। ब्राह्मणस्यादौ मुखानुलेपनं राजन्यो बाहू लिंपति वैश्य उ
दरं उपस्थं स्त्रीत्यादि गृह्यसूत्रे विशेषदर्शनात्। ब्राह्मणस्य मुखानुलेपनमादौ भवति। तथा च गृह्यं। अ
नुलेपलेपनेन पाणी प्रलिप्य मुखमग्रे ब्राह्मणोनुलिपेत् बाहू राजन्य उदरं वैश्य उपस्थं स्त्री। ति। अनातोसि
ति मंत्रेण बध्नाति शिरसि स्रजं। सकृदुक्तेन मंत्रेण रेवानामित्युपानहौ ॥ ४१ ॥ आस्याय छत्रमादद्याद्दिव
स्पृशासि मंत्रतः। गृहीत्वा वेणवं दंडं वेणुरस्यादि मंत्रतः ॥ ४२ ॥ कंठे मणिं प्रतिमुच्य सूक्तेनायुष्यमित्यथ ॥

Indira Gandhi National
Centre for the Arts

स्रुवर्णमणिरिहोत्तमणिरित्याहवृत्तिकृदिति॥४३॥अस्यार्थः।अनुलेपनानंतरंअनातांस्यनानेहिंभूयासमि
६० तिमंत्रेणस्रजंधारयेदिति अत्र मालाशब्दव्यवहारो न कर्तव्यः।तथाच शौनकः।तां स्रजे चेत्समादेन स्रुमाले
तिकेचन।तदेयतां स्रगित्येव माभिभाष्य।द्विजोत्तमेरिति।तथाच गृह्ये।स्रजं मा पिबध्नीत न मालोक्तां मालेतिवे
द्रयुः स्रगित्यपि धापयीतेति।येनकेन चिद्रभसेनादैविककर्मानभिज्ञेन अहोमालेयं धायतामिति उक्ते तदा
नीमेव वैदिककर्मकुशलेन मालेति ब्रुवाणं स्रकशब्दमभिधापयीत।ततः देवानां प्रतिष्ठेस्थः सर्वतोमापातमि
तिमंत्रं सकृदेव पठित्वा उपानहौ गृहीत्वा पादद्वयं करोति।ततः दिवश्छदासीति मंत्रेण वैणवं दंडं गृह्णी
यात्।अनेनरमासुष्यं वर्मास्मि सादि सकृत्पठित्वा कृतं मणिं बध्नीयात्।अत्र मणिशब्देन स्रुवर्णम
णिरभिधीयते इति वृत्तिकृदाह।नवांबरेण संवेष्ट्य शिरो थोपानहौ सृजेत्।आहुतां समिधं तिष्ठन् अ
त्राभायमंत्रतः॥४४॥स्मृतं च मइति नद्वयादस्मृतं चमइत्यथ।द्वादश्याघ्ने वनेवेक्षा यथापाठमथोत्तरं॥
४५॥मंत्रेणैवाविधानेनाप्याबाहुतायां समिसधानि।अस्यार्थः।नवेन धौतेन वस्त्रेण शिरः सर्वं सुवेष्टि
त्वासर्धः।अथ उपानहौ सृजेत्।होमाधिकारार्थमितिशेषः।ननु उपानहौ विसृज्य समिदाधानं
कार्यं तथाच गौतमः।सोपानत्के आचमनाभिवादन नमस्काराञ्च र्जयेदिति रेवं तानमस्कारस्यापि ६०
तावत्सानिषेधः।किंपुनर्होमादीनां।ततः पूर्वयज्ञवृक्षस्य आहुतां समिधं गृहीत्वा तिष्ठनेव स्मृतमित्यादिकं

मंत्रंपठित्वातां समिधमग्नौ जुहुयात्।तत्र मंत्रं।स्मृतं निंदा च विद्या च श्रद्धा प्रज्ञा च पंचमी।इष्टं दत्तमधी
तं च कृतं सत्यं श्रुतं व्रतं।श्रुतं च मे अश्रुतं च मे तन्म उभयव्रतं।निंदा च मे अनिंदा च मे तन्म उभयव्रतं।अनयैव
रीत्या उत्तरत्रापि द्वादशसंख्याकान्यपि पदानि सूत्रोक्तपाठक्रमेणैव पठित्वा समिधमग्नौ जुहुयात्।उ
पविश्य दशादध्यादन्याः प्रादेशसंमिताः॥४६॥अत्रोपवेशनं चाहवृत्तिकारः सहेतुकं।नेति।अस्यार्थः
ततउपविश्य अन्याः प्रादेशसंमिताः समिधः वक्ष्यमाणा दशभिर्मंत्रैर्जुहोति।दशसमिदानयनं पूर्वका मपि
र्यमिति ज्ञातव्यं।अत्र वृत्तिकारः।दशसमित्होमे उपवेशनं सहेतुकं चाह।तत आहुतिषट्समिधमादध्यादि
ति प्रकृते पुनरादध्यादिति वचनं पूर्वाधिकारान्निवृत्त्यर्थं तेनोपविश्यादध्यादिति ब्रूमः।अस्मिन्समये मेखला
ब्रह्मचारिणे दद्यात्।उदुंबरमूले कुशस्तंबं वा स्थाप्य।तत्रापस्तंबगृह्ये।जघनार्धे व्रजस्योपविश्य मेख
लां ब्रह्मचारिणे प्रयच्छति।तां स उत्तरेण यजुषोदुंबरमूले दर्भस्तंबे वोपगूहति।स्कबाधिकारिका
यामपि।उपविश्य ऋजे दद्यान्मेखलां ब्रह्मचारिणे।दर्भस्तंबे निदध्यात्तां यथैरामिद्रमादितेति।अत्रा
नुक्रमपि परशाखीयं ग्राह्यमिति वचनात्।अथ द्वादशसमिद्धोममंत्रानाह।ममाग्ने दशभिः कुर्वन्स्वा
हाकारमृगंततः॥४७॥परिषेचनपर्यंतं कुर्यात्स्विष्टकृदादिकं।स्वाचांवाग्यतइत्यादिनकार्यमिदंक
र्मणीति॥४८॥अस्यार्थः।ममाग्ने इत्यादि दशभिर्मंत्रैः क्रमेण दशापि समिधो जुहोति।कृगंततः कृ

Indira Gandhi National
Centre for the Arts

चो नैव स्वाहाकारं प्रयुंज्य जुहोतीत्यर्थः ॥ द्विविधो हि होमो भवति क्वचित् स्वाहाकारेण सहिता आहुतिप्रक्षे
६९ पः क्वचित् स्वाहाकारं विनैव होमः यत्र सूत्रकारः प्रस्थं च ग्रहणं करोति तत्र स्वाहाकारस्य आहुति
प्रक्षेपस्य च योगपद्यं भवति। यत्र पुनः सूत्रकारः प्रस्थं च ग्रहणं न करोति। अग्नआयूंषि पवस इति
तिसृभिरित्यत्र स्वाहाकारात् आहुतिप्रक्षेपः प्रस्थं च ग्रहणाभावात्। अत्र ममाग्ने वर्च इति अस्य
चे समिधोऽभ्यादध्यादिति सूत्रे विद्यमानत्वात्। आहुतेः स्वाहाकारस्य च योगपद्यं सिद्धं। अथ समि
द्धोमानंतरं स्विष्टकृदादि चारिं पश्चात् होमशेषं समापयेत्। आहिताग्निकर्मणि स्नानादि वाग्यमनादि
गाहानांते नैव कार्यमिति। तस्यांतिम उपकेयेत तेतोरजनी नयेत्। अस्यार्थः। ततः स्वयं दिशां नियु
त्य ये मधुपर्के दास्यान्ततन्ततामवगृहे एतां रात्रिं नयेदिति। अतिवाहयेदित्यर्थः। कुत एतत् स्नातकाया
पस्थितायेति गृह्यो क्लीत्। शौनकोऽपि। समावृत्तो मेध्यात्मन्यजायिष्यत्तेवाधवा। मधुपर्के प्रदा
नार्थे स्नातकहे ते। ते शानयेदिति। इतरहानीं बंपतिज्ञां कुर्यात्। ततः संकल्पयेत्। कोऽन स्वामीत्युच
राण्यपि। अस्यार्थः। ततरदानीमित्यर्थः। इदानीं मनआरभ्य न न के स्वामीति राज्ञो स्नातकरामि इति सं
न कल्पयेत्। नान्यतानि नैके स्नायात् न नग्नः स्नायात् न नग्नः। स्वयमीक्षेतान्यत्र मैथुनात् धावेत् वृक्षमारो ६९
हेत् कूपमवलोकयेत् बाहुभ्यां नदीं तरेत् संशयमभ्यापद्येतेति। अत्र विषये संग्रहश्च। स्वजाया

मपि नग्नां नेक्षेतान्यत्र मैथुनात्। न चान्यत्र प्रसंगोऽस्ति मातृतुल्या वरस्त्रियः॥ ॥इति समावर्तनं॥ ॥
एतत्समावर्तनं पूर्वोक्तमहानाम्न्यादिव्रतचतुष्टयस्य लोपप्रसे तान्प्रायश्चित्तं तस्मिन्नेव दिवसे कृत्वा कर्त
व्यं। अधिकारिणा कृत्वा कर्तव्यत्वात्। वचनांतराच्च। तत्र भगवान् शौनकः। अतानादि [illegible] चास्य
शाखास्य नैव [illegible] उक्तत्वात् [illegible] स पा पोदधि [illegible] कः। [illegible] नैव [illegible]
स्याहुतीः शतं [illegible] चेद्वत्तुगास्यात् [illegible] यादि साह शौनकः। [illegible] प वेदव्रतानि [illegible]
चतथैवारण्यकव्रतं। स्वशाखाविहितं सर्वं वेदमुपक्रमेत्। अकृत्वमानि सर्वाणि व्रतान्यभ्य
स्यते यदि। प्रायश्चित्तानि कृत्वैव व्रतान्यपि यथाक्रमं॥ गोदानिकं ततः कृत्वा समावर्तनमाचरे
त्। प्रायश्चित्तं [illegible] पनाह। दक्षः कालातिक्रमणे कुर्यात् प्रायश्चित्तं विधानतः। कृच्छ्रं [illegible]
[illegible] व्याहृतीः शतं। अष्टादिशतिम [illegible] कमात् कुर्याद्व्रतादिह। व्यवस्योपावदभ्य [illegible]
नः पुनः। यत्तु [illegible] वेदादिव्रतानां नित्यानां कर्मणां समतिक्रमे। स्नातक [illegible] कुलप्रायश्चि
मभोजनेन तद्बुद्धिपूर्वविषयं॥ इति महानाम्न्यादिव्रतलोपप्रायश्चित्तं॥ अथ गुरुकुलादुपावृत्तस्य के
मन्त्राच महिस्थाप्य तो नवेषणार्थं न धृतः स्नातकस्य प्रश्नपूर्वकं प्रयाणविधिरुच्यते। अथ शिष्यः स
माहूतानामोपाश्य गुरोर्वेदत्। उत्तर धीवदस्नातकसमसाष्टमाश्रयेत्। ५। हे देवदत्त गार्हस्थ्यं स्यानेः

भोइ॥ति स्वधेति। अस्यार्थः। समावर्तनानंतरं शिष्यः गृहस्थाश्रमार्थं गंतुं गुरुं पृच्छति। तच्चैव पश्चात्स्वगु
७० रोर्नाम उपांशु शनैरुच्चार्य देवामुच्चैर्ब्रूयात्। हे यज्ञदत्त आचार्य गार्हस्थ्यं वत्स्यामो भोइति। उपांशुजप
तिप्राणापानयोरिति वदतः। ५३॥ आमंद्रैरित्यृचं वा अश्मरूध्वे तो जपेदिह॥ ॐ पादिकं मंत्रं तत्र ऐत्या वा गिस्या
यं पठतु॥ ५४॥ सूक्तेनैव माहित्रीणामवो स्त्विति च तु मंत्यनु। गतास्स्वेत नुजानीयादनुज्ञाते यथा पथीति॥ अस्या
र्थः। अथ पृथग्गुरुः प्राणापानयोरिति मंत्रं अथवा। आमंद्रैरिंद्र हरिभिः एतां ऋचं वा उपांशु जपति। ततः ॐ
पाकः स्वस्ति दस्यापि जपित्वा ततो माहित्रीणामवो स्त्विति सूक्तेन तं स्नातकमनुमंत्रयति उपांशु। ततो गुरुः
गच्छ स्वेत्यनुज्ञां दद्यात्। तदनुज्ञातः स्वगृहं प्रति गच्छेत् तदा मार्गे यदि तस्य कर्तव्यं किंचिदवशिष्टं
गच्छेत्। तस्य कथयति। गच्छन् दक्षिणा देवाः क्याभिः पाक्षिणा मा पिपर्या गतु। जपेत्केनेक दत्सूक्ते देवी वाचम
जनयंति॥ ५४॥ अस्यार्थः। तत गच्छ समागच्छमपथवशात्सो दक्षिणां दुराजापान अनिष्टसूचकां घृणाति
तदा स्नातकः किं कर्तव्यमित्याह। कनिक्रदत्सूक्तं द्वयं तथा देवीं वाचमजनयंतेति ऋचं जपेत्। शिवा (७०
देराज्ञि ये श्रुत्वा सा हि स्कन्ते मृचं जपेत्। मंत्रेणाभया तस्यादिनेत दुस्सूक्तमस्यतु इति ५५॥ अस्यार्थः
यदि सरगालादीनामनिष्टसूचकं श्रणुयात्। तदा स्कन्दि ऋग्गतेमा तत्र ऋचं जपेत्। तस्यादिशः
२॥ सकाशस्मात्कस्मात्सुरुणाद्यत्रान्ततोऽपि यतुरत्नसाति श्राद्धेत यः प्रदीप्तसु स्कृतं गृहीत्वा अभ

यंभिशाचरुणे ऋचादि मंत्रेणातस्याभेदादिशितदुस्सूक्तं सिपेत्। अभयं भिशाक्तणां मुक्तमस्तनिर्गाशत्
इहं तं नृतीयमाज्ञातारं मा पातिष्ठां विंदत्। मे थो भेंद्राना उभयं तु मस्तु मिति। सर्वतो भयमुत्पन्नं नचे
तान नतो नरात्। अन्यतो वेति लोकागत्या घारांतं कृत्वा थ॥ ५७॥ पृथिव्या द्यष्टाभिमंत्रैर्हुत्वा ष्टान्याकु
तीरथ। कुत्वेशान्यां जपेत्स्वस्तिनो मिमीतां सूक्तं वे॥ ५८॥ षड्चो जपेत्तत्त्वं यत इंद्र भयामहे ततश्च स्विष्टकृ
दुर्जो होमशेषं समापयेदिति॥ ५९॥ अस्यार्थः। यदि कथंचित्सर्वेभ्यो भयमुत्पन्नं भवति एतस्यादन्यस्माद
त पियदि निर्धारो न ज्ञायते तत्र किं कर्तव्यमित्याह। सर्वतो भयमुत्पन्ने तदा लौकिकाग्निं पूर्ववत्सोत्तरेणाज्य
ज्यभागवर्जमाघारांतं कृत्वा पृथिव्या द्यष्टभिः सा नेमं मैराज्याहुती हुत्वा अग्नेरीशान्यभागे गत्वा स्वस्ति
नो मिमीतेति सप्तऋचः यत इंद्र भयामह इति षडृचं पित्वा स्विष्टकृद्धजं होमशेषं समापयेत्। पृथिवी वृ
तासाग्निना वृता त्याया वृतया वध्याम् अस्माद्भया द्विभेमि तद्वारये स्वाहा। अंतरिक्षं वृतं तद्वायुना वृतं तेन वृते
न वर्त्रेण यस्मा०। द्यौर्वृता सादित्येन वृता यस्मा०। दिशो वृतास्तां अंद्रमसा वृतास्ताभिर्वृताभिर्यस्मा०। आ
पो वृतास्ता वरुणेन वृतास्ताभि०। प्रजावृतास्ताः प्राणेन वृतास्ताभिः०॥ ६॥ वेदा वृतास्ते छंदोभिर्वृतास्तैर्वृ ते
तैर्यस्मा०। सर्वं वृतं तद्ब्रह्मणा वृतं तेन वृतेन वर्त्रेण यस्मा०॥ ८॥ इति शांत्यर्थं व्याहृत्य मंत्रः। इति स्नातकप्रया
णविधिः॥ ॥अथ स्नातकधर्मान्निरूप्यंते। तत्र स्मृतिरूपेण त्वाचार्यः स्नात्वैवं विधिना काले मासमात्र

Indira Gandhi National
Centre for the Arts

मपि द्विजः। अनाश्रमी न तिष्ठेत स्वस्थः प्रयतात्मवान्। तिस्रो रोगार्दितो भीतस्त्वापन्नो नेश्वकारणैः। स्नातकः
प्रयतो वह्निं नत्यजेदिति बैजकिः। नित्यदा ब्रह्मचारी स्याच्चतुर्यज्ञपरायणः। जापी तीर्थरतो वा स्यात्स्नानकोलो
ल्यवर्जितः। श्राद्धे निमंत्रितो गच्छेत्कुर्यात्स वृष्टकर्म स द्विजः। येन केनाप्युपायेन व्रतचर्यां न लोपयेत्। शाकला
न्जुहुयात्प्रातः सायं मंत्रैः काम्यमेव वा। कुर्याद्यज्ञान्विधिप्रोक्तान्स्नातको न तु यज्ञभागिति। अत्र वह्निं नत्यजेत्।
शाकलान्जुहुयात्। प्रातरित्यस्य च। प्रातरित्युक्तत्वात्। प्रातःकाले संध्यावंदनानंतरं अग्निकार्यवत्शा
कलान्जुहुयात्। सायंकालेपि न्यायप्राप्तत्वात्। बौधायनोक्तं स्मर्यते। तथा वस एव उपनयनं प्रभृति व्या
हृतिभिः समिद्भिरेव हूयत आसमावर्तनात्। समावर्तनात् आज्येन व्याहृतिभिर्हूयत आपाणिग्रहणात्।
पाणिग्रहणप्रभृति यावज्जीवं व्रीहिभिर्यवैर्वा हस्तेनैकेनाहुती जुहोति। शाकलमंत्रहोमास्तैत्तिरीयार
ण्यके श्रूयंते। देवकृतस्यैनसोवयजनमसि स्वाहा। मनुष्यकृतस्यैनसोवयजनम०। पितृकृतस्यैनसो०। आ
त्मकृतस्यैनसो०। अन्यकृतस्यैनसोवय०। अस्मत्कृतस्यैनसोव०। यद्दिवा च नक्तं चैनश्चकृम तस्यावयज०।
एनस एनसोव०। यद्वो देवाश्चकृम जिह्वया गुरु मनसो वा प्रयुती देवहेळनं। अरावायो नो अभिदुच्छुनायते तस्मि
न्तदेनोवसवो निधेतन स्वाहा इति॥११॥ वैश्वदेवकार्यमपीत्याह। शौनकः। वैश्वदेवं गृहस्थश्च स्वप्रागारे भूणंभ ७१
वेत्। स्नातकेनापि तत्कार्यं पृथक्पाको गृहे यदीति। अन्ये च धर्माः। यज्ञोपवीतद्वितयं सोदकं च कमंडलुः।

छत्रं चोष्णीषममलं पादुके चाप्युपानहौ। रौक्मे च कुंडले वेणुकृतकेशनखः शुचिः। स्वाध्याये नित्ययुक्तः स्या
द्बहिर्माल्यं न धारयेत्। शुक्लांबरधरो नित्यं सुगंधः प्रियदर्शनः। न जीर्णमलवद्वासा भवेत्तु विभवे सति।
न रक्तमुल्बणं चान्यधृतं वासो न कंथिकां। स्मृत्यंतरे। स्नातः समुद्वहेत्कन्यां प्रव्रजेद्वान्तरिक्षकः। वनस्थो वा भवे
द्विप्रः स्वस्थो विधिना शुचिः। अनाश्रमी न तिष्ठेत दिनमेकमपि द्विजः। आश्रमेण विना तिष्ठन्प्रायश्चि
त्तीयते हि सः॥ इति स्नातकधर्माः॥ ॥अथ वरणविधिमाह गृह्यकारः परिशिष्टरूपे। कन्यां परिणेष्य
माणो द्वौ चतुरो द्वौ वा वरान्पितुराप्तान्प्रशस्तान्कारकर्मणोऽनृक्षरा ऋजवः संतु पंथा इति प्रहिणुयात्। तैः
वृतीभिः पुरंध्रीभिः सहितां मंगलगीतवृत्याभ्यां कन्यागृहमेत्य शुभे पीठासने प्राङ्मुखा आसीनायाः दानबांध
वोपेतायाः कन्यायाः पाणौ फलं प्रदाय कल्याणकाले वृणीरन्नासीनाः प्राङ्मुखा वसिष्ठगोत्रोद्भवाय मुष्य
प्रपौत्रायामुष्यपौत्रायामुष्य पुत्राय श्रुतशीलनाम्ने वराय। वत्सगोत्रोद्भवाममुष्य प्रपौत्रीममुष्यपौत्रीममु
ष्य पुत्रीं श्रुतशीलनाम्नीमिमां कन्यां भार्यात्वाय वृणीमहे इति ब्रूयुः॥३॥ अथ दाता भार्यां ज्ञातिबंधुसमेताय
थोक्तमनूद्य वृणीध्वमिति ब्रूयात्। एवं त्रिः। प्रयुज्य दाता प्रदास्यामीति चतुर्थे स्विवंरेत्। अथ ब्राह्मणमुक्तस्व
स्त्ययनाः शिवा आपः संतु सौमनस्यमस्तु। अक्षतं चारिष्टं चास्तु दीर्घमायुरस्तु। शांतिः पुष्टिश्च
स्त्विसुकेः एतद्वः सत्यमस्त्विति तान्प्रेरयेत्। समानीव आकूतिः प्रस्कंभता धियसानस्य सक्षणी येनोत प्रयुः।

Indira Gandhi National
Centre for the Arts

पुरंध्रयः कन्यायै कल्याणाः कुलधर्मोपचाराः कुर्युरिति। एकोधिकारिकायां संकल्पः। कन्यां चरितुं प्रेषयेत्स्व
७२ हृदो वरः। प्रस्थगमने तेनिद्वाभ्यां मृगभ्यां नाम। अभिमंत्रयेत्। कन्या प्रदं वृणे युक्तो सहितामंत्र विरमाः। गोत्रनाम्नीचतु
र्थ्यंतां पत्युर्बध्याद्द्वितीयया। कात्यायन विष्णुमित्राय गौतमी विष्णुयज्ञदाविति। कन्यां धर्मप्रजार्थं वृणी महद्दत्त
दृशमिति। अथवा वरः स्वयमेव गच्छेत्। तत्र नारदः। भूषणैः फलतांबूलगंधपुष्पाक्षतादिभिः। शुक्लांबरो गीतवा
द्यैर्विप्राशीर्वचनैः सह। गच्छेच्च कन्यकागेहं वरः प्राग्वत्पूर्वकं। कुलशीलवयोरूपधनविद्यायुताय च। वराय रूप
संयुक्तां कन्यां दद्याद्यवीयसीं। संपूज्य प्रार्थयेत्वा च शचीं देवीं गुणाश्रयां। त्रैलोक्यवल्लभा दिव्यगंधमाल्यांबरा
न्विता। सर्वलक्षणसंयुक्ता सर्वाभरणभूषिता। अनर्घ्यमणिमालाभिर्भासयंती दिगंतरं। विलासिनीसहस्रौघैः
सेव्यमाना महोत्सवे। एवंविधा कुमारी सा पूजांते प्रार्थयेदिति। देवेंद्राणि नमस्तुभ्यं देवेंद्रप्रियभामिनि। विवा
हं भाग्यमारोग्यं पुत्रपौत्रं च देहि मे। अत्र यथोक्तविधिना स्नानं तत्कर्मणो वरस्य विधिवत्स्नातं कन्यावरण
मारभ्य विवाहव्रतनिष्पत्तिपर्यंतं मध्ये रजोनिकाले विवादीपकालाशौचे प्राप्ते तत्पोयसः शुचिः। तत्र या
त्र वर्जयेत्स्व्यः। हानेविवाहे यज्ञे च संग्रामे देशविप्लवे। आपद्यपि च कष्टायां सद्यः शौचं विधीयते इति। स्मृ
त्यंतरे तु। नरेंद्रसत्रिव्रतिनां विवाहोपप्लवां देषु सद्यः शौचं समाख्यातमिति। तत्र तिथ्यादि विधिमाह। श्री ७२
धरीये। पंचांगशुद्धदिवसे चंद्रताराबलान्विते। विवाहभे स्योदये वा कन्यावरणमाचरेत्॥ इति वाग्दानरू

पकन्यावरणं॥ ॥अथ विवाहविधिरभिधीयते॥ ॥यथोक्तलक्षणां कन्यां उक्ते काले समुद्वहेत्॥ स्यादाभ्युदयि
कं श्राद्धं द्वितीये वक्ष्यते व तत्॥ ६१॥ अस्यार्थः। वरः उक्तलक्षणसंपन्नां कन्यामुदयनकाले समुद्वहेदिति॥ तत्र पूर्वेदि
न स्नानमुच्यते। यथाचारं यथादेशं पित्रादेर्नांदीमुखपादिमातृकापूजां विधाय अस्य पुत्रस्य गृहस्थाश्रमोचितधर्माच
रणाधिकारार्थं विवाहं करिष्य इति प्रतिज्ञाय स्वास्तिवाचनं कृत्वा अभ्युदयिकश्राद्धं स्वेनैव कर्तव्यं तदग्रे वक्ष्यति॥ अ
परेद्युः कृतस्नानो हतवस्त्रधरो वरः। अलंकृतः सितछत्र पदाति ज्ञातिबांधवैः॥ ६२॥ वृतो वधूगृहं गत्वा मधुपर्क
णपूजितः। कन्याज्ञातिभिरेवं मधुपर्को मयोच्यते॥ ६२॥ अस्यार्थः। कृतमंगलस्नानः अहतवस्त्रधरः स्वर्णाद्य
लंकारैरलंकृतः कृतभोजनः श्वेतच्छत्राच्छन्नः ज्ञातयो बांधवाः सुहृदः पदातयः सेवकवर्गाः तैर्वृतो वरः कन्यार्थी
वधूगृहं गत्वा अत्र अस्मिन्समये एवं वक्ष्यमाणप्रकारेण मधुपर्केण कन्याज्ञातिभिः कन्याबंधुभिः पूजितः स
न् कन्यामुद्वहेदिति विशेषः। स मधुपर्कप्रकारस्तु मयोच्यते। अत्र भगवान्। अपरेद्युः कृतस्नानधृतधौतां वो
वरस्त्वयः। ब्राह्मणान्भोजयित्वा तैः कृतपुण्याहवाचनः। यानं यानार्थमारुह्य यातव्यं च वधूगृहं। तस्य द्वारा
द्बहिः स्थित्वा प्राङ्मुखो वाभिमुखो गतैः। प्रदीप्तैः पूर्णकुंभादिपाणिभिर्वनिताजनैः। सह भ्युद्गमनो गेहं प्रवि
शेद्बंधुभिः सह। अत्र पुराणे। भुक्त्वा निश्यग्निहोत्री चेदुद्वहेन्निशि सर्वदेति। व्यासोपि॥ भुक्त्वा समुद्वहेत्क
न्यां सावित्रीग्रहणं तथा। उपोषितः स्नातं दद्याद्विना यद्विजो वतु। अथ मधुपर्केति कर्तव्यतापेक्षायां म

Indira Gandhi National
Centre for the Arts

धुपर्कविधानं दर्शयति। विष्टराद्युपकल्पनमुपविश्यासने शुचिः। ततोपकल्पितं पूर्वं विष्टरं त्रिर्निवेदयेदिति
७२ ॥६३॥ अस्यार्थः॥ अथ कन्यादाता शुचिरपि कर्मांगं द्विराचम्य प्राणानायम्य एवं गुणविशिष्टायां शुभतिथौ
कन्यार्थं गृहमागताय स्नातकाय वराय मधुपर्केण पूजयिष्ये इति संकल्प्य। एवमागतं वरं आसने उपवि
तदर्थं विष्टरादिकमुपकल्पयेदिति विष्टराद्युपकरणानि पूजार्थं संनिहितानि निहितानि निरूपयेदिति॥ वि
ष्टरस्य लक्षणमुच्यते। स्मृत्यंतरोक्तं॥ कैतिभिस्तु भवेद्ब्रह्मा किंतिभिर्विष्टरो मतः। पंचाशता भवेद्ब्रह्मा तदर्धेन तु
विष्टरः। तत्र समीपस्थापितं विष्टरं विष्टरो विष्टरो विष्टरः। प्रतिगृह्यतामिति त्रिभिर्वदयित्वा वराय निवेदयेत्। सोपि
वरः प्रतिगृह्णामीति वदेत्। विष्टरादेस्ते किं कर्तव्यमित्यत आह। उदगग्रमेतमहं वर्ष्मेत्यस्मिन्नुपविशेद्वरः। एवमेवोत्त
रेषां च पंचानां त्रिर्निवेदितं॥६४॥ निवेदितेन पाद्येन पादौ प्रक्षालयेद्वरः। प्रक्षालयित्रे विप्राय दक्षिणांघ्रिं
प्रयच्छति॥६५॥ पश्चात्सव्यं तु शूद्राय पूर्वं सव्यं प्रयच्छति। अस्यार्थः। ततो वरः विष्टरं गृहीत्वा उदगग्रे तस्मिन्
विष्टरे उपविशेत्। अहं वर्ष्मेति मंत्रेण तस्मिन्नोपवेशनं पश्चात् विष्टरमाक्रम्य पादतो आसने उपवेशनमिति।
गृह्ये पि उदग्रे विष्टर उपविशेदाक्रम्य पादाविति अनेनैव प्रकारेण इतरेषां पंचानामपि पूजोपकरणं
त्रिर्निवेदनं भवति। त्रिरुक्तानि वेदयीतेत्यर्थः। पाद्यं नाम पादप्रक्षालनयोग्यमुदकं। पाद्यं३ मिति निवेदिते ७२
न तेनोदकेन वरस्य पादौ प्रक्षालयेदिति। तत्र वरः प्रथमं पादप्रक्षालनकर्त्रे विप्राय दक्षिणचरणं प्रक्षा

लनार्थं ददाति। यत्र पुनः शूद्र प्रक्षालनकर्ता भवेत्तदा तस्मै प्रथमतः वामपादं प्रयच्छेदिति यदा तु क्षत्रियवैश्योपा
द प्रक्षालयितारौ भवेतां तदा किं क्रियते। नियमस्तु आद्यं तयोर्दृष्टः तस्मात्तत्र सव्यं वा पूर्वं दक्षिणं वा पश्चाद्द
क्षिणं वा पूर्वं सव्यं वा पश्चादिति नात्र नियमः। अथ वा अर्घ्याद्युपरे वा पादद्वयं यच्छेत्। गंधादियुक्तमर्घ्यं
च प्रतिगृह्य निवेदितं॥६६॥ वेदिताचमनीयात्तामेकदेशं ततो वरः। उक्त्वामृतोपस्तरणमसि मंत्रं पिबेद
थ॥६७॥ अवंतरणशौचार्थं सर्वमाचमनं विहितं। अस्यार्थः। अर्घ्यमर्घ्यमर्घ्यमिति त्रिर्निवेदितं गंधपुष्पादि
युक्तमर्घ्यमंजलिना प्रतिगृह्यानंतरमाचमनीयमिति त्रिर्निवेदितानामाचमनार्थमपामेकदेशं करेण गृ
हीत्वा अमृतोपस्तरणमसीति मंत्रमुक्त्वा पिबेत्। अत्र मधुपर्के सिध्यर्थं विहितान्याचमनानि अन्योदकेन
भवति। तथा निवेदितोदकेन तस्य प्राशनार्थमेव विहितत्वात्। अत्र भगवान्। वरो थलो किकं तायमाच
म्यात्रिर्निवेदितं। आदायाचमनीयांशं तस्माद्गृह्य स किंचन। अमृतोपस्तरणमसीत्युच्चार्य वधुतृप्तिबेत्।
पीत्वाशुध्यर्थमाचम्य लौकिकैः सलिलैस्ततः। अवंतरेण आचमनं पयुक्तं न दुच्छिष्टता निवृत्यर्थं न। मधु
पर्कप्राशने उच्छिष्टत्वाभावात्। अत्र शौचशब्देन मुखहस्तप्रक्षालनमात्रं न शुध्याचमनं। द्वितिकारणे
न थे व्याख्यातत्वात्। आनीयमानमीक्षेत मित्रस्य त्वेति मंत्रतः॥६८॥ मधुपर्कं यथानीतं पूर्ववच्चनि
वेदितं। देवस्य त्वेति मंत्रेण गृह्णात्संजलिना ततः॥६९॥ मधुवाता तृचेनैव मधुपर्कमवेक्षते॥ निरूपा

Indira Gandhi National
Centre for the Arts

तिचतसात्रंसव्येपाणावतःदरं।।७०।। अंगुष्ठोपकनिष्ठिकाभ्यामालोड्य त्रिः प्रदक्षिणं। वसवस्त्वादिभि
७४ र्मंत्रैर्दिक्षु पूर्वादिषु क्रमात्।।७१।। निमृज्यांगुलिलेपं तु भूतेभ्यस्त्वेति मंत्रतः।। त्रिरूर्ध्वं त्रिः क्षिपेद्भूमौ
पात्रं निधायचेति।।७२।। अस्यार्थः। आचमनानंतरमानीतं मधुपर्कं मधुपर्कपात्रं करतो गृहीत्वा पूजार्थं निय
मानपात्रे अर्थात् कोणे लिङ्गपात्र मधुपर्कस्य सामग्री दधिमध्वाज्यकं मधुपर्कं तथा कांस्यपात्रांतरेण तस्यात्र
माछाद्य आनीयमानं मधुपर्कं मधुपर्कमित्रस्य त्वा चक्षुषा प्रतीक्षे इति मंत्रेण प्रतीक्ष्य। अनंतरमानी
तं मधुपर्कं दाता मधुपर्को मधुपर्को मधुपर्क इति वरायत्रिर्निवेदयेत्। ततो वरः निधाय तं मधुपर्कं देवस्य त्वे
ति मंत्रेण अंजलिना प्रतिगृह्णाति। अंजलिस्थं मधुपर्कं मधुवाता ऋतायत इति तृचेन ... पिधा
न पात्रं भूमौ संस्थाप्य अनंतरं तन्मधुपर्कपात्रं वामपाणौ निधाय ततो मधुपर्के ... आदार
भ्य उदकसंस्थं अंगुष्ठानामिकाभ्यां त्रिः प्रदक्षिणमालोड्य वसवस्त्वा त्रिभिः सोत्रमंत्रैः पूर्वादिदिक्षु क्र
मादंगुलिलेपं अंगुलिगतं लेपमानयेत्। वसवस्त्वा गायत्रेण छंदसा भक्षयंत्विति पूर्वस्यां। रुद्रा
स्त्वा त्रैष्टुभेन छंदसा भक्षयंत्विति दक्षिणतः। आदित्यास्त्वा जागतेन छंदसा भक्षयंत्विति पश्चात्।। ७५
विश्वेत्वादेवा आनुष्टुभेन छंदसा भक्षयंत्विति उत्तरतः एवमुदकसंस्थं निमृज्य ततो मधुपर्कस्य
मध्यदेशात् गृहीत्वा भूतेभ्यस्त्वेति मंत्रेण त्रिरूर्ध्वं क्षिपति। इदमत्र गृह्यं। भूतेभ्यस्त्वेति मध्यात्त्रिरुद्धृ

त्य त्रिरुत्क्षिप्येति। अस्यार्थमाह भट्टनारायणः भूतेभ्यस्त्वेति मध्यात्त्रिरुद्धृत्यानि मा। ... त्रिरुत्क्षिपेदित्य
र्थः। अत्र ऋत्युत्क्षेपणमंत्रावृत्तिरनुसंधेया। ततः मधुपर्कपात्रं भूमौ स्थापयित्वा। प्राश्नात्यस्यैकदेशं तु विरा
जो दोह इत्यथ। आचम्य तद्द्वितीयं च द्विराजो दोहमशीय अथ। आचम्य तद्वत्प्राश्नीयान्मयि दोह इति त्वथा।। वि
नियोगं च कुर्वीत शिष्टस्यास्योक्तमार्गतः।।७४।। अस्यार्थः। ततः मधुपर्कस्यैकदेशं गृहीत्वा विराजो दो
होसीति मंत्रेण अंगुष्ठोपकनिष्ठिकाभ्यां गृहीत्वा प्राशनं करोति। अनंतरमाचम्य पुनस्तथैव मधुपर्कै
कदेशं गृहीत्वा। विराजो दोहमसीय अनेन मंत्रेण द्वितीयं प्राश्नाति। पुनराचम्य तथैव गृहीत्वा मयि दो
हः पद्याये विराज इति मंत्रेण तृतीयं प्राश्नाति। पुनराचामति। एवं वारत्रयं प्राश्याचम्य प्रति प्राशनमा
चामेदिति शौनकेनाप्युक्तत्वात्। सूत्रो... मार्गेण अवशिष्टस्य मधुपर्कस्य विनियोगं कुर्यात्। तद्विनि
योगमेव प्रदर्शयति। अवशिष्टं मधुपर्कं उदङ्मुखः सन् ब्राह्मणाय दद्यात् ... वा क्षिपेदिति सूत्रोक्तत्वा
त्। सूत्राकारमतेपक्षे त्रिवारस्पर्शेण न सर्वस्यापि यथा प्राशनं भवति। तथा प्राशनमिति। अथवा यद्य
प्राशनानंतरं अवशिष्यते इत्यनुलक्षे अवशिष्टस्य द्रव्यस्य प्रतिपत्तिरेमेवोक्ता भवति। शौनकोपि।
मधुपर्कं पीतशिष्टं विप्रायोदङ्मुखो भवेत्। प्रादद्याद्ब्राह्मणालाभे प्रक्षिपेत्सलिले पिबा। स्वयं पिबेद्वा
निःशेषमाचामेच्च यथा पुनः। आचम्याथामृतापीतिपिबेदाचमनीयकं। आचम्याचमनीयं तु पिबे

Indira Gandhi National
Centre for the Arts

सत्यं यशः श्रीस्त्विति ॥७५॥ आचांतः पुनराचामेद्रथगां च निवेदयेदिति। अस्यार्थः। अनंतरं लौकिकजलेना-
चमनं कृत्वा पूर्वमेव यदाचमनीयं निवेदितं तदेकदेशं गृहीत्वा अमृतापिधानमसीति मंत्रेण पिबेदाचामे-
७५ त्। पुनर्लौकिकजलेनाचम्य तदेवाचमनीयोदकशेषं पूर्ववद्गृहीत्वा सत्यं यशः श्रीर्मयि श्रीः श्रयतामिति
मंत्रेण पिबेत्। आचांतः पुनराचामेदित्यत्र कर्मांगद्विराचमनं विधीयते। तच्च लौकिकजलेन वृत्तिकृता
तथैव व्याख्यातत्वात्। ततो वरः कर्मांगद्विराचामेत्। लौकिकजलेन। अथ दाता गौर्गौरिति त्रिर्वे गां च
वराय निवेदयेत्। अत्र भगवान्। अमृतापिधानमसीत्यंतममृतेत्यादिकं यजुः। उच्चार्याचमनीयांभःशेष-
किंचित्पिबेत्ततः। आचामेच्च यथापूर्वं लौकिकसलिलेन ततः। सत्यं यशः श्रीरित्याद्य यजुषाचमनोदकं। पी-
त्वा निःशेषमाचामेद्रथगां च निवेदयेति। इदमत्र गृह्यं। द्वितीयमाचांतोदकाय गां वेदयत इति। अस्यार्थमा-
ह नारायणः। द्वितीयग्रहणमाचमनीयप्राप्त्यर्थं इतरथा मंत्रेणानंतरेण संबंधः स्यादिति। आचांतग्रहणं
शौचार्थं आचमनं कृत्वा कर्मांगमप्याचमनं कुर्यादित्येवमर्थं। उदकवचनमाचमनीयनिवृत्त्यर्थं। तेनाच-
मने उदकांतरं भवति। गां वराय निवेदयेत्। हतो मे पाप्मेति मंत्रं जपित्वा ॐ कुरुतेति ब्रूयात्। यदि मारयि- ७५
ष्यन्भवति तदालभेत। तत्र देवताः प्रागुक्ताः। नो चेदोमुत्सृजतेति ब्रूयात्। शौनकोपि। हत्वानलेपकृ मिकेनां
गां यदि वरः स्वयं। ततो हतो मे पाप्मेति यजुषो जपमाचरेदिति। कलौ गवालंभनं निषिद्धमिति कारिका-

कारेणोक्तं। तथा चादित्यपुराणे। कन्यायाः पुनरुद्वाहं ज्येष्ठांशं गोवधं तथा। कलौ पंच न कुर्वीत भ्रातृ-
जायां कमंडलुमिति। ततो वरो जपेन्माता रुद्राणां दुहितेत्यृचं ॥७६॥ अथोमुत्सृजेत्युक्ते आह प्रेषगामुत्सृजंति
ते। गंधमाल्यांबरैस्तद्वद्भूषणैः पूजयेद्वरमिति ॥७७॥ अस्यार्थः। दाता गोनिवेदने कृते सति ततो वरः मा-
ता रुद्राणामित्यृचं जपेत्। जपानंतरं वरः स्वपूजकान्प्रति ॐ मुत्सृजतेति प्रेषब्रूते ते च गामुत्सृजंति ततो
दाता वरं गंधमाल्यादिवस्त्रादिभिरलंकारैः यथाशक्ति पूजयेत्। सूत्रे तिनोमांसो मधुपर्को भवतीति
वर्तते। तत्र वृत्तिकृन्नारायणोक्तं। मधुपर्कांगभोजनं आमांसं न भवति। भोजनांगत्वेन मांसस्य लोकप्रति-
सिद्धत्वात्। अंगीभूतमोदनाद्यन्नसाध्यं भोजनं इमिति मधुपर्कांगत्वेन देयं भवति। पश्चात् लंभनपक्षेत-
न्मांसेनैव भोजनं। उत्सर्जनपक्षे पायसमांसांतरेण भवति। एषां पक्षे मांसशब्दोच्चारणमपि नास्ति तत्र श्रु-
तादिपर्कोनशाकादिव्यंजनसहितमन्नं ब्राह्मणेभ्यो देयमिति। मधुपर्कदानं तु स्नातकशाखानुसारेण
कार्यं। तथा च गृह्यपरिशिष्टांतरं। वरस्य या भवेच्छाखा तच्छाखा गृह्यचोदितः। मधुपर्कः प्रदातव्यो-
न्यशाखोपि दातरि। मधुपर्कस्य लक्षणमाह शौनकः। मधुना सर्पिषा वापि सुसंपृक्तं भवेद्दधि। मधुप-
र्क इति प्राज्ञैर्याज्ञिकैः सोभिधीयते॥ इति मधुपर्कविधिः॥ ॥स्नातालंकृतकन्यायाः प्राङ्मुखायाः प्रत्य-
ङ्मुखः। ईक्षेत तंदुलास्ताया वरस्तस्य मुखं च सा ॥७८॥ सुमुहूर्ते शोभने सम्यक् क्षिपेतां मुखयोर्मि-

Indira Gandhi National
Centre for the Arts

थः। सगुडजीरकान् कन्यां वरयेदथ तां वरः॥७९॥ अस्यार्थः। शोभने मुहूर्ते दंपत्योः परस्परं निरीक्षणं कर्त
व्यं। मंगलद्रव्यैः स्नातां पितृदत्तालंकारालंकृतां पूर्वाभिमुखीं प्रस्थपरिमिततंडुलस्थां तस्याः पुरतः पश्चि
७६ मामुखो भिरवः प्रस्थपरिमिततंडुलस्थो वरः मुखं ईक्षेत। सापि वरस्य मुखं ईक्षेत। शोभने मुहूर्ते दंपती
मिथः परस्परं गुडजीरकान् मुखयोः क्षिपेतां। ततो वरः तां कन्यां वीक्षमाणः अभ्रातृघ्नीमिति मंत्रं जपति।
कन्यायाः ईक्षमाणो वरः। अघोरचक्षुरपतिघ्न्येधि इति जपति। आपस्तंबेनोक्तत्वात्। अभ्रातृघ्नीमिति
जपेत् कन्यां दृष्ट्वा वरः स्वयं। अघोरचक्षुरित्यस्या दृष्टौ दृष्टिं निपातयेत्। अनंतरं वरस्तां कन्यां वरयेत्।
वरणप्रकारमाह। असावमुकगोत्रस्य पुत्रः पौत्रः प्रपौत्रकः। एतन्नाम्नामिमामस्य पुत्रीं पौत्रीं प्रपौत्रि
कां॥८०॥ वृणेहं कन्यकां साध्वीं श्रीरूपामित्यतः परमिति। अस्यार्थः। वसिष्ठगोत्रोद्भवस्यामुकशर्म
णः प्रपौत्रः अमुकशर्मणः पौत्रः अमुकशर्मणः पुत्रः अमुकशर्मनामा वरोहं। श्रीवत्सगोत्रोद्भवा अ
मुकशर्मणः प्रपौत्रीं अमुकशर्मणः पौत्रीं अमुकशर्मणः पुत्रीं सुभद्रानाम्नीं इमां सलक्षणसंपन्नां
श्रीरूपां कन्यां वृणे। अनेन प्रकारेण वरः कन्यां वरयेत्। वरेणैव वृतां कन्यां तत्पिता प्रददाति तां॥८१॥
पुत्राय्यास्य च पौत्राय नप्त्रे स्यामुकगोत्रिणे। असावमुकगोत्रस्य पुत्री पौत्री च नप्त्रिका। श्रीरूपा च ७६
मया दत्ता तुभ्यं श्रीधररूपिणे॥ अस्यार्थः। एवं पूर्वोक्तप्रकारेण वृतां कन्यां तत्पिता। कन्यायाः पिता

तां कन्यां वराय प्रददाति विधिपूर्वकं ददाति इत्यर्थः। तत्प्रकारमाह। अमुकशर्मणः अमुकगोत्रिणे अमुकश
र्मणः पुत्राय अमुकशर्मणः पौत्राय अमुकशर्मणः प्रपौत्राय। अमुकगोत्रस्य अमुकशर्मणः पुत्री अमुकशर्म
णः पौत्री अमुकशर्मणः प्रपौत्री श्रीरूपा इयं कन्यां श्रीधररूपिणे तुभ्यं वराय मया संदत्ता इत्युक्त्वोदकपूर्वं
वीनां दद्यात् स्वस्ति पदं वदन्॥८२॥ वरोथ प्रतिगृह्णीयात्स्पृशेत्क इति मंत्रतः। अस्यार्थः। कन्यादाता पूर्वोक्तप्र
कारेण इति उक्त्वा उदकपूर्वां मुदकसहितां तां कन्यां दद्यात्। ब्राह्मादि विवाहचतुष्टये उदकपूर्वेत्याद्यप्र
कारेण इति उक्त्वा उदकपूर्वां मुदकसहितां तां कन्यां दद्यात्। प्रतिग्रहं करोति ततो वरः। क इति मंत्रेण क
न्यत्र। अथानंतरं वरः स्वस्तीति पदं वदन् प्रतिगृह्णीयात्। प्रतिग्रहं करोति ततो वरः। क इति मंत्रेण क
न्याया दक्षिणांसमभिमृशेत्। क इदं कस्मा अदात्कामः कामायादात्कामो दाता कामः प्रतिग्रहीता का
मं समुद्रमाविश कामेन त्वा प्रतिगृह्णामि कामैतत्ते वृष्टिरसि द्यौस्त्वा ददातु पृथिवी प्रतिगृह्णात्विति
ज पिता प्रजापतिमनुस्मृत्य धर्मप्रजासिद्ध्यर्थं कन्यां प्रतिगृह्णामीति ब्रूयात्। स्मृत्यंतरोक्तानि दानवा
क्यानि लिख्यंते। कन्यां कनकसंपन्नां कनकाभरणैर्युतां। दास्यामि विष्णवे तुभ्यं ब्रह्मलोकजिगी
षया। विश्वंभरः सर्वभूताः साक्षिण्यः सर्वदेवताः। इमां कन्यां प्रदास्यामि पितॄणां तारणाय च॥ इति
अन्यच्च। स्नातां नवांबरोपेतां कटकादिविभूषितां। अंतरं प्रत — — सपरिधानां कुमारिकां। कृत
स्वस्त्ययनां दद्याज्जलपूर्वां वराय तां। उक्तं स्वस्त्ययनं स्त्रियास्ताः परं सुखः प्रतिगृह्यतामिति। अवर

Indira Gandhi National
Centre for the Arts

प्रत्तवसनपरिधानं। अर्थात् दंशाक्तेन परिधानीयवस्त्रमुच्यते। अंतरमवकाशावधिपरिधानांत भूत्स्य मिथा
नात्। अध्यावहनियात्किंचित्कन्यादानानंतरः परं॥८४॥ गोभूहिरण्यदास्यादितस्मै दद्यात्स्वशक्तितः। अस्या
र्थः। कन्यादानानंतरं दातातस्मै वराय स्वशक्त्यनुसारेण यत्किंचिध्यावहनि गोभूहिरण्यदास्यादिद्या
त्। अत्र गोभूहिरण्यादिनावरपरितोषमावहतिकरोतीव्युत्पत्त्या। आहवनी नाम वरपरितोषकी क्रिया सावह
नाअध्यावहनीति विभक्त्यर्थेव्ययं। एतान्येवानुदानादिस्मृत्यंतरेउक्तानि। तत्रोक्तान्येवदानवाक्यानि प्रदर्श्य
ते। कन्यादानांगभूतान्युदानानि करिष्य इति संकल्प्य। यज्ञसाधनभूतायाविश्वस्याघप्रणाशिनी॥ विश्व ७७
रूपधरादेवः प्रीयतामनयागवा॥१॥ सर्वसस्याश्रयाभूमिर्वराहेण समुद्धृता। अनंतसस्यफलदा अतः
शांतिं प्रयच्छमे।२॥ इयं दासी मयातुभ्यं श्रीवत्स प्रतिपादिता। सदा कर्मकरी भोग्या यथेभद्रमश्नुते।
।३॥ अभून्युंशायने नियमनूनाश्रियमुभ्नति। सौभाग्यं देहि मे नित्यं शय्यादानेन केशव।४। हिरण्यग
र्भसंभूतं सौवर्णं चांगुलीयकं। सर्वप्रदं प्रयच्छामि प्रीणातु कमलापतिः॥५॥ क्षीरोदमथने पूर्वमुत्पन्नं
कुंडलद्वयं। श्रियासहसमुद्भूतं ददे श्रीः प्रीयतामिति।६॥ इदं गृह ग्रहाणत्वं सर्वोपस्कर संयुतं। तवावि ७७
प्रसादेन ममास्त्वभिमतं फलं।७॥ प्रकृतमनुसरति। सघृतं क्षीरमादायकराभ्यां कन्यकांजलिं॥८५॥ अ
द्भिरुन्मृज्य वरः सिक्तान् शुक्लान् शाल्यक्षतानथ। गृहीत्वांजलिनातस्या अंजलौद्विः क्षिपेत्ततः।८६। अ

स्यार्थः। अनुदानानंतरं अक्षतारोपणप्रकारं वर्णयति। तैजसपात्रेण क्षीरमानीय तस्मिन्घृतमासिच्य पा
त्रांतरेणाद्भिः शुक्लकुशालितंडुलानानीय प्रक्षालितपाणिर्वरः घृतसहितं क्षीरं स्वकराभ्यां प्रक्षालितव
ध्वंजलौ द्विरुपस्तीर्य अनंतरं प्रक्षालितशुक्लतंडुलान्स्वांजलिना गृहीत्वा वध्वंजलौ द्विर्निक्षिपेत्।
पुनर्द्विरभिघारयेत्। आदायांजलिनाथ तत्तदंजल्युपरिस्वयमिति। अस्यार्थः। वध्वंजलिपूरणानंतरं
वरः स्वांजलौ वध्वंजलिवदन्यस्मात् द्विरुपस्तरणं द्विस्तंडुलपूरणं द्विरभिघारणं कुर्यात्ततः स्वांजलिं
वध्वंजल्युपरिस्थापयेत्। कन्यायाश्चाशिषः पूर्वमुक्तादातान्ततः परं॥८७॥ कन्यां तां प्रतिगृह्णामि स्वस्ति
कइतिमंत्रतः। उपरिस्थांजलौ पूर्णे हस्तेस्वर्णोदकं ततः।८८। तमेव प्रतिगृह्णामीत्युक्त्वा मंत्रमुदीरयन्। अंज
लिस्थाक्षताः कन्यामूर्ध्नि प्रक्षिपेद्वरः।८९॥ स्वांजलिस्थाक्षतान्कन्या वरमूर्धनि निक्षिपेत्। अस्यार्थः।
दाताकन्यातारयतु दक्षिणाः पांतुवक्तुदेयं चास्तु। पुण्यं वर्धतां शांतिः पुष्टिस्तुष्टिश्चास्तु। तिथिकरण
मुहूर्तनक्षत्रसंपदास्त्विति। अनंतरं कइदमिति पूर्वोक्तमंत्रं प्रतिगृह्णामि स्वस्ति पठेत्। ततः अक्षतपूर्णे उपरिस्थि
ते वरांजलौ स्वर्णोदकं स्वर्णसहितं जलं हरेत्सिंचेत्। ततो वरस्तमेव कइदमिति मंत्रं गृह्णामीत्युदीरयन् स्वां
जलिस्थाक्षतान्कन्यामूर्धनि प्रक्षिपेत्स्थापयेत्। कन्यापि स्वांजलिस्थाक्षतान्वरमूर्धनि निक्षिपेत्। मूर्धनि प्रक्षे
पानमेवं स्यात्पुनरुन्मार्जनादिकं॥९०॥ उन्मार्जनादिकां कुर्यादद्भिर्वरःकन्यको वरं। कन्यापि ताः पिता

Indira Gandhi National
Centre for the Arts

७८ कुर्यात्स्वरतं च वरो वदेत् ॥ ९१ ॥ अस्यार्थः । एवं पूर्वोक्तप्रकारेण शिरसि अक्षतारोपणं कृत्वा कन्या
कुर्यात्स्वरतं ... उन्मार्जनादिकं उपस्तरणादिकं कन्यांजलौ कुर्यात्तथैव वरां
नेनैव प्रकारेण पुनरपि वरो वारद्वयं उन्मार्जनादिकं उपस्तरणादिकं कृतवान् तद्वदेव वारद्वयं कुर्या
जलौ कन्यका वरस्य अनेन प्रकारेण वरः उपस्तरणादिकं कृतवान् तद्वदेव वारद्वयं कुर्या
त् । कन्यस्यादयः पूर्वोक्ता आशिषः कन्यापिता कुर्याद्दिदं इत्यर्थः । परं तन्त्रे मुपरितन्त्रे कइदं कस्मा
त् । कन्यस्यादयः पूर्वोक्ता आशिषः कन्यापिता कुर्याद् इत्यर्थः । तथा च गृह्यपरिशिष्टे । तदंजल्यक्ष
अक्षतादिस्यादि वरो वदेत् । तस्याः मन्त्रोच्चारणनिषेधात् । तथा च गृह्यपरिशिष्टे । तदंजल्यक्ष
ताञ्वरमूर्ध्न्यारोपयेत् । वरो पितुः ... अञ्जल्यक्षताना रोपयेत् एवं त्रिर्वधूपूर्वं ततस्त्रिर्वरपूर्वं
तान्वरमूर्ध्न्यारोपयेत् । वरो पितुन्त्रिः ... पूर्वमारोपणं कारयेदिति । तस्मात्कारिकोक्ता
८ तांजलौ वधूस्तण्डुलपूरणं कुर्यात् अंजल्योपस्तरणं ... पूर्वेणाचार्यगोत्रत्वाद् अनुसंधेयं । कन्याशिरस्थ
रेणानुक्रमात् ... स्यपरिशिष्टरूपेणाचार्यगोत्रत्वादनुसंधेयं ॥ ९२ ॥ वरः कन्याललाटे
माल्यस्य गृहीत्वा कौसुम्भं दलं सघृतं क्षीरसंयुक्तं कुर्यात्तिलकमुत्तमं ॥ ९३ ॥ ललाटे तिलकं कुर्यात्
च कन्यावरशिरस्त्रजः । पुष्पस्य दलमादाय क्षीराज्याक्तं वरस्य तु ॥ ९३ ॥ ललाटे तिलकं कुर्यान् ७८
दीक्षयातां मिथो मुखमिति ॥ अस्यार्थः ॥ अक्षतारोपणानन्तरं वरः कन्याशिरसि स्थितस्य
माल्यस्य कौसुम्भं कुसुमसंबंधि दलमादाय क्षीरघृतेनाप्लुत्य कन्याललाटे तिलकं कुर्यात् ।
माल्यस्य कौसुम्भं कुसुमसंबंधि दलमादाय क्षीरघृतेनाप्लुत्य कन्याललाटे तिलकं कुर्यात् । एवमुभे
तथैव वधूवरावन्योन्यशुभमंगलकुसुमावगुण्ठिते पुष्पमाले कण्ठे परिधापयेताम् ॥ वधास्त्वात मुभे
तथैव वधूवरावन्योन्यं शुभमंगलकुसुमावगुंठिते पुष्पमाले कंठे परिधापयेतां । कंठे मिथः शुभे माल्ये दं ×
× सापि कन्यको वरस्य स्त्रजः पुष्पस्य दलं क्षीराज्यमिश्रं कृत्वा वरललाटे तिलकं कुर्यात् । ततो वधूवरौ परस्परमुखमीक्षयेतां । कंठे मिथः शुभे माल्ये दं
पती प्रतिमुंचतां ॥ ९४ ॥ अस्यार्थः । परस्परं निरीक्षणानन्तरं × ९

योः प्राङ्मुखयोः वत ततः परं । देवीं शाक्षायणीं नत्वा सर्वसंपत्प्रदायिनीं ॥ ९५ ॥ होमदेशे व्रजेतां तौ परिगृह्य क
रौ मिथः । तदेतत्स्वरुद्धकिसूत्रेणोच्चारणादिना ॥ ९६ ॥ अस्यार्थः । उभयोर्वधूवरयो वस्त्रान्ते वसनप्रा
न्ते अंचले बध्नीयादाचार्यः । तथा च गृह्यपरिशिष्टरूपेणाचार्यः । अथ पुरोधास्तयोरुत्तरीयान्तयोः पंच
पूगीफलानि विवाहमन्त्ररक्षिणीं यं गणाधिपमनुस्मृत्य गणानां त्वा गणपतिं हवामहे इत्यादि इदं द्रष्ट
मेतं इति बध्वा उत्तरीयान्तो चनीललोहितं भवतीति बध्नीयादिति । तदनन्तरं दंपती पूर्वाभिमुखौ भूत्वा
सर्वसंपत्प्रदायिनीं शाक्षायणीं गौरीं देवीं नत्वा षोडशोपचारैरभ्यर्च्य स्मृत्यंतरोक्तत्वात् । वरः इष्टदे
वतामनुस्मरन् मंगलसूत्रसंज्ञकौसुम्भवर्णकृष्णमणिमालां वधूकंठे समंत्रं बध्नीयात् । तत्र मन्त्रः । मां
गल्यतंतुनानेन भर्तृजीवनहेतुना । कंठे बध्नामि सुभगे सजीव शरदः शतमिति । ततो वधूवरौ मिथः प
रस्परौ हस्तावुपगृह्य होमदेशं होमप्रदेशं गच्छेतां । तदेवं तत्सूत्रकारः पूर्वोक्तमक्षतारोपणादिकं उ
च्चावचानादिनाविक्तिकथयति । अथ खलूच्चावचा जनपदधर्माग्राम धर्माश्च तान्विवाहे प्रतीयादित्यनेन
सूत्रेणेति । आत्मनो दक्षिणे पार्श्वे वधूं तामुपवेश्य च । उपलेपादिकं कृत्वा हविर्भुजः स्थापनादिकं ॥ ९७ ॥ न
अग्नेः पश्चात्प्रतिष्ठाप्य दृषदं सोपलामथ । उदकुंभं निधायाग्नेः प्रागुदीच्यमतः परं ॥ ९८ ॥ आज्याधिश्र
यणांतं स्याद्दत्वाधानादि पूर्ववत् । आज्येन सहलाजानां पर्यग्निकरणं भवेत् ॥ ९९ ॥ त्रिः प्रोक्षणं भवने

Indira Gandhi National
Centre for the Arts

७९ यांकेवलोसवनेसति। इध्माभिघारणांतस्याद्राज्यस्योद्वासनादिकमिति॥३०१॥ अस्यार्थः। अथवरोव
ध्वासहहोमदेशमागत्यआत्मनोदक्षिणभागेतांवधूमुपवेश्यकर्मांगंद्विराचम्यप्राणानायम्यतिथ्यादिस्म
त्वाज्योतिःशास्त्रोक्तलक्षणसंपन्नायांशुभतिथौअस्याममवध्वाःसम्यक्भार्यात्वसिध्यर्थंविवाहहो
मंकरिष्यइतिसंकल्प्यउपलेपादिअग्निप्रतिष्ठापनांतंपूर्ववत्कृत्वाअद्यविवाहहोमेव्याहृत्याअग्निमति
ष्ठापनानंतरंअग्नेःपश्चिमभागेपेषणकार्यप्रासिद्धादृषद्दृसेपलेपसमेतांस्थापयित्वाततोप्यैशान्य
भागेमंगलद्रव्येराचैतंसपल्लववमुदकुंभंस्थापयित्वाअन्वाधानादिउत्तरतोगारेभुआज्यस्थापनांतंकुर्यात्।
तत्रान्वाधानप्रकारः। तद्दृगमन्वाधानंकरिष्यइतिसंकल्प्यअत्राज्यहोमः। अग्निंपवमानंअग्निंपवमानं
अग्निंपवमानंअर्यमणंप्रजापतिंचएताःप्रधानदेवताःआज्यद्रव्येणअर्यमणंवरुणंपूषणंएताःप्र
धानदेवताःलाजद्रव्येणअग्निंस्विष्टकृतमाज्यद्रव्येणअन्यत्समानंसद्योयक्ष्यइतिसंकल्प्यसन्निद्द
यंत्रंवाव्याहृतिपूर्वकमग्नौप्रक्षिपेत्। एवमन्वाधानादिकंकृत्वाहोमद्रव्यरूपाणांलाजानामाज्य ७९
नसहपर्यग्निकरणंकार्यमिति। अधिश्रयणादिपर्यग्निकरणराहित्येनैवकेवलमाज्यहोमयोग
योग्यतासिध्यर्थंलाजानांत्रिःप्रोक्षणंभवेदिति। तत्रआज्योद्वासनादिइध्माधानाद्याघारांतंतथैव
कृत्वा। वधूदक्षिणहस्तेनसमन्वारब्धएवसन्। कुर्यादाघारपर्यंतंचोलोक्ताज्याहुतित्रयमिति॥३०२॥अ

स्यार्थः। इध्माभिघारणानंतरंवरःवधूदक्षिणहस्तेनस्पृष्टःसन्। आघारपर्यंतमिध्महोमंकृत्वाचौलकर्म
ण्युक्तेनअग्नआयूंषिपवसइत्यादिमंत्रत्रयेणआज्याहुतीर्जुहुयात्। अत्राज्यभागौनेष्टाविति
वैमेवत्। हुत्वात्वमर्यमेत्यन्यांप्रजापतइतीतरां। अस्यार्थः। अत्राज्यभागौतत्इतिपूर्वमेवोक्तंततस्त्वम
र्यमेतिमंत्रेणचतुर्थींहुत्वाप्रजापतेनत्वदेतिपंचमींजुहोति। अथोत्तरतमुखींकुर्यात्। जयावनंताम
प्राङ्मुख्याउपविष्टायांतिष्ठन्प्रत्यङ्मुखःस्वयं॥३॥ अस्यार्थः। अनंतरंलाजाभ्यासंकृत्वाअवनतानना
नम्रमुखीमुन्नतमुखींकुर्यात्। वरःपाणिग्रहंतिष्ठन्नेवकरोतीतिविधीयते। तत्कथमित्याह। तत्रैव
प्राङ्मुख्याःपूर्वाभिमुख्याःउपविष्टायावध्वाःतिष्ठन्नेवप्रत्यङ्मुखःपश्चिमाभिमुखःसन्वरःपा
णिग्रहणंकुर्यात्तत्प्रकारमाह। उत्तानेनाथवाचीनेनोत्तानस्यकरस्यच। अंगुष्ठादिवगृह्णी
यादृभ्णामीसनयाततइति॥४॥ अस्यार्थः। उत्तानेननीचेनवास्वेनकरेणवध्वाःउत्तानस्येवृक
रणस्यअंगुष्ठादिग्रहणंसूत्रोक्तपक्षानुसारेणसमंत्रंकरोति। ग्रहणेमंत्रस्तुगृभ्णामितेसौभगत्वायहस्तमितिपाणिंगृहीत्वानामुत्थापयति। इदमत्रगृह्यं। तिष्ठन्प्रत्यङ्मुखःप्रा
सौभगत्वायहस्तमितिपाणिंगृहीत्वानामुत्थापयति। इदमत्रगृह्यं। यादिकामयीतपुमां
ङ्मुख्याआसीनायागृभ्णामितेसौभगत्वायहस्तमितिसांगुष्ठमेवगृह्णीयाद्यदिकामयीतपुमां
सएवमेपुत्राजायेरन्निति। संगीतीरेवस्त्रीकामारोमांतेहस्तंसांगुष्ठमुभयकामइति। अनेनप्र

Indira Gandhi National
Centre for the Arts

कारेण पाणिग्रहणं कृत्वा। उपस्तृणाति भार्यायाः अंजलौ प्रोक्षिते वरः। वधूभ्राता यवा भ्रातृस्था
६० नो लाजान्निःक्षेपयेत्। पंचावत्ति वरः स्याद्वेदं जलौ तांस्त्रिरावपेत् ॥५॥ अस्यार्थः। वरो भार्यामु
स्थाप्य प्राङ्मुखीमवस्थाप्य तत्कराविद्भिः प्रक्षाल्य अंजलिकारे यित्वा स्रुवेणाज्यं गृहीत्वा तदंजला
वुपस्तीर्य तेस्मिन् अंजलौ वध्वाः भ्राता तत्स्थानीयो वा लाजान्द्विरावपेद्द्विवारं क्षिपेत्। वरः पंचा
वत्ती जामदग्न्यश्चेत्त्रिरावपेत्। स्कबोधिकारिकायामपि। त्रिर्जामदग्न्यस्यावाप्यो द्विरन्येषामिति स्थि
तिरिति स्वयमेव भ्रातृस्थानीयानाह। भ्रातृस्थानपितृव्यस्य मातुलस्य वयः स्कृतः। माघ सस्कृत्स्ना
तस्कंनस्तोऽह लितृपस्ताः इति स्पष्टोर्थः। वरः शूर्पगतान् लाजान्वध्वाभिघारयेत्॥७॥ पर्यमणं
मंत्रमथपत्नी। स्थितासती। कुर्वत्यजल्यविच्छेदं मंगुल्यग्रैर्जुहोति तान्॥८॥ अस्यार्थः। वरः शूर्पस्थान्
लाजानभिघार्य पश्चात्तदंजलावपि अवत्ताभिहितान्यस्याभिघार्य उत्थिता भार्या विरलांजलिमकुर्व
ती सती अंगुल्यग्रैर्जुहोति। अर्यमणमिति मंत्रेण तत्र मंत्रं वरः पठति। होमलाजप्रमाणमाह सिद्धांतशे
खरे। कर्षमात्राणि भक्ष्याणि लाजामुष्टिमितामताइति। हविर्भुगंभः कुंभोत्तरदृषदं प्रदक्षिणं वधूं प
रिणयेत् मंत्रममोहमिति वेजपन्॥९॥ इममश्मानमारोहेत्येतेन प्राङ्मुखीं वधूं उभाभ्यामपि पा ६०
दाभ्यामारोप्य दृषदं पुनरिति। अस्यार्थः। वरः अमोहमिति मंत्रं जपन् दृषदं जमभ्युदकुंभोपरि श्रेणं

यथा भवति। तथा वधूं दृषद्देश पर्यंतं स्वयमग्रे गच्छन् नीत्वा वध्वा सह प्रदक्षिणी कृत्वेत्यर्थः। इममं
श्मानमारोहेत्यनेन मंत्रेण प्राङ्मुखीं वधूं दृषदुपरि उभाभ्यां पादाभ्यामारोहयति अत्र पुनः शब्द उ
त्तरत्र होमविधाने युज्यते इदं मत्रं गृह्यं। प्रदक्षिणमग्निमुदकुंभं च त्रिः परिणयेत् पत्यमोहमस्मी
ति। अत्रत्रिः पदं परिणयनेनेन संबध्यते न पठनवा। परिणयनं नाम परितो नयनं। यादि परिणयनेन संबं
धः। तदाजपरित्येकवारं। यदि जपेन संबंधः। तदा परिणयनमेकैकवारं। अतस्तत्रैव गृह्य परिणीये
ति वीप्सा दर्शनात्। परिणयनेन संबंधः। जपश्च परिणयनांगमिति कृत्वा यावत्परिणयनं तावदावर्त
ते। अंजल्युपस्तृत्यादिस्या दृषदारोहणोत्तरं। वरुणमितिहोमां जल्युपस्तृत्यादिपूर्ववत्॥११॥ अश्मा
रोहणपर्यंतेहवनं भूषणान्विति। प्रजापतिं चतुर्थ्यं तु स्वाहायुक्तं वरः स्मरेत्॥१२॥ शूर्पकोणेनिवि
ष्टांल्लाजान्भ्यां मं जुहुयाद्वधूः। जयंतस्वाहा हवनं चतुर्थं वरकर्तृकमिति॥१३॥ अस्यार्थः। पुनस्तथैव
तस्या अंजलौ आज्यस्योपस्तरणादि दृषदारोहणपर्यंतं पूर्ववत्कुर्यात्। विशिष्टमत्र कारमेव क
थयति। द्वितीये। पति प्रत्या एव वध्वाः वरुणमिति - - मंत्रेण अंजलिस्थान् लाजान् पूर्ववद्दरेण
हावयेत्। पश्चात्परिणयनादि अश्मारोहणांतं कुर्यादित्यर्थः। पुनस्तथैव तृतीये अंजल्युपस्तृत्यादि अ
भिघारणावसानं कृत्वा पूषण्विति मंत्रेण वरः वध्वांजल्यग्रेण लाजान्हावयेत्। पुनस्तथैव वध्वा सह

Indira Gandhi National
Centre for the Arts

प्रदक्षिणी कृत्य दृषदारोहणांतं कृत्वा अवशिष्टान् लाजान् जुहोति। एतावत्पर्यंतं वरस्याहाग्नेर्वधूकर्तृकं ह
८९ वनं भवेत्। कुतः गृह्ये अविच्छिन्दत्यंजलिं स्रुवेव जुहुयादित्यत्र अविच्छिन्दतीति। स्त्रीलिंगात्। अथ अवशिष्टान् शूर्
पकोणास्थितान् लाजान् वधूः अभ्यासमात्माभिमुखं शूर्पाग्रेणैव निःशेषं तूष्णीं जुहुयात्। ततो वरः
स्वाहासहितं चतुर्थं प्रजापतये स्वाहेति मनसा स्मरेत् ध्यायेदित्यर्थः। जयंत निबंधकारस्तु चतुर्थं हवनं वरकर्तृ
कं वर एव कर्ता यस्य तादृशमित्याह इत्यलं कृत्वा। अतो न पक्षद्वयं। अत्र भर्तृयोगेन। कन्यकां प्रातिगृह्ये वंवरः पू
र्ववरासने। तस्यै वा पालिशेत्पश्चात्तां वधूं मातुलादिकः। स्वजनपरिगृह्य प्रेरुत्तरेण वरस्य तु। पश्चिमेन प्रयाणीता
तस्मिन्ने ववरासने। वरस्य पश्चिमे पार्श्वे प्राङ्मुखीउपवेशयेत्। समाधाय पुरस्तात्तं अन्वाधानादिकं क्रमात्।
प्रणीतासादनांतं तु वैभाषाथ विश्वावसोः। उदकसूर्वे स्थितान् लाजान् विन्यस्याथाज्यसंस्कृतिं। प्रक्रम्य क
र्मानुयाजनिधानांतं विधायस्व। ततो वधूकरः स्पृष्टः कृत्वे ध्माधानपूर्वकं। पुरस्तात्तंत्रशेषं तमाज्यभागविव
र्जितं ततः प्रधानहोमांश्च कुर्यादाज्येन तत्र तु। पूर्वं कृत्वा प्रआ सूंषिीत्याद्यैर्मंत्रैस्त्रिभिः क्रमात्। त्वमर्यमा
चतुर्थश्च पंचमी तु प्रजापते। व्यस्ताभिश्च समस्ताभिः कृत्वाहुतिचतुष्टयं। अथोत्थाय वरो वध्वाः प्राङ्मु
ख्याः पुरतः स्वयं। प्रतीच्याभिमुखस्तिष्ठन्नासीनायाः करांगुष्ठकं। दक्षिणं दक्षिणेनैव पाणिना तु गृह्य संयु ८९
तं। गृभ्णामीति ऋचा सम्यग्गृहीत्वोत्थाप्य तां वधूं। प्राङ्मुखीं सम वरस्य प्यक्षात् स्थित्वाथ तत्करौ। कारयित्वांज

लिं ताभ्यां तस्मिन्नाज्यं स्रुवेण तु। उपस्तीर्य वरस्तिष्ठन्नुतिगृह्य तमंजलिं। तस्यास्तत्रांजलौ भ्राता भ्रातृस्थानी
य एव वा। शूर्पादंजलिना दापलाजानूतिष्ठन्दिरापेवतु। पंचावत्तीवरःस्याच्चेत्ततो लाजांस्त्रिरुद्धपेदाव
रोथपंचशूर्पस्थान् लाजान् प्रत्यभिघारयेत्। अंजलिस्थान् तु तांश्च पश्चात्तत्यभिघारयेत्। सर्वत्रैषोवदान
स्य प्रकारः प्रतिगृह्यतां। वरोधार्यमणस्वाद्यं मंत्रं बध्वार्थमीरयेत्। सर्वत्रैषोवदानस्य प्रकारः प्रतिगृह्यतां।
वधूःस्वांजलिविच्छेदमकुर्वाणा स्रुवेवतान्। लाजानंजलिपार्श्वेन जुहुयाद्वधा नतः। एवमेव वधूपाणिं
गृहीत्वाप्यवरः। अश्मानं वर्जयित्वाग्निमुदकुंभादिसंयुतं। प्रदक्षिणं परिणयन्वधूमग्नेस्वयं व्रजेत्।
अमोहमस्मिसात्वं सेत्यादिमंत्रमुदीरयेत्। इममश्मानमित्याद्यं मंत्रमुक्त्वा वरो वधूः। अश्मानमारोप्य पुनर्ला
जाहोमं समाचरेत्। लाजहोमे द्वितीये पि पूर्ववत्सक्रियाखिला। वरुणं त्वादिकोहोमः मंत्र एव तु भिद्य
ते। पूर्ववत्परिणीयाग्नीमश्मानमधिरोप्यच। तृतीयमपि लाजानां होमं पूर्ववदाचरेत्। मंत्रो त्वपूषण
न्वादि सर्वमन्यद्यथापुरा। परिणीय तथैवाग्निमश्मानं चाधिरोपयेत्। हुतावशिष्टान् लाजांस्तु वधूःस्वा
भिमुखं ततः। शूर्पाग्रेणैव जुहुयात्तूष्णीं। निरवशेषतः। तस्यां तूष्णीं तु जुह्वत्यां वरो ध्यायेत्प्रजापतिमि
ति। याद् दि बद्धे शिखे वध्वा देशधर्मानुसारतः। प्रत्वामुंचामि मंत्रेण दक्षिणां तु विमुंचति ॥९४॥ प्रे
तो मुंचामि मंत्रेण उत्तरां तु विमुंचति। अस्यार्थः। यदि देशकुलादिधर्मेण वध्वाः केशपार्श्वयोः उ

Indira Gandhi National
Centre for the Arts

त्रे एकन्यादानावसरे बद्धे शिखे भवतः। तदा प्रत्वामुञ्चामीत्यनेन मंत्रेण दक्षिणभागस्थां शिखां मुञ्चति। तथा
प्रेतो मुञ्चामीत्यनेन मंत्रेण सव्यकेशपक्षस्थां शिखां विमुञ्चति। शौनकोपि। ऊर्णासूत्रेण यद्यस्याः केशपक्षस्य
पार्श्वयोः शिखे बद्धे तदा प्रत्वामुञ्चामीत्याद्ययर्चा तयोः शिखां दक्षिणपार्श्वस्थां विमुञ्च्योत्तरया ऋचा॥
प्रेतो मुञ्चेत्यादिकया ऋचा विमुञ्चेदुत्तरां शिखामिति। अभ्युत्क्रामयतीशान्यां वधूं सप्तपदानि तु॥१५॥स
व्याभ्युत्क्रमयेत्पूर्वं दक्षिणपादमात्मनः॥इष इत्यादिकं मंत्रमनुषक्तेभवादिना॥१६॥सप्तमे क्रामिते तत्स्थः
शिरसी सन्निधाय च। अम्भः कुम्भात् सातेन शिरसी अवसिंचतीति॥१७॥अस्यार्थः। अथाग्नेरीशान्यदेशे व
धूं सप्तपदानि दक्षिणपादेन प्रपूर्वकम् अभ्युत्क्रामयति। क्रमेण चालयति। अथाग्निशालाया ईशान्यदेशे
सप्ततंदुलमुष्टयः स्थाप्या भवंति तथैव स्वयमपि वरः प्रदक्षिणपूर्वकं वलनक्रियां कुर्यादिति। तत्रेष इत्या
दिसप्तमंत्रेष्वेकैकमंत्रेण एकैकं पदं क्रामयति। कथंभूतेन मंत्रेण एकैकं पदं क्रामयति। कथंभूतेन मंत्रेण भ
वादिना अनुषक्तेन। इष एकपदी भवेत्यादिमंत्रसप्तके भवादिकं सर्वसमानं भवपदात्पूर्वं मंत्रसप्तकेपि
एकत्वसंख्यामारभ्य सप्तमीसंख्यापर्यंतं मंत्रभेदः। इषे एकपदी भव। ऊर्जे द्विपदी भवेत्यादि। अतः भवा
दिना अनुषक्तेरनुगतेरित्यर्थः। अथ सप्तमपदक्रमते सति तत्रैव स्थित्वा परस्परमात्मनोः शिरसी सल
ग्ने कृत्वा अग्नेरुदग्देशे स्थापितमुदकुम्भं अन्येन आहृत्य चावरः उदकुम्भस्योदकेन उभयोर्दंपत्योः शि

रसी सिंचति। आज्येन स्विष्टकृद्धोमं कृत्वा शेषं समापयेत्। होमादारभ्य यं छत्री वाचं दद्याद्ध्रुवादिकान्।
॥१८॥जीवपत्नी सा वाचं विसृजेत्ततः परं। दंपत्योरत आरभ्य गृहवेशीयहोमतः॥१९॥ऊर्ध्वं त्रिरात्रमथ
वा द्वादशाहं भवेद्व्रतं। आब्दं वा क्षारलवणवर्जितं भोजनं भवेत्॥२०॥अधश्शयनं तद्वद्ब्रह्मचर्यं भवेदिति।
अस्यार्थः। शिरःसेचनानंतरं वरः पूर्ववदासित्वा आज्यद्रव्येण स्विष्टकृद्धोमं कृत्वा परिषेचनपर्यंतं समापय
ति। होममारभ्य वधूः वाचं यच्छेत्। मौनं कुर्यादित्यर्थः। अथ ध्रुवादिकान् आदिश्य ध्रुवं अरुन्धत्या सह सप्तर्षी
न् एतान् दृष्ट्वा जीवपत्नी प्रजां विन्देय इति मंत्रेण वाग्विसर्जनं करोति। मंत्रजपस्तु वध्वा एव भवति वृत्तिकारवच
नात्। अत आरभ्य गृहप्रवेशनीयहोमादूर्ध्वं त्रिरात्रं वा दंपत्योर्व्रतं भवति। विवाहहोममारभ्य क्रियमाणगृह
प्रवेशनीयहोमादनंतरं त्रिरात्रं द्वादशरात्रमब्दं वा हविर्भोजनं अधःशयनं ब्रह्मचर्यं च भवेदिति। अत्र भगवा
न्। अथ तां पूर्वमार्गेण परिगृह्य वधूं वरः। अग्नेः पूर्वोत्तरदेशं नीत्वा तस्याः पुरो व्रजेत्। इष एकपदीत्यादिमु
क्ता मंत्रपूर्वकं। भवादिपदसंख्याने प्रत्येकं योजयेत्सदा। अथ स्वस्य शिरसा वध्वाः शिरः संयोज्य तेउभे। सिंचता
दुदकुंभस्थसलिलेन वरः स्वयं। ततः पूर्ववदासित्वा स्विष्टकृद्धोमपूर्वकं। उपरिष्टात्क्षणं तंत्रं विरचीत यथावि
धि। यस्मिन्काले विवाहः स्याद्रजन्यामथ वा दिवा स्वयं। तत्र होममुपक्रम्य प्राग्विवाहसमापनात्। वधूर्वाग्नि
यमं कृत्वा वर्तेत वाग्यता सती। निवृत्ते तु विवाहे तां वधुर्ध्रुवमरुन्धतीं। सप्तर्षींस्तस्ययेत्पश्चाद्दृष्ट्वा वं कुमंश

Indira Gandhi National
Centre for the Arts

क्तिनः। वध्वर्थं जीवपत्न्यादिवाक्यं च व्याहरेद्वरः। अथ रक्षां विवाहाग्नेः कारयित्वा विधानतः। ततो
८३ भिवंदिता सीतवध्वा सार्द्धं द्विजातिभिः। क्रियमाणसहाशीर्भि रक्षतारोपमगन्त्विति॥ इति विवा
हहोमः॥ विवाहानंतरं गच्छेत्सभार्यः स्वस्य मंदिरं॥२१॥ यदि ग्रामांतरे तस्यात्तत्र यानेन गम्यते॥
पूषा त्वेत्यनया यानं वधूमारोहयेद्वरः॥२२॥ दंपत्योरग्रतो जाग्रत्त्व विवाहाग्निर्नयंतिच। गृहान्निर्गच्छ
पि तोरेषा स्वग्रामे भवेद्विधिरिति॥२३॥ अस्यार्थः॥ विवाहहोमानंतरं मंगलं वेनेव गृहप्रवेशनीया
र्थं सभार्यो वरः स्वमंदिरं गच्छेत्। यदि स्वगृहं ग्रामांतरं स्यात्तदा यानमारुह्य प्रमाणं भवति। पूषा त्वेतोन
यतु हस्तगृह्येत्यनया ऋचा तां वधूं यानोपरि स्वयमुपवेशयति। अथ स्वयमपि तत्रोपविशति। एकस्मिन्नया
नेयानांतरे वेति नात्र नियमः। अथ विवाहाग्निं दंपत्योरग्रतः स्कंधे गं। अग्निरक्षणकुशलाः सजातीयाः अजस्र
मिति समारोपणमकृत्वैव साक्षाद्दीप्तं प्रत्यक्षं नयंतीत्यर्थः। वृत्तिकारेण प्रदर्शितोयं गृह्यस्यार्थो गृह्यते। विवाहाग्नि
मग्रतोजस्रं नयंतीति। अत्र विवाहाग्निमित्यनेनैव सिद्धे यत्पुनरजस्रमित्याह। तेन समारोपणमस्मिन्विवाहे प्रया
णेनैव कार्यमिति वृत्तिकारः। तथा सति प्रयाणांतरे समारोपणं कुर्यादिति। तेनैव व्याख्यातं। विवाहगृहान्निर्गता ८३
दंपत्योः प्रयाणाख्यो विधिः स्वग्रामादि भवति। ब्राह्मणी जीवपत्नी या जीवपत्या च तद्गृहे वसे[illegible]त्तरा रात्रिं स्वग्रामेने
तद्दिनैः॥२४॥ यद्यंतरा नद्यादिना वमारुह्य यातिचेत्। अश्मन्वतीसृचार्द्धेनैनां नावमारोहयेद्वधूं॥२५॥ अ

स्ति

र्धर्चेणोत्तरेणैनां जलादुत्तारयेद्रथेति। अस्यार्थः। प्रयाणविधौ वृद्धा ब्राह्मणभार्या भाग्यवती भर्तृका पुत्रापु
त्रादिसहिता तस्याः स्वमंदिरे प्रथमवसतिं कुर्यात्। अपरदिने पुनार्यं। नियमः। तथा च स्वग्रामे एकग्रामेत्र
याणाभावात्रायं विधिः। यदि मार्गे बहूदका नदी भवति तदा अश्मन्वतीसृचा पूर्वार्धेन वधूं नावमारोहयेदिति।
स्वस्य नायं नियमः। अथ नद्याः परपारे प्राप्ते तस्या एव ऋचः उत्तरार्धेन तां वधूं जलादुत्तारयेदिति। लाक्ष
णिकायं प्रयोगः॥ नीयमाना वधूर्बंधुवियोगाद्यदि रोदिति। जपेज्जीवं रुदंत्येतां मे कन्यामेष्य विधिः॥
२६॥ अस्यार्थः। नीयमाना वधूर्बंधुवियोगाद्यदि रोदनं करोति। तदा वरो जीवं रुदंतीत्येतामृचं जपति। एक
ग्रामेप्यत्र रोदनविषये समानं। जपश्चोभनदेशादौ मा विदन्परिपंथिनः॥२७॥ स्कमंगलीरिवं वेक्षेत वासे वा
से समीक्षतां॥ इह प्रियमृचा भार्यां स्वस्य गेहं प्रवेशयेदिति॥२८॥ अस्यार्थः। यत्र महानगरादि प्रवेशे चतुष्प
थादौ अन्येषु परिमणीयप्रदेशेषु मार्गगत्या गच्छन्सन् मा विदन्परिपंथिन इति मंत्रेण विलोकयेत्। वासे वा
से प्रतिवसतौ अयं नियमः। वासादन्यत्रेक्षणे न मंत्रः। अनया रीत्या स्वमंदिरं प्राप्य इह प्रियमिति ऋचा वरः
स्वगृहे वधूं प्रवेशयेदिति॥ इति विवाहानंतरं प्रयाणविधिः॥ ॥अथ गृहप्रवेशनीयहोमविधिः॥ उपले
पादिकं कृत्वा विवाहाग्निं समिध्य च। प्राग्रीवासु च लोमाग्नेः प्रत्यगानडुहाजिनं॥२९॥ आज्यासादनपर्यंत
मन्वाधानादि पूर्ववत्। चर्मण्युपविष्टायां समन्वारब्ध एव सन्॥३०॥ अस्यार्थः। शुचिरपि कर्मांगं

Indira Gandhi National
Centre for the Arts

हितान स्यनुपलेपनोल्लेखनं कृत्वा संस्कृते स्थंडिले विवाहाग्निं समिध्य स्त्रीसंकृत्वा प्राणानायम्यत्र
स्य विवाहाग्नेः सम्यक् गृह्यत्व सिध्यर्थं भार्यादंपत्योः एकर्षित्व सिध्यर्थं गृहप्रवेशनीयहोमं करि
८४ ष्ये। अत्र संकल्पे अस्य विवाहाग्नेः सम्यक् गृह्यत्वसिध्यर्थं न केवलं विवाहहोममात्रेणाग्नेर्गृह्यत्वसिध्यर्थं
गृह्यत्वं तु एकर्षित्वं जायत इत्येवं एकर्षित्वं नाम पितृगोत्रं विवाहे पतिगोत्रं भजत इत्यर्थः। संकल्पानंतरम
ग्नेः पश्चिमभागे प्राक्ग्रीवं ऊर्ध्वलोमं अनडुहं चर्मास्तीर्य अस्तरणानंतरमन्वाधानादि आज्योद्वासनपर्यंतं कु
र्यात्। अत्रान्वाधाने सूर्यसावित्र्याः प्रधानदेवताः आज्योद्वासनानंतरं चर्मण्युपविष्टायां वरस्य दक्षिणस्कंध
लग्नायां सत्यां एतयोः समन्वारब्धः कर्म कुर्यात्। इध्माधानादि आज्यभागपर्यंतं पूर्ववत्कृत्वाऽग्निमभ्य
न स्वभिर्धानः प्रजामित्यादिभिस्तथा॥३०॥ पंच आज्याहुतीर्हुत्वा स्वाहाकारमृगंते ततः। समंजंत्वित्यृचा
प्राश्य दधि तस्यै प्रयच्छति॥३१॥ स च प्राश्नाति तूष्णीमथ स्विष्टकृदादिकं॥ अथ मानक्ति हृदये एतये
वाज्यशेषत इति॥ अस्यार्थः। आनः प्रजामित्येतेन स्वभिः ऋग्भिः ऋगंते मंत्रांते स्वाहाकारं पठन् जु
होतीत्यर्थः। गृह्ये प्रत्यच ग्रहणस्य विद्यमानत्वात् एवं प्रधानहोमं कृत्वा समंजंतु विश्वेदेवा इत्यनेन मंत्रे ८४
ण दधि प्राश्य दध्येकदेशं भार्यायै प्राशनार्थं दद्यात्। सा च अमंत्रकमेव प्राश्नाति। प्राशनमनाभि
कयैवांगुष्ठाचारः। अथ दधिप्राशनानंतरं स्विष्टकृदादि होमशेषं समापयेदिति। अथवेति पक्षांत
सिद्धिः॥ किं तर्हि गृहप्रवेशनीयहोमकृते उभाभ्यामपि होमाभ्यां गृह्यत्वसिद्धिः। अत्रैव एकर्षित्व+ ११

रमाह। होमे शेषेणैवाज्येन एतयाऽऽस्रुचा आत्मभार्ययोर्हृदये स्वयमेवानक्ति घृताक्तं करोति। तत्रापि भा
र्याविषये मंत्रावृत्तिर्नास्ति यदि रुग्णाया कस्यचिदनुरोधेन वा दधिप्राशनं न भवति। तदाऽऽनयैव स्रु
चा स्वस्य च भार्यायाश्च हृदयं हुतशेषणाज्येन स्पृशतीत्यर्थः। अत्रापि अनामिक एव। इदमत्र गृह्यं। इति दध्नः प्राश्य
प्रतिप्रयच्छेदाज्यशेषेणवानक्ति हृदये भगवानपि। समंजंत्वित्यागामृच मुक्तास्वयं दधि। किंचित्प्रा
श्यावशिष्टं च दधितां प्राशयेद्वधूं। अथवाहुतिशिष्टाज्यशेषेणैवोरसी उभे। समंजंत्वनयैवर्चा स्वस्य
वध्वाश्चापि क्रमात्। ततः स्विष्टकृदाद्यं तत्र शेषं समापयेदिति॥ ॥ इति गृहप्रवेशनीयहोमविधिः॥
वध्वा विवाहे वेलायां या सोपरिहितां वरः। सत्येनोत्तभितौ वेत्तियः पार्वताथतः॥३३॥ तस्मै विधाय स्रकं
तेदद्याद्हुतां तेधातमंवरं। ब्राह्मणान् भोजयित्वैतानास्वस्तिसूक्तं वाचयेत्॥३४॥ ॐ स्वस्तीति प्रति
ब्रूयुर्ब्राह्मणास्तेन पूजिताः॥ स्वस्त्यादि वाचयित्वा दोस्त्रियं तामुपगच्छति॥३५॥ मुहूर्ते शोभनेत
स्यो ब्रीडान स्या यथा तथेति। अस्यार्थः। गृहप्रवेशनीयहोमानंतरं त्रिरात्रं द्वादशरात्रं संवत्स
रं वा अक्षारालवणाशनादि पूर्वोक्तनियमेन दंपत्योः सामान्यं चरेत् सति तदंते अग्नौ तेव धाभार्यया विवाहस

Indira Gandhi National
Centre for the Arts

मयेयस्परिहितं वासः। नदेत्तुमप्रक्षालितवसनं सत्येनोत्तभितेति सूक्तं अर्थतः पठतः यो वेत्ति तस्मै ब्राह्मणाय
दद्यात्। तथा च शौनकः। व्रतेसमाप्ते वध्वा च विवाहसमये धृतं। वस्त्रं प्रपद्यात्तस्मै ब्राह्मणाय विपश्चि
८५ ते। सूर्यानाम्नीऋचा वेत्ति शब्दार्थस्वरतश्च यः। सत्येनोत्तभितेत्याद्यामृचमारभ्य याः ऋचः। विहिसोतो
रसृक्षतनेंद्रमित्याद्युचः पुरा। अधीतास्ताः स्तदोच्यंते सूर्याशब्देन सूरिभिरिति। अनंतरं व्रतांगब्राह्म
णभोजनं कृत्वा ब्राह्मणामर्थं स्वस्तीति भवंतो ब्रुवंत्विति। एतान्भुक्तवत एव द्विजान्वरः ॐ स्वस्तीति वा
चयेत्। तेन वरेण पूजिताः यथाशक्तिवस्त्रदक्षिणाभिस्तोषितास्तेपि ब्राह्मणाः ॐ स्वस्तीत्याशीर्वचनं त
दर्थमतिब्रूयुः। व्रतसमाप्त्यनंतरं सुमुहूर्ते ब्राह्मणैः स्वस्त्यावाच्य तामेव [illegible] मुपगच्छेत्
स्पर्शादि संमतं करोति। यथा येन प्रकारेण तस्याः उज्ञा न भवेत्। सुंदरवचनैरपेक्षतां कुर्या
रयस्त्र्यादिदानैः प्रीतिमुत्पाद्य ऽज्ञामप्रत्यायनीयपरस्पराभिमतं विषयभोगमनुसरति। इति
व्रतोत्सर्गविधिः॥ गृहप्रवेशनीयहोमं दर्शपूर्णमासश्राद्धोपार्वणस्थालीपाको न कार्यः। प ८५
रिचरणहोमस्य नित्यहोमः कार्य एव। गृह्येत्र्यंवक्ष्यति पाणिग्रहणादि गृह्यं परिचरेदिति।

वैश्वदेवं च कार्यं कैश्चित्तु चतुर्थ्यां अपररात्रौ होमम् इच्छंति तदस्मच्छास्त्रे नास्ति आपस्तंबशाखी
येनोक्तं। नष्टस्यौपासनाग्नेः पुनः संधाने क्रियमाणे अग्निप्रतिष्ठाद्यन्वाधाय विवाहवत्कुर्या
त्। विवाहाग्न्याहुतयः आज्याहुतयः गृहप्रवेशनीयाग्न्याहुतयः हृदयांजनं भवति। नान्यत्र होमवृ
यंचात्र समानतंत्रं स्यात्। आज्याहोमोत्रापि पत्न्यांजलिना कार्यः। आज्यावपनं तु स्वयमेव क
रोति। नवधूभ्रात्रादयः॥ ३५॥ अथ नित्योपासनविधिः। अथ यस्मिन्विवाहाग्निरुत्पन्नोऽहनि तस्य तु॥ ३६॥
यत्सायं तत आरभ्य वह्निं परिचरेत्स्वयं। आत्मनो संभवे पत्नी पुत्रादय इति स्थितिः॥ ३७॥ अन्ये तु
मन्वते पत्नी कुमार्योमहोमकं। तंत्रं नास्त्यत्र भगवद्गृह्निरुद्दवचनं यथेति॥ ३८॥ अस्यार्थः। अ
थशब्दो मंगलार्थः यस्मिन्दिने विवाहहोमः कृतः तस्य दिनस्य यत्सायं तत आरभ्य अग्निं परिचरे
त्। नित्यहोमं कुर्यादिति भावः। अत्र जयंतो विशेषमाह। यदि प्रादुष्करणवेलायाः ऊर्ध्वमस्तामन
स्तावग्निरुत्पन्नः तथा सप्तरेकः सायमारभेत्। प्रादुष्करणवेला नाम अस्तमानात्पूर्वं दिनशेषे
अग्नेः प्रदीप्तिकरणं। तथैवोदयात्पूर्वं रात्रिशेषोपि भवति। नष्टाग्नेरपि पुनः संधाने सायमेवाग्नि

Indira Gandhi National Centre for the Arts

त्यहोमारंभो भवति। शौनकोऽपि। यस्मिन्वह्नौ विवाहः स्यात्सायमारभ्य तस्य तु। परिचर्या विवा
होमं विदधीत स्वयं तेजसः। यदि रात्रौ विवाहाग्निरुत्पन्नः स्यात्तथा सति। उपक्रम्योत्तरस्याह्नः
८६ सायं परिचरेदमुमिति। संग्रहश्च। आधाने पुनराधाने सायंहोममुपक्रमेत्। स्थाली
पाकं पौर्णमास्यामारभेत विचक्षण इति। अत्राग्निपरिचरणे स्वस्य मुख्यत्वं कदाचिद
नुराधेन स्वस्यासंभवे पत्नीपुत्रादयोप्यधिकारिणो भवंति। आदिशब्दात्कुमारी अंतेवाशि
ष्यनच्यते। केनचिदनुरोधेन स्त्रीपुत्राद्यनुसंभवे ऋत्विगादिभिः। विवाहोत्पन्नत्याग्निरिति स्मृत्यर्थसा
रे दंपत्योर्मध्ये एकस्मिन्नग्निसमीपे विद्यमाने इतरेऽप्यधिकारिण इति स्मृत्यंतरे। दंपत्यो
रसमक्षं तु होतव्यं न स्त्रियादिना। तस्माद्द्वयोर्मध्ये एकेन स्थातव्यमेव। इतरथा नष्टाग्निरेव
स्यात्। केषांचिन्मते पत्नीकुमार्योस्तु होमवर्जं परिचरणमित्याहुः। कुतः स्त्रीणां मंत्रानधिका ६
रात्। अन्ये तु सहोमकं वचनात्स्त्रीसन्नहनवत्। न स्यहोम इति कर्तव्यतामाह। तंत्र भिन्यादि
नातंत्रशब्देनाध्यानादिकमंगकलापः। सचात्र नास्तीति भावः। इति वृत्तिकृन्नारायणवृ

न निरूपितं। शौनकोऽपि। पत्नी कुमारी पुत्रो वा शिष्यो वापि यथाक्रमं। पूर्वस्यालाभे विद्ध्या
दुत्तरोत्तर इति। प्रादुःकरणकालमाह। ज्वालयेदपराह्णेऽग्निमस्तं याते दिवाकरे। पर्युक्ष्याग्निं
परिस्तीर्य पर्युक्ष्य च ततः परं॥३९॥ पयः प्रभृति स्रुवेणैव संस्कुर्यादग्निहोत्रवत्। अलंकरोति
पुष्पाद्यैर्यो रनलायतनं ततः॥४०॥ द्रवं हविः स्रुवेणैव पाणिना कठिनं हविः। जुहुयादग्नये स्वा
हा सुसमिद्धहुताशने॥४१॥ ध्यात्वाशु चतुर्थ्यंतं प्रजापतय इत्यथ। स्वाहाकारेण जुहुयात्तू
तः परिसमूहनं॥४२॥ पर्युक्षणं च कुर्वीतेति। अस्यार्थः। अपराह्णशब्दोऽयं अस्तमानो सूर्य
दिनशेषवाचकः। तस्मिन्काले अग्निं प्रदीप्तं कुर्यादिति। सायं संध्यासभास्करामिति। वच
नात्। सायं संध्यामुपास्य अस्तमिते सूर्ये होमारंभं कुर्यात्। तत्र प्रथमं वृत्तस्यमाह। श्रुचिर
पिकर्मांगं हिराः यस्य होमदेशमागत्य उदङ्मुख आसने उपविश्य प्राणानायम्यति ध्यायेदिस्त्र
स्त्वा एवं गुणविशिष्टायां तिथौ आसनः यज्ञपुरुषप्रसादसिध्यर्थं सायमौपासनं करि
ष्ये। प्रतिज्ञाय अग्निं पर्युक्ष्य परिस्तीर्य ततः पर्युक्ष्य एकस्मिन्पात्रे पयःप्रभृतीनां दशा

Indira Gandhi National
Centre for the Arts

नाम्नध्येरकं इत्येवं गृहीत्वाग्निहोत्रवद्‌द्रव्यसंस्कारं कृत्वा। अग्निहोत्रशब्देनाहिताग्निविहि
८७ तः सायंप्रातर्होमो विहितो निरुच्यते। तत्र श्रौतकांडे द्वितीयोध्याये यथा द्रव्यसंस्कार उ
क्तः। तद्वदिहापि कर्तव्य इत्यर्थः। तेषु द्रव्यादिग्रहस्य संग्रहः। पयो दधि यवागूश्च सर्पिरोदन
तंदुलाः। सोमो मांसं तथा तैलं मापस्तानि दशैव तु। अपराणि त्रीणि गृह्यकारिकां मंतुवी
हीयवातिला इति। तदेवं द्रव्यद्रव्याणां संस्कार उच्यते। अग्निं कृत्वा रतोंगारानपोह्य तेषु द्र २५
व्यं स्थापयित्वा अधिश्रित्य तुकुत्रोणैनावज्वाल्य त्रिः पर्यग्निकृत्य मुदगुद्वास्य अंगारा
न्यथास्थानं कृत्वा द्रव्यमग्नेः पश्चादात्मनोग्रे कुशेषु संस्थाप्य ततः गंधपुष्पाक्षतै
रग्निमलं करोति। द्रव्यं द्रव्यं हविः स्रुवेणैव जुहुयात्। कठिनं तु दुग्धादि हस्तेनैव प्रदीप्ते
ग्नौ अग्नये स्वाहेति जुहुयात्। तूष्णीमिति पदं प्रजापतिध्यानार्थं पूर्वाहुत्यपेक्षया ८७
किंचिदधिकपरिमाणवती ईशान्यदेशोत्तरत्र यदेशे वा स्वाहाकारं प्रहित्वा जुहुयात्
गृह्यकारस्मरणात्। तूष्णीं भूयसीं भूयसीमसंसृष्टां प्राग्गुदग्‌ उत्तरतो वेति येनेव

पेक्ष्येण सायं जुहोति तेनैव प्रातः। ततः उत्तरपरिषेचनादि कृत्वा गृह्यसंग्रहोक्तोपस्था
नमंत्रैरुपस्थापयेत्। ॐ चमइति आदि मंत्रैश्च। तत्र मंत्रानाह। अग्न आयूंषि मंत्र
त्रयेण अग्ने त्वन्न इति सूक्तेन प्राजापत्येन सर्वदेतानीत्यनेन। तत्तु न चात्रिस्येननेरभि
मंत्रे यो यद्देशे प्रह्वीभूतः कृतांजलिः सन्नग्निमीक्षमाणो जपति। सूर्यो न इत्यनेन उ
दुत्यमित्यनेन नमो मित्रस्येत्यनेन प्राजापत्येश्चोपस्था... मइति प्रातः। शौनकोपि।
परिसमुह्य पर्युक्ष्याथ प्रातर्हविर्भुजं। अग्नेः सूक्तैश्च सूर्यैश्च प्राजापत्यैश्च नित्यशः
अग्निं प्रजापतिं सायं प्रातः। सूर्यं प्रजापतिं। अग्न आयूंषीति तिसृभिः द्वाभ्यामग्ने त्वमि
त्यथ। सूर्यो न इति मंत्रेण उदुत्यं च द्वितीयया हिरण्यगर्भः समिति सूर्योग्निदेवत्। याव
ज्जीवं परिचरेत् एवमौपासनं गृहीति। प्रातरप्येवमेव तु। व्युष्टायां च उदये वा सायं
होमः पुराकृतः ॥४३॥ पायसान्नेन वा प्रातः ~~सोमेनानामंत्र~~ स्ताग्नेये स्वाहेति कृत्वा। पूर्वमंत्रे
स्क सूर्याय स्वाहेत्यस्य त्समं भवेत् ॥४४॥ आसायं कर्मणः प्रातरा प्रातः सायं कर्मणः

Indira Gandhi National
Centre for the Arts

आहुतिनातिपद्येत पार्वणं पार्वणान्तरादिति ॥४५॥ अस्यार्थः । तत्तत्प्रस्थानान्तरं उ
८८ प्रवेश्य होमान्ते परिसमूहनपर्युक्षणे चैकैकं कर्तव्यं । यस्मिन्यो विभूतिधारणं बृहत्सा
मस्य नैनं कार्यं शिष्टाचारप्रामाण्यात् । प्रातःकालेऽपि होमसमयं प्राप्य अनयैव रीत्या
कर्तव्यमिति प्रातर्होमप्रादुष्करणकालमाह । व्युष्टायामिति उदयात्पूर्वं घटिकाद्व
यादिलक्षणरात्रिशेषः व्युष्टाशब्दवाच्यः तस्मिन्काले अग्निं प्रदीपयेत् । समङ्क्ष्मो
चित्तरयो सायं च कुर्यात्सदा । अथ प्रातर्हुतेऽग्नित्स्यमुदिते कुर्यथाविधिरिति । म
नुरपि ।। उखामात्रे स्कन्दश्येनराश्मभिः स्कन्दसमन्वितः । उदिते चानुदिते चैव यातेताहो
मप्रकल्प्ययदिति । तत्तदोंकारेण होमं कुर्यात् । सूर्याय स्वाहेति प्रथमाहुतिः । द्विती
याहुतौ प्रजापतिं मनसा ध्यात्वा स्वाहाकारान्तक एव मंत्रः । आहुतिस्थानमपि तद्देव
भवति । अनयोः प्रत्येकेन होमद्रव्येण सायंहोमः कृतः तेनैव द्रव्येण प्रातर्होमोऽपि भवति ८८
सायंप्रातर्होमौ एकद्रव्यसाध्याविस्यर्थः । होमकालातिक्रमे श्रौतसूत्रे प्रदोषान्ते होमकालः संगवा

तः प्रातस्तमिति तनीयचतुर्गृहीतमाज्यं जुहुयान्मनोज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञं समिमं दधातु । या इष्टा उषसो
यश्च निम्रुचस्ताः संदधामि हविषा घृतेन स्वाहेति । संगवान्तस्य कालः । सायमारभ्य घटिकात्मकः । सायंहोमका
लो भवति । प्रातस्तु संगवान्तो भवति । यस्मिन्काले गावो वत्सैः सह ताभ्यासेन संगवं तः । केचिद्दशघटिकात्मकं का
लः । यदातिकालमिति क्रमेण तदा प्रायश्चित्तं भवति । तत्र प्रायश्चित्तं चतुर्गृहीतमाज्यं मनो ज्योतिरिति मंत्रेण जुहोति
याकारिकायामपि तृतीयाध्याये प्रायश्चित्तप्रकरणे वक्ष्यति । इह सौकार्यार्थं लिख्यते । नित्यहोमे तु तिक्रान्ते संस्कृ
त्याज्यं पूर्ववत् । चतुर्गृहीत्वा गृहीताज्यं मनस्वत्स्याज्जुहोत्यथ ।। होमात्यागं च आचमनादि कृत्वा आत्मनः नित्यहोमस्य का
लातिक्रमस्यैतन्निमित्तप्रत्यवायपरिहारार्थं प्रायश्चित्तं करिष्य इति संकल्प्य । परिसमूहनादि कृत्वा सपवित्रके पात्रे
आज्यमासिच्य अधिश्रयणादि कृत्वा तथैवोत्पवनं कृत्वा आज्यपात्रं तथैवाग्नेः प्रत्यग्निधाय दर्वीस्रुवयोः सम्मा
र्जनं कृत्वा दर्वीः सव्येन गृहीत्वा दक्षिणेन स्रुवमादाय आज्यं चतुर्वारं गृहीत्वा तामेव दर्वीं दक्षिणेन गृहीत्वा मनो
ज्योतिर्मंत्रेण जुहोति । संग्रहकारादयस्तु । प्रातःकाले आसायं सायंकालपर्यन्तं प्रातर्होमकाल इति ।। तथा प्रा
तःकालपर्यन्तं सायंहोमकाल इति । आहुतिर्नाम होमः । नातिपद्येन अतिपातो नास्ति । काललोपो नास्तीत्यर्थः । पार्व
णं पार्वणान्तरात् । तथैव पूर्वस्थालीपाकमारभ्य उत्तरस्थालीपाकपर्यन्तं इति कालो नातिपद्यतेति । एतच्चाशक्तौ
स्त्रकाले नाद्रियेत तत्राप्यस्मिन्काले श्रौते प्रयालकालेऽविषये पित्र्याहिताग्नीनां पक्षहोमविधानमिच्छति । आग

Indira Gandhi National
Centre for the Arts

मिदिनानां होमकालानाकृष्य क्रमेण होमइति । एकाग्निविषयेतु पक्षहोमो नास्ति नत्वाहिताग्निवत् । समा
८९ सहोमो भवति । तत्र सायंहोमोपासनं कृत्वा तदेव आगामिप्रातर्होमं चाकृष्य तदैव क्रियते । इत्यपसमासमा
सपक्षः ॥ सचकार्यव्यासंगेन सर्वप्रत्यवायः ॥ तत्रायं प्रयोगः । सायंहोमोपासने सभार्य आचमनादि कृत्वा एवं
गुणविशिष्टायां देशकालाद्यनुरोधेन आगामिप्रातर्होमम् आकृष्य इदानीमेव करिष्ये इदानीमेव करिष्ये इति प्रतिज्ञा
य आगामिप्रातर्होमम् अपि कुर्यात् । व्रीहीणां च यवानां च चतुःषष्टिरथाहुतिः ॥ तिलानां तु तदर्धं स्यात्तदर्ध
स्या हुतस्य चेति ॥ अस्यार्थः । अत्र आहुतिप्रमाणं संदृश्यते । व्रीहिरूपलक्षणं तंडुलादीनामपि । आहु
ति मुक्त्वा पत्रापर्यन्तं तीर्थेन देवतीर्थेनेति । जयंतः । चतुःषष्टिसंख्यातैः करैणैव एकाहुतिः । तिलानां तु
तदर्धं स्यात्तदर्धं स्याहुतस्य चेति ॥ ग ॥ द्वात्रिंशत्संख्याकैः कणैर्भवति । तदर्धं स्याहुतस्य तु । अत्र तद
र्धेन तोलनं तेन प्रमाणेन आहुतिर्भवति । अपरमाहुतिप्रमाणं शास्त्रांतराद् अवगंतव्यं । इति नित्यहोमविधिः
७ ॥ अथ वैश्वदेवविधिः ॥ अथ सायंप्रातः सिद्धस्य हविष्यस्य कृत्यादिति । गृह्येषु वैश्वदेवस्य कर्मणः का
लद्वयेपि नित्यहोमवत्कर्तव्यत्वात् सूत्रक्रमानुरोधेन सायमारंभ प्राप्ते तत्राह ॥ ग्रहस्थो वैश्वदेवारंभं कु
र्वन्प्रारभेत दिवा तंत्रं नास्य तत्र भगवे हुतिकृद्वचनं यथा ॥ ४७ ॥ औपासनाग्निमन्यं वा समिध्याथ हवि ८९
र्भुजमिति । अस्यार्थः । वैश्वदेवारंभस्तु दिवैव भवति । ननु सायं । अत्र तंत्रं नास्ति । अन्याधानाद्यंग

कलापो नास्ति । अन्यास्मिन्नग्नौ पावकः । अत्यंतरे होमइति न यस्मिन्नग्नौ पचेदन्नं तस्मिन्होमो विधी
यत इति कात्यायनवचनात् । औपासनाग्नौ लौकिकाग्नौ वा समिध्य आचमनादि कृत्वा आत्मनः
सिद्धस्यान्नस्य पवित्रीकरणार्थं आत्मन अतिशयसंस्कारार्थं वैश्वदेविकं कर्म करिष्ये इति संक
ल्प्य । अथ वैश्वदेवं औपासनाग्निमित्यस्याईस्याय मर्थः । अत्राग्निद्वयविधीयते औपासने पिहोत
व्यं शालाग्नौ वाजिनतां । विकल्पः स्वइच्छया कार्यो नास्यवात्र व्यवस्थितिः । अत्र औपासनाग्नौकरण
पक्षस्मृत्यंतरे । प्रातर्होमं निवर्त्य समुद्धृत्य हुताशनात् । शेषं महानसे कृत्वा तत्र पाकं समारभेत् । पा
कांते ग्नेतमाहृत्य गृह्याग्नौ तु पुनःक्षिपेत् । इति नारायणोपि । सभार्यस्तु शुचिस्नातो विधिनोच
म्य वाग्यतः । प्रविश्य स्वसमिद्धाग्नौ वैश्वदेवं समाचरेत् । पर्युक्ष्य परिषिच्याग्निमलंकृत्य च पूर्ववत् ।
हविष्यं पक्वमादध्याद् अधिश्रित्यानलेचतत् । प्रोक्ष्योद्वास्य घृताभ्यक्तं हादसव्ये निधायचेति । अस्या
र्थः । परिस्तरणवर्जं पर्युक्षणादि कृत्वा पात्रे घृताक्तं हविष्यमन्नं गृहीत्वा अग्नावधिश्रित्यानलेचैव तं
ता तत्रैव प्रोक्ष्य उद्गुद्वास्य अग्नेः प्रत्यक् स्थापयित्वा सव्यं पाणिं हृदयदेशे स्थापयित्वा पति
वक्ष्यमाणं मंत्रं कुर्यात् । हुताहे स्तेन सूर्यायेत्यादिभिर्दशाभिस्ततः प्रजापदस्याक्तिवैश्वदेवेन तु स्म
ति । पर्युक्ष्यनोक्षणं कुर्याद् द्वयज्ञोपवीतः । अस्यार्थः । सूर्यायेत्यादिभिर्दशसंख्याकाभिः तत्र

Indira Gandhi National
Centre for the Arts

क्रमेण हुत्वा अत्र पाणिना हवनं। सूर्याय स्वाहा। प्रजापतये स्वाहा। सोमाय वनस्पतये० अग्नी
षोमाभ्यां० इन्द्राग्निभ्यां० द्यावापृथिवीभ्यां० धन्वंतरये० इन्द्राय० विश्वेभ्यो देवेभ्यः० ब्रह्मणे०
अत्रैवैवं देवे प्रजापतिपदस्य साक्षान्मुखेनैवोक्तिः॥ न चूर्स्म तेः। दशाहुत्यानंतरं शास्त्रांतर
प्राप्तं स्वाहा। तद्धोमं च तत्रैव कृत्वा पश्चात्सूर्यं हनं मार्ग्गेण कर्तव्याः॥ तावतः। क्रमेणादेवयज्ञ इतिसं
ज्ञा॥ एतेभ्यो वैश्वदेवं कुर्यात् प्राक्संस्थां स्तां। नैरंतरान्। उक्तांतराले प्राक्संस्थान् स्व इत्यादिभिर्हरे
त् इति॥ अस्यार्थः। एतैरेव दशभिर्मंत्रैर्भूमौ प्राक्संस्थान्निरंतरान्परस्परसंलग्नान् बलीन्हरे
दिति॥ अस्यार्थः॥ एतैरेव दशभिर्मंत्रैः॥ अर्थः॥ किंच नामा नायाः पंक्तेः अस्याश्च कृतायां मध्ये अवशी
ष्टस्थलेष्वद्भिरित्यादिभिर्मंत्रैः पंचप्राक्संस्थान् बलीन्करोति॥ अन्ये स्वाहा ॐ ओषधिवनस्पतिभ्यः
स्वाहा० गृहाय० गृहदेवताभ्यः स्वा० वास्तुदेवताभ्यः० यथा देवयज्ञे स्वाहाकारेण होमः। तथैवात्र भू
मौ भूतयज्ञेपि भवतीत्यर्थः। अग्रे एकाहुति मध्ये पितृयज्ञे स्वाहाकारोनास्ति। तत्र स्वाहाकारस्या
भावात्। अथ अन्यो कृता द्वले प्रत्येकं विभागे इन्द्रायेति बलिः। तस्मादुत्तरदेशइद्रपुरुषेभ्य इति यमा १०
य संतरालस्य हरेद्दक्षिणतो बलिं तस्मादुदक् धर्मयम पुरुषेभ्यो बलिं हरेत्। सा पश्चे प्रत्यक्
बलिं कृत्वा वरुणायेति मंत्रतः तस्मादुदक् वरुणस्य वरुण पुरुषेभ्यो बलिं हरेन्। सो

मायेत्यंतरालस्य हरेदुत्तरतो बलिं॥ सोम्यादुत्तरेक् सोमपुरुषेभ्यो बलिं हरेदिति॥ अस्यार्थः॥
अथ सर्वांतरालापेक्षया दक्षिणदेशे यमाय बलिं हरेत्। तस्मादुदग्यमपुरुषेभ्य इति॥ ततः
सूर्यायेत्यादि पंक्त्यंतर्बलनबलिसंलग्नं पूर्वदेशे वरुणाय बलिं कृत्वा तस्मादुत्तरतो वरुणपु
रुषेभ्य इति। अंतरालस्य उत्तरदेशे सोमाय बलिः॥ तदुत्तरस्य सोमपुरुषेभ्य इति। अत्र भू
न यस्ते पुरुषाकृतिचक्राकृत्यादयः पक्षाः शौनकजयंतादिभिरुक्ताः। अत्र कारिकायां वृ
त्तिकारमभिप्रेत्य पुरुषाकृतिपक्षे प्राक्संस्थ बलिपंक्ति लक्षणे निरूप्यमाणे प्रसंगितज
यंतोक्तं चक्रं आलिपक्षप्रकारमाह। जयंतस्त्वाह वास्त्वंते बलीन्कृत्वा निरंतरान्। मुक्तांतरा
लमिंद्रादिदिग्देवानां बलिं हरेत्। ऐंद्रादिबलितः प्राच्यां प्राच्यां स्यात्सोरुषो बलिः॥ अंत
राले बलीं कृत्वा शिष्टैर्मंत्रैरतः परं। रक्षोभ्य इति सर्वासां बलिमुत्तरतो हरेत्। भूतयज्ञोयमु
दितः प्राचीनावीत्यतः परमिति॥ अस्यार्थः॥ सूर्यादिमारभ्य वास्तुदेवताभ्य इत्येतावत्सर्यंतदे
शानीमारभ्य चक्राकारान्निरंतरान्। अपरस्परसंलग्नान् पंक्तिभूतांस्तान् पंचदशसंख्याका
न् बलीन्कृत्वा बलयावद्धदिः प्राच्यां कमप्यवकाशं स्थाप्य इंद्राय बलिः। तत्प्राच्यां तत्पुरुषेभ्यो ब

Indira Gandhi National
Centre for the Arts

लिः एवं दक्षिणभागे बलयोर्बहिः कुमण्यकेभ्यो° काशंसका यमाय बलिः तस्मादपि प्राच्यामेव
तत्पुरुषेभ्यो बलिः एवं पश्चिमभागे तथैव वरुणाय बलिः तस्मादपि प्राच्यां तत्पुरुषेभ्यस्तथै
९१ वोत्तरदेशे सोमाय बलिः तस्मादपि प्राच्यां तत्पुरुषेभ्यश्च इति बलयमध्ये अवशिष्टे मंत्रैर्होमः
तत्रैवं। बलयमध्ये ब्रह्मणे स्वाहा। ब्रह्मणः प्राक् ब्रह्मपुरुषेभ्यः स्वाहा दक्षिणतो विश्वेभ्यो देवे
भ्यः। पश्चिमतः सर्वेभ्यो भूतेभ्यः। उत्तरतो दिवाचारिभ्य इति दिने। नक्तंचारिभ्य इति रात्रौ तदनं
तरपक्षद्वये पितृभ्य इति मंत्रेण सर्वासामाहुतीनां उत्तरतो हरेत्। अयं भूतयज्ञ इति॥ अदः
प्राचीनावीति भूत्वा स्वधा पितृभ्य इति दक्षिणस्यां तु निर्वपेत्। पितृयज्ञोयमुदितः स्वधापि
तृभ्य इति दक्षिणतो बलिं हरेत्॥ अयं पितृयज्ञः॥ नक्तं च तत्स्वयं भवेत्। सूर्यायेति पदस्थाने ई
रयेदग्नये वदंति। दिवाचारिभ्य इत्यस्य नक्तंचारिभ्य इष्यते। अस्यार्थः। एतत्रे देयं वादियज्ञत्रयं रा
त्रौ च भवति। अत्र यज्ञत्रयस्य रात्रावपि करणात् एवं चत्वारो यज्ञा नक्तं च भवंति। पंचमो ब्रह्मयज्ञ
स्तु दिनैव भवति। यदि रात्रौ तदा सूर्यायेति पदस्थाने अग्नये पदं वक्तव्यं। दिवाचारिभ्य इत्यत्र नक्तं ९१
चारिभ्य इति। कुर्वीत स्नातकोप्येवं पृथक्पाकी भवेद्यदीति॥ अस्यार्थः। स्नातकादिर्यदा पृथक्

दायविभागं गृहीत्वा पृथक्पाकं कुर्यात्। तेनापि वैश्वदेविकं कर्म कर्तव्यमिति। भोजनार्थपाकात् वैश्व
देवकर्मणः प्रवृत्तिः तद्विना न भोक्तव्यं। अतः पापसंस्कारार्थं यदा परगृहे निमंत्रणं उपवासो वा तदा
कथं वा पाकः। कथमन्नस्य संस्कारः। अतः पंचयज्ञसिध्यर्थं पाकः कार्यः। पाकासंभवे पुष्पफलोद
कादिभिरपि सर्वथा कर्तव्यं उक्तं च। अवश्यमपि दातव्यामाकाष्ठमपि जुहुयात्। आतृचमान्ने
स्स यज्ञं कुर्यात्। न चेदुत्सद्यते मनुः अङ्गिरेतान्समापयेदिति। अकरणे प्रत्यवायदर्शनात्। एतेभ्यः
पंचयज्ञेभ्यो यद्येकोपि तु हीयते। मनस्त्याज्ञानि तत्र प्रायश्चित्तं विधीयते। यद्वाद्यंत्यहं वा
पित्र्यमादादरुतेषु तु। तिस्त्रस्तु मतीर्हुत्वा चरुस्त्रो वारुणीं जपेत्। दशाहं द्वादशाहं वा निनिवृत्ते
तु सर्वतः। चरुस्त्रो वारुणीं हुत्वा कार्यस्तां तु मरतश्चरुरिति। बोधायनोक्तं प्रायश्चित्तं॥ ॥इति
माह वैश्वदेवप्रकरणं॥ ॥होतव्याग्नसंस्कारैर्व्यासः। जुहुयात्सर्पिषाभ्यक्तं तैलक्षारविवर्जितं। दध्य
क्तं पयसाक्तं वा तदभावे द्रुणापि वेति। इत्यानुकल्पश्चतुर्विंशमते दर्शितः। अलाभे येन केनापि ति
फलशाकोदकादिभिः। पयोदधिघृतैः कुर्याद्वैश्वदेवं स्वकेनतु। हस्तेनाम्बादिभिः कुर्यादद्भिरं
जलिनाजल इति। यद्यदन्नं तेनेत्र होतव्यं। तदुक्तं गृह्यपरिशिष्टे। शाकं वाथ दिवा पत्रं मूलं वा

Indira Gandhi National
Centre for the Arts

परिग्रा फलं। संकल्पयेद्यदाहारस्तेनैव जुहुयादपीति। क्षारलवणपरान्नसंसृष्टेनाहवि
९२ ष्येण होमो नैव कार्यः। किंतूष्णीं भस्मान्याप्लावयेदुत्तरतो वोदकमप्सु जुहुयात्। तस्य
न मद्भुतं धास्यो भवतीति॥ अनग्निकस्य वैश्वदेवे विशेषमाह। वृद्धवसिष्ठः। अनग्निकस्तु यो
विप्रः सोन्नं व्याहृतिभिः स्वयं। हुत्वा शालकमन्त्रैश्च शिष्टं काकबलिं हरेत्। विष्णुरपि। अन्नं
व्याहृतिभिर्हुत्वा मंत्रैर्हुत्वा च शालकैः। प्रजापते ह्यविहुत्वा पूजयेदतिथिं तत इति। शालक
मंत्रास्तु तैत्तिरीयारण्यके श्रूयंते। देवकृतस्यैनसोवयजनमसि स्वाहा। मनुष्यकृतस्यैनसो
वयज०। पितृकृतस्यैनसोव०। आत्मकृतस्यैनसो०। अन्यकृतस्यैनसो०। अस्मत्कृतस्यै०। यद्दि
वा च नक्तं चैनश्चकृम तस्यावयजन०। यत्स्वपंतश्च जाग्रतश्चैनश्चकृम तस्यावय०। यत्सुषुप्तश्च जाग्र
तश्चैनश्चकृम तस्यावय०। यद्विद्वांसश्चाविद्वांसश्चैनश्चकृम तस्यावय०। एनस एनसोवय०
यद्दोदेवाश्चमजिह्वया० निधेन स्वाहा। गौणकर्तृ णाह त्रिः। पुत्रो भ्राताथवा ऋत्विक् शिष्यश्व
शुरमातुलाः। पत्नी श्रोत्रिययाज्याश्च दृष्टाः स्युर्बलिकर्मणीति। गृहे कर्त्रंतराभावे प्रवसतास्वय ९२
मेव कर्तव्यमित्याह बोधायनः। प्रवासं गच्छतो यस्य गृहे कर्ता न विद्यते। पंचानामहतामेषा

श्व लयज्ञैः सह गच्छतीति॥ इति वैश्वदेवप्रकरणं। गृह्यसूत्रे तृतीयाध्यायोक्तं मनुष्ययज्ञं कुर्या
त्। पितृयज्ञादनंतरं कार्यो। तत्र स्मृतिरपि। गोदोहकालमात्रं स्थित्वा भूतबलिं द्विजः।
भोजयेदतिथिं शक्त्या न मेधो यमुदीरितइति। सूतकाद्युद्देशनतमतिथिं भोजयेत्। यदि
नाहशोस्ति तदा ज्ञात पूर्वमपि नित्ययज्ञसिध्यर्थं भोजयेदिति॥ अयं मनुष्ययज्ञः। तथैव
स्मृतिप्राप्तं नित्यश्राद्धं च कुर्यात्॥ नित्यश्राद्धमदैवं स्यान्मनुष्यैः सह दीयतइति। मनुनाप्युक्तं।
एकमप्याशयेद्विप्रं पित्रर्थं पांचयज्ञिके। न चैवात्राशयेत्किंचिद्वैश्वदेवं प्रति द्विजं। दद्यादहर
हः श्राद्धं अन्नाद्येनोदकेन च। पयोमूलफलाद्यैर्वा पितृभ्यः प्रीतिमाहरन्निति। अत्र विश्वेदे
वानुद्दिश्य द्विजं न भोजयेत्। एवं पंचमहायज्ञविधानं कुर्यात्। तत्र मध्याह्नस्नानोत्तरं संध्यां वि
धाय ब्रह्मयज्ञं प्रथमं कृत्वा वैश्वदेवादियज्ञचतुष्टयं कुर्यात्। तृतीयाध्यायोक्तमपि प्रकर
णांतर्गतमपि सौकार्यार्थमिह कारिकाकारेणोच्यते। आमात्तान्यामुदीच्यां वा यावा दिक्
स्यादनिंदिता। आपो वगाह्य च स्नात्वा उपवीती स वसं द्विजः। धौतशुक्लांबरः कुर्यात्कर्मांगाचमनं
ततः। दर्भान्बहून्शुचौ देशे प्रागग्रानास्तृणात्यथा। दर्भेषूपविशेत्कर्मण्यत्र प्राङ्मुख एव सन्।

ग्रामाद्बहिः प्राग्वोदग्वा अनिंदितायामन्यस्यां दिशि वा यत्रापो बहु दर्भाश्च प्रशस्ता
अस्यार्थः। ग्रामाद्बहिः प्राग्वोदग्वा अनिंदितायामन्यस्यां दिशि वा यत्रापो बहुदर्भाश्च प्रशस्ता भवंति। तत्र स्नानसामग्रीं गृहीत्वा विधिवत्स्नात्वा अंतो पवीतीत्येतत्स्नानकर्म सव्येनैव सर्वत्र
भवंति। तत्र स्नानसामग्रीं गृहीत्वा विधिवत्स्नात्वा शुक्लांबरधरः कर्मांगमाचमनं कुर्यात्। ततो ब्रह्म
९३ विधीयतइति। स्नात्वा मध्याह्नसंध्यां विधाय धौतशुक्लांबरधरः कर्मांगमाचमनं कुर्यात्। ततो ब्रह्म
यज्ञं करिष्य इति प्रतिज्ञाय शुद्धप्रदेशे बहुनूदर्भानास्तीर्य तेषु दर्भेषु प्राङ्मुख एवोपवि
श्य अत्र कर्मणीति ब्रह्मयज्ञे पूर्वाभिमुखत्वमेव नियम्यते॥ कृत्वोपस्थं करे सव्ये उत्ताने प्राग्दि
गंगुलौ। पवित्रे स्थापये दुक्ते प्रागग्रे दक्षिणेन तु। नीचं प्रागंगुलिं तेन संदध्याद्दक्षिणं करमिति॥
अस्यार्थः। तत्रोपवेशनप्रकार उच्यते। दक्षिणं पादं वामजंघोपरि मूलदेशे स्थापयित्वा तादृशमु
पवेशनं। उपस्थशब्देनोच्यते। उपस्थं कृत्वेत्युपवेशनेन संबध्यते। ततः वामे करे उत्तानेप्रागग्रे
तेन। स्मिन्पवित्रे आज्योत्पवनकार्यसाधने होमप्रकरणे उक्ते इत्यर्थः। ते द्वे पवित्रे दक्षिणेन हस्ते
न गृहीत्वा तस्मिन्नेव हस्ते प्रागग्रे स्थापयित्वा दक्षिणपाणिं चाधोमुखं प्रागंगुलिं तेन वामेन सं
दध्यात्। उत्तानस्य वामस्योपरि नीचं दक्षिणं कुर्यादिति। ऊर्ध्वेतिर्यगूर्ध्वं हस्तात् द्वाने क्षेत्रय दिवा ९३
क्षिणी। संमील्य येन चात्मानुसमाहितमना भवेत्। सूक्तादन्यतमं पूर्वमभिसंधाय शक्तितः। ॐ
पूर्वा व्याहृतीः तिस्रः समस्ताः सकृद्वदेत्। पच्छस्त्वर्धर्चशः सर्वा सावित्रीं त्रिर्वदेदथ। पूर्वाभिसंहि

तं यावच्छक्त्यधीत्य समाहितः। नमो ब्रह्मण इत्येतां त्रिरुक्त्वा प्रणवं वदेत्। प्रणवादंतमेतस्यान्मध्यमेन
स्वरेण तु। अधीते मनसा यो मे ब्रह्मयज्ञं करोति वै इति। अस्यार्थः। ऊर्ध्वेति यंग धस्ताद्द्वानविलोक
येत्। एकाग्रमना भूत्वा कुर्यादिति। अथ यदि वेति पक्षांतरमाह। अथवा नेत्रे संमील्य कुर्यात् येन
प्रकारेण आत्मा समाहितमना भावे तथा कुर्यात्। सूक्तादन्यतमं पावविशक्तितः। पूर्वमभिसंधाय
ब्रह्मयज्ञं कुर्यामिति। अर्थात् सूक्तादेरभ्यासस्य अपपाठ गाहित्वेन यत्संविदुं शक्यं तत्पूर्वमेवानुसं
धेयमिति। तत्र प्रथमकृत्यमाह। ॐ पूर्वेति। ॐकारपूर्वाः समस्ता व्याहृतीः सकृद्वदेत्। ॐ भूर्भु
वस्वः। ततः ॐकारविनैव एकैकपादोच्चारणेन गायत्रीं समाप्य ततः अर्धर्चशः समाप्य ततः
मध्ये अवसानराहित्येनैव सर्वां तृतीयां पठेत्। ततः यत्सूक्तं मनसान्यस्तं सूक्तादि विशेषं सम्यक्
पाठक्रमं तत्पठित्वा ततः पाठांते नमो ब्रह्मण इत्येतां ऋचं पठित्वा ॐ इति प्रणवं वदेत्। एतके
र्मआद्यंतयोः प्रणवोच्चारणं तथोक्तं नगायत्र्यादौ सूक्तादौ मध्ये प्रणवो नास्तीति भावः। अयं पाठः
मध्यमस्वरूपेण मध्यमस्वरेणेत्यर्थः। यदा स्त्रीशूद्रजनमध्ये ग्राममध्ये वा केन चित्कारणेन
कुर्यात्। तदा मनसैव पाठं निर्वाहं कुर्यात्। तत्र मध्यमस्वरनियमो नास्तीत्यर्थः। ततः पाठानंत
रं उदकसमीपमागत्य तर्पणं कुर्यात्। अपां समीपमागत्य तर्पयेद्देवताः। एवमंतानि

९४ तृप्यंतु संते स्कंप्रतिमंत्रकं। सिं चेत्प्रजापतिस्तृप्य त्वित्यथो देवतीर्थतः। धानुस्मृति यथालिं
गं मंत्रांते प्रयुज्यते। मंत्रेः शतर्चिनस्तृप्यं त्वित्यादिभिस्ततः परं। प्रतिमंत्रं निवीती तु तर्पयेदृषितीर्थतः।
र्थतः। इति। अस्यार्थः। दक्षिणं प्रतीपादनादेशो इति परिभाषया सव्य हस्तेनान्वारब्धेन द
क्षिणेन समयं तर्पणं प्राप्तं। तत्र गृह्यसंग्रहे विशेषः। अन्वारब्धेन सव्येन दक्षिणेन तु पा
णिना। देवर्षीन्तर्पयेद्विद्वानुदकांजलिभिः पितॄनिति। केचित्तु एकहस्ततर्पणे बहु
निषेधाद्वा क्याव्याहुः। तत्रतत्र शाखानुसारेण व्यवस्था तेषां पाणिद्वयेनैव तर्पणस्य विहि
तत्वात्। अस्मच्छाखायां न कश्चिद्विशेष आम्नातः। तस्माद्धि कल्पो वेति प्रतीयते। अथ
च देवर्षिपितृतर्पणे अंजलिना कर्तव्य इति प्रतीयते। गृह्योक्तमंत्रे रूपं पणं। एतच्च एव
मंतानि तृप्यंतु एतदंतं तर्पणं कुर्यादिति। एवमंतानि साक्षान्मंत्र एव न विधायक इति वृत्ति
कारेण व्याख्यातं। एतैर्मंत्रैः प्रतिमंत्रं तर्पयेदिति। तत्र तु पलक्षणार्थं प्रथमं मंत्रं दर्शयति।
प्रजापतिस्तृप्य त्विति देवतर्पणं देवतीर्थेन अंगुल्यग्रेणापः सिंचेदित्यन्वयः। तद्वितर्पणं प्र ९४
जापतिरित्यादिभ्य एकोनत्रिंशद्वाक्येषु तृप्यतु तृप्येतां तृप्यं त्विति यथार्थमुक्तान्तर्पयेत्। इति य

था लिंगं यथावचनमिति। धनुः प्रजापतेः। यथालिंगं यथावचनं मंत्रांते षु प्रयुज्यत इत्यर्थः। एवं प्राङ्मु
खः सन् देवतर्पणं समाप्य अनंतरं ऋषितर्पणं कुर्यात्। शतर्चिन इति इनं तबहुवचनं। शतर्चिन
स्तृप्यंतु इत्यादिभिर्दशमंत्रैः। निवीती भूत्वा ऋषितीर्थतः प्रजापतितीर्थतः। सूत्रोक्तैः प्रतिमंत्रैस्तर्पय
दिति। उदङ्मुखः सन्। एवं ऋषितर्पणं समाप्य पितृतर्पणं कुर्यात्। अथ पितृतर्पणं प्रारभते॥
प्राचीनावीत्यथेदानीं तर्पयेत्पितृतीर्थतः। स्कं सं त्वित्यादिभिर्मंत्रैः प्रतिमंत्रं च पूर्ववत्। द्वितीयांते
षु मंत्रेषु तर्पयामि पदं वदेत्। अस्यार्थः। आग्नेयीमुखो भूत्वा स्कं सं त्वित्यादि सूत्रोक्तमंत्रैः त्रयोविं
शति संख्याकैः। पितृतीर्थेन तर्पयेदिति। सूत्रकारेण ये तु द्वितीयांता मंत्राः पठिताः तर्पयामीति
ब्रूयात्। यथा कहोलं तर्पयामीत्यादि एवं सूत्रोक्तं समाप्य स्वपितॄंश्च तर्पयेत्। सूत्रेपि ये चान्ये
आचार्यास्ते सर्वे तृप्यं त्विति प्रति पुरुषं पितॄंस्तर्पयित्वा गृहानेत्य यद्ददाति सा दक्षिणेति। अयं शाया नो
गुब्रह्मयज्ञोस्य भिक्षादानादि दक्षिणा। कुर्यान्नित्यं वा ब्रह्मयज्ञसमं भवेत्। देशो शुचिः स्वयं वा
स्यात्तदा नध्याय इष्यते। अस्यार्थः। एवमुक्तो यं ब्रह्मयज्ञ इत्यवगंतव्यः। अस्य दक्षिणा भिक्षुभ्यो भै
क्षमन्नादिकं दीयते। देयदक्षिणेति तत्रैव प्रयोगः। समाप्तं तर्पणे अस्य कृतस्य ब्रह्मयज्ञस्य परिपूर्ण
तासिद्ध्यर्थं किंचिद्देहं दास्यमानं दक्षिणात्वेन दातुमुत्सृजेत्। तत्सं कल्पितमन्नं मनुष्ययज्ञनित्यश्रौ

Indira Gandhi National Centre for the Arts

त्यावसरे भिक्षं दद्यादिति संकल्पितामन्नस्य विनियोगः स्मृत्यंतरे। भोक्तृभावे तु विप्रेभ्यो युद्धागो
भ्यो निवेदयेदिति। अथ अशक्तं प्रति ब्रह्मयज्ञानुकल्पमाह। कुर्यादित्यनेन तिष्ठन्नजंस्रयानो वा
९५ कुर्थं चिद्यागमात्रं समाप्य तर्पणादि कुर्यात्। तस्यापि ब्रह्मयज्ञसाम्यमस्ति। ब्रह्मयज्ञस्य द्वावेवानध्या
यौ। यद्वा स्वस्याशुचित्वं देशोप्यशुचिः। प्रागूर्ध्वं वा भवेच्चायं वैश्वदेवस्य कर्मणः। ऊर्ध्वमेवन्नृय
ज्ञस्य स चेष्टातिथिपूजनं। एतान्पंचमहायज्ञान्कुर्यादहरहः शुचिरिति। अस्यार्थः। अयं तु ब्रह्मय
ज्ञः।। वैश्वदेवकर्मणः प्राग्वा भवेत्। मध्याह्नस्नानोत्तरं ऊर्ध्वं वा भवेत्। वैश्वदेवांते वा भवेत्। अत्र
स्मृत्यंतरे। स चार्वाक्तर्पणात्कार्यः पश्चाद्वा प्रातराहुतेरिति। तर्पणमतिथिपूजनं तस्मात्पूर्वं वा
भवति। अथवा प्रातर्होमानंतरमिति। नृयज्ञस्तु ऊर्ध्वमेव। अतिथिभोजनसाध्य इत्यर्थः। पंचय
श्रा ज्ञानां मध्ये अयं मनुष्ययज्ञोतिमो यज्ञ इत्यर्थः। इतरयज्ञचतुष्टयमस्मात्पूर्वमेव उक्तानेतान्
पंचमहायज्ञान्शुचिः सन्नहरहः प्रत्यहं कुर्यात्।। इति पंचमहायज्ञविधिः।। ७।। वैश्वदेवेआ
पद्धर्माः स्मृत्यंतरोक्ताः प्रदर्श्यंते। पक्वाभावे भवासे च तंडुलानोषधीस्तथा। पयो दधि घृतं चैव कंदमू
प लफलानि च। वैश्वदेवे प्रकर्तव्यं जलेवाथ कुवा जलइति।। नदासेतेइव्ये मनुष्ययज्ञादिकमिति। अ ९५
संस्कृतमन्नं न भोजयेदिति वचनात्। कर्तुरसंभवे स्त्रीबालादिर्वा ब्राह्मणद्वारा वा कारयेदि। ते

स्मृत्यर्थसारे।। अथ संध्यावंदनप्रकारमाह।। अन्यच्चाहरहः कुर्यात्संध्योपासनमुच्यते। ग्रामाद्बहि
र्गत्वा नीर उपवीत्येव सन्द्विजः। आचम्य मार्जनाद्यर्घ्यं तं कृत्वा करोत्यथेति।। अस्यार्थः। प्रतिदिनं
संध्योपासनलक्षणं कर्म उच्यते। उपवीती सन् ग्रामाद्बहिर्जलाशयं गत्वा आचम्य स्वसूक्तैर्मार्ज
नादिकमर्घ्यदानांतं कृत्वा गायत्रीं जपेत्।। अर्धास्तमिते आदित्ये पश्चिमस्य उत्तरभागस्तन्मु
खआसीनः सावित्रीं वाग्यतो भवेत्। आतारकोदयादेवं प्रातः कर्मेदमिष्यते। अर्धास्तमि
ते नक्षत्रमंतरिक्षं यदा ततः। आरभ्य प्राङ्मुखस्तिष्ठन्जपेदासूर्यदर्शनादिति।। अस्यार्थः। अ
र्धास्तमिते आदित्ये सति पश्चिमस्य उत्तरभागो वायव्यस्तन्मुखो वा पश्चाभिमुखः सन्नु उ
पविश्य मौनी भूत्वा सावित्रीं जपेत्। तत्रावधिमाह। आतारकोदयान्नक्षत्रदर्शनपर्यंतमि
वंदन त्यर्थः। एवमुभे संध्याकर्म प्रातरपि कर्तव्यमिति समानमेतत्। तत्र विशेष उच्यते। नक्ष
त्रेषु अस्तंगतेषु नादृशां कालमारभ्य सूर्यदर्शनपर्यंतं प्राङ्मुखस्तिष्ठन्नेव जपेत्। गृह्यसू
त्रेपि। एवं प्रातः प्राङ्मुखस्तिष्ठन्नादित्यमंडलदर्शनादिति। अत्र प्राग्ग्रहणं वायव्यानिवृ
त्यर्थ इति वृत्तिकारः। सूर्योदयपर्यंतं जपेति।। ।। इति गृह्यकारिकायां प्रथमोध्यायः।। ।।
।।अथोपाकर्म उच्यते।। अध्यायनामुपाकर्म आवण्यां श्रवणेन तु। तस्मात्संहृत्य कुर्यात्

Indira Gandhi National Centre for the Arts

९६ पंचम्यां वा तदिष्यते ॥३॥ अर्थौषधयस्तासिभिर्जा येतुनभवंति चेत् ॥ तदा भाद्रपदे मासि श्रव
णेन करोति तत् ॥२॥ अस्यार्थः । श्रावणमासे श्रवणेन क्षत्रे अधीतानां छंदसां सवीर्यत्वार्थं अ
थवाननूतनमाणवकादीनां वेदाध्ययनप्रारंभाधिकारार्थं च उपाकर्तव्यमिति । तच्च श्रावणे
मासि कस्यां तिथौ श्रवणनक्षत्रयुक्तायां तिथौ कर्तव्यमिति । गृह्येतु ॥ अथातोध्यायोपा
करणमिति ॥ अयमर्थः ॥ अध्ययनमध्यायः तस्य उपाकरणं प्रारंभो येन कर्मणा तदध्यायो
पाकरणं ॥ अत इति हेत्वर्थः । यस्माद्ब्रह्मयज्ञो नित्यः । अतोध्यायोपाकरणं क्रम इति । तत्रका
लांतरमाह । तन्मास एव हस्तनक्षत्रयुक्तायां पंचम्यां वा तच्च भवति । अवृष्ट्या अवर्षणेन
कृत्वा यदा भूमौ ओषधयो न जायंते । तदा भाद्रपदमासे तेनैव श्रवणनक्षत्रे युक्तायां तिथौ
करोति । तथा च गृह्ये । तदा वार्षिकमित्याचक्षते । वर्षास्म क्रियत इति वार्षिकं । श्रावण
भाद्रमासौ वर्षाऋतुः । श्रावणे प्रादुर्भावाभावे भाद्रपदे पि श्रवणनक्षत्रयुक्ते काले भवति ।
आज्यसंस्कारपर्यंतमुपलेपादि पूर्ववत् । आज्येन दधिसक्तूनां पर्यग्निकरणं भवेत् ॥३॥ ९६
उत्पूतमात्र आज्ये चेत् त्रिः प्रोक्षणं भवेत् ॥ इध्माभिघारणांते स्यादाज्यस्योद्वासनादिक
मिति ॥४॥ अस्यार्थः । तत्र कर्मांगाद्विराचम्य आसने उपविश्य प्राणानायम्य तिथ्यादिस्म

त्वा एवंविशिष्टायां तिथौ अस्माभिरधीतानां छंदसां अपराधो स्वासविक्षेदघोषणादिभिः नानाप्रमादि
केजातयत्वीरसत्वं तस्य परिहारार्थं तेषां च छंदसां सवीर्यत्वार्थं तथाननूतनमाणवकादीनां वेदारंभणाधिका
रार्थं च उपाकर्माख्यं कर्मकरिष्ये ॥ उपलेपादि आज्यसंस्कारपर्यंतं पूर्ववत्कृत्वा । अत्र होमयोग्यानां दा
मिश्राणां दधिसक्तूनां आज्येन सह पर्यग्निकरणं कृत्वा । यदा तु आज्यस्योत्पवनमात्रं तदा दधिसक्तूनां
प्रोक्षणमिति । आज्योद्वासनादिकं इध्माभिघारणांतं कृत्वा जुहुयात् ॥ अन्वारब्धो धुना शिष्यैः स्वयमेव
न सति चेत् ॥ प्रकुर्वीताज्यभागांतमिध्माधानादि पूर्ववत् ॥५॥ इहाज्यभागौ नित्यौ स्तस्तथैवोत्सर्जने
पि च । हुत्वाज्येन वभिर्मंत्रैः सावित्र्यादैरतः परमिति ॥६॥ अस्यार्थः । ततः कर्ता इध्माधानादि आज्यभा
गांतं कृत्वा शिष्यैरन्वारब्धः सन् प्रधानकुत्यादिकर्म करोति । यदि शिष्यानभवे पुनरारंभणमि वि
स्मृतं लुप्तं । तदा स्वयमेव करोति । तथा च गृह्ये । अध्येषमाणोध्यापयेरन्वारब्धः एताभ्यो देवताभ्यो जुहोति
अत्र वृत्तिकारेण व्याख्यातं । अध्यापयेरन्वारब्धः इत्येतावते व सिद्धे अध्येषमाण इति वचनं । अध्याय
नावेपि अध्येष्यमाणः स्वयमेव होमं कुर्यादित्येवमेव विषयो कं छंदांस्कपा कृत्या धीयते ति श्रुतेः ॥
अत्राज्यभागौ नित्यावेव भवतः । उत्सर्जनेपि च । आज्यभागानंतरं सावित्र्यादिभिर्नवभिर्मंत्रैः आज्यं जु
होति । अत्र चतुर्थ्यंतेषु मंत्रेषु छंदोभ्य ऋषिभ्यश्चेकौ मंत्रो ज्ञेयः । अथावदानधर्मेण लौकिकत्न
दधिसक्तूनात् । कृत्वा घिमीळ इत्याद्यो मंत्रोर्विंशतिभिः क्रमात् ॥ शाकलानां समानीव इत्यचो

Indira Gandhi National Centre for the Arts

९७

कृतिर्भवेत्॥८॥ बाष्कलानां तु तत्सूक्तयोरिष्टं वांताकृतिर्भवेत्॥ अथास्विष्टकृतं हुत्वा दधिसक्तुभिरेव
तु॥९॥ अस्यार्थः। अथावदानधर्मेण दध्याज्योपस्तरणादिकृत्वा अग्निमीळे इत्यादिभिः सूक्तमंत्रै
र्दधियुतान् सक्तून्जुहोति। ऋग्वेदे पंचशाखाभेदाः आश्वलायनी सांख्यायनी शाकल बाष्कलामां
डूकाश्चेति। तेषां मध्ये शाकलानां समानीवइतिकृवांताकृतिर्भवति। इतरेषां सर्वे समानीव आ
श्वलायनशाखानुसारिणां शाकलायनां बाष्कलानां च इदमेव आश्वलायनसूत्रं कर्मानुष्ठानार्थ
मुपकरोति। एवं प्रधानहोमं समाप्य दधिसक्तुभिरेव स्विष्टकृद्धोमं समापयेत्॥ दधिसक्तून्स्व
यंशिष्याः प्राश्याचम्य ततःपरं॥ परिस्तरणदर्भैस्तैरंतर्दधतितेंजलीन्॥१०॥ अन्येन सेचयित्वा
पः स्नाभिः कुर्वंति मार्जनं॥ पश्चादग्नेरुदग्भेषु दूर्वाग्रेषूपविश्य च॥११॥ अग्निं—यापःशरावोदद
र्भांस्तत्र निधाय च॥ प्रागग्रदर्भगर्भांस्ते कुर्युर्ब्रह्मांजलीन्थेति॥१२॥ अस्यार्थः। स्विष्टकृद्धोमानं
तरं दधिसक्तुभक्षणं स्वयं कृत्वा। शिष्यैश्च कारयित्वा सर्वे रथ्याचामेत्। अत्र सक्तुप्राशनानंतरय
ज्ञोपवीतहोमं कृत्वा पितृभ्यो दत्वा स्वयं च धारयेत्। तथा च कार्ष्णाजिनिः। वेदारंभणतः पूर्वं सक्तुप्रा ९७
शनतः परं। नच यज्ञोपवीतानि दद्याद्द्वैधारयेत्ततः॥ एतद्दानधारणं होमस्योपलक्षणार्थं॥ त
था च सत्यव्रतः। यज्ञोपवीतानि नवानि कृत्वा तदुक्तमंत्रेण हुतं दद्यादग्नौ। स्वयं तु देयानि पितृभ्यश्च

थं दधात्स्वयं धार्यमिति मिश्रासिद्धं। तस्य फलमुक्तं वायुपुराणे। उपाकर्मणि विप्रेभ्यो दद्याद्यज्ञोपवीत
कं। आयुष्मान्जायते तेन तत्कर्मणा मानवो भुवीति। ततः अग्नेर्ये परिस्तरणदर्भास्तान्गृहीत्वा सर्वे स्वस्व
जलीन्तैरेव कुशैरंतर्दधति अंजलिषु मध्ये दर्भान्स्थापयंतीत्यर्थः। ते आचार्यादिकर्मकर्तारः। तत्र
सर्वेषामंजलिषु केनचिद्दापः सेचयित्वा ततः सर्वे पितेनेवांजलिस्थोदकेन मार्जनं कुर्वंति। तदुदकं
शिरसि क्षेपयंतीत्यर्थः। अमंत्रकमेव। अथ ब्रह्मयज्ञतुल्य उपाकर्मांगत्वेन यावेदपाठ उच्यते॥
७ मार्जनानंतरमग्नेः पश्चाद्देशे प्रागग्रैर्दर्भैरुपविश्य अग्नेरुत्तरतः कांस्ये च्छरावाणि स्थाप
यित्वा तत्रोदकं प्रक्षिप्य आदिशब्दात्साद्रमात्रं गृह्यते। अन्यान्दर्भान्शरावादौ प्रक्षिप्य ते सर्वे
कर्मकर्तारः इदानीं ब्रह्मांजलीन्कुर्युः। कथंभूतान्। प्रागग्रादर्भाः येषामंजलीनां गर्भेषु ते तथो
क्ताः। तथाभूतानंजलीन्कृत्वा गायत्रीं जपेयुः। सव्याहृतिं जपेत्सर्वे सावित्रीं ब्रह्मयज्ञवित्। त्रि
रभ्यसेत्तु सा ओंकारव्याहृतीश्चात्र कर्मणि॥१३॥ अग्निमीळे इदं सूक्तमनुवाकमथापि वा। प्रार
भेरं स्तुचं वापि त्वध्यायांश्चावयेद्गुरुः॥ प्रायश्चित्तादिसकलं होमशेषं समापयेत्॥१४॥ अ
नध्यायात्समं तोसिद्धान्परिहृत्य त्वधीयते। यस्तु पूर्वमधीते सोपारभेतच्छ्रेयभेहनीति॥१५॥ अस्या

Indira Gandhi National Centre for the Arts

र्थः। ततः सव्याहृतीं सावित्रीमुच्चैर्वदंति। ब्रह्मयज्ञवदिति॥ यथा ॐकारपूर्वकं व्याहृतित्रयं समु
९८ च्चितं पठित्वा ॐकाररहितां गायत्रीं पादक्रमेण तथैव पठित्वा ततोऽर्धर्चादिक्रमेण पठित्वा ततः
सर्वां च पठित्वा अवसानरहितेन पठेदिति ब्रह्मयज्ञतर्पणप्रकाश्यां। अत्र उपाकर्मणि कोऽपि विशेष
माह त्रिरभ्यसेयुरिति। अत्र गायत्र्याः प्रथमावृत्तौ ओंकारपूर्वकं व्याहृतित्रयं समुच्चयं पठित्वा त
थैव द्वितीयस्यामप्यावृत्तौ तृतीयस्यावृत्तावपि ॐकारं पठेत्। पक्षे पंचेशः सर्वासु ते ब्रह्मयज्ञेन स
मानं। ब्रह्मयज्ञे न गायत्र्याः प्रथमावृत्तावेव ॐकारपूर्वव्याहृतिपाठः। द्वितीयतृतीयावृत्त्योः ॐकार
पूर्वव्याहृतिपाठो ना। सो। इत्ययं भेदो वर्गान्तव्यः। शौनकस्तु। जपित्वा सकृदोंपूर्वाः समस्ता व्याहृती
गुरुः। प्रणवाद्यां च सावित्रीं सकृदुच्चारयेत्ततइति। अनंतरं अग्निमीळे इदं सूक्तं सर्वं प्रारभेत्। अनु
वाकपर्यंतं वा मृचं वा सर्वेपि पठेयुः। ये नूतनमाणवकाः अध्याप्यास्तांश्च वाचयेदिति। ततो गुरुर
याश्चेत्यादिभिर्मंत्रैर्होमशेषं समापयेदिति। अत आरभ्य सूत्रकारोनध्यायान्वर्जयित्वा वेदाध्ययनं
कर्तव्यमिति। ये माणवकाः प्रथममेव वेदग्रहणं चिकीर्षंति। स तु शुभे मुहूर्ते प्रारंभं कुर्यादिति। ९८
समावृत्तोऽथ धीयानो मधुमांसादि वर्जयेत्। ऋतुस्नातोपगमनं समावृत्तस्य मन्यते॥१५॥ अत आर
भ्य षण्मासान्नियमेन त्वधीयते॥ अस्यार्थः। विद्याग्रहणात्प्रागेव अपरिसमाप्तायां विद्यायां किंचि

दध्ययनं कृत्वा यस्तु व्रतसमाप्तिं कृत्वा भार्यापरिग्रहं कुर्यात्। तादृशोप्यधीयानः ब्रह्मचारिवद्वर्जयि
त्वा ऋतुस्नातामेव स्त्रियमनुगच्छति। अनुमरति। इत्येवं रूपं वेदग्रहणपर्यंतेनापि कर्तव्यमिति। अ
त आरभ्य षण्मासपर्यंतं। उपाकर्मण आरभ्य वेदानेवाभ्यसेयुरिति। उत्सर्जनानंतरं षण्मासपर्यंतं
अध्ययननिषेधस्मरणात्। स्मृतिभास्संग्रहस्त्वेताः॥ भवेदुपाकृतिः पूर्णमास्यां पूर्वाह्ण एव तु॥
ब्राह्मणान्भोजयेत्तत्र पितॄनुद्दिश्य देवताः। व्यासः। विहरंसमभेदर्भैर्द्वादश्यां गुल्फदेविके। चतुरंगु
लमग्रं स्यात् ग्रंथिमेकांगुलिं तथा। प्रादक्षिण्यात्क्रमं कृत्वा ऋषीनावाह्य पूजयेत्। अकरणे प्रत्यवायमा
ह कात्यायनः। उत्सर्जनं च वेदानामुपाकरणकर्म च। अकृत्वा वेदजप्येन फलं नाप्नोति मानवइति॥ इ
यो त्युपाकर्मविधिः॥ अथोत्सर्जनविधिः॥ अथोत्सर्जनं माघ्यां पौर्णमास्यां विधीयते॥ ग्रामाद्बहिर्विवि
क्ते स्यादुपलेपादिपूर्ववत्॥ अस्यार्थः। अध्यायानां वेदानामध्ययनमाध्यायाः तेषामुत्सर्जनं॥
उत्सर्जनं नाम अनध्ययनं येन कर्मणा तत्तथोक्तं। एतस्मिन्कर्मणि कृते सति षण्मासपर्यंतमध्ययन
निषेधविधानात्। तच्चोत्सर्जनं माघसंबंधिन्यां पौर्णमास्यां भवति। ग्रामाद्बहिः शुचिः प्रदेशं गत्वा पूर्व
वदुपाकर्मवदुपलेपादि कुर्यात्। अस्यापि कर्मणः उपाकर्मणा सह तुल्यतां दर्शयन्प्रयोगमाह। गृह
पक्वं सपीपाग्नौ निधायाज्यमधिश्रयेत्॥१७॥ संस्कार्यमकुमावांशांतिकर्मणि चात्र च॥ अस्यार्थः।

Indira Gandhi National
Centre for the Arts

गृह्य एवाग्निष्वादितं चतुर्मेग्निसमीपेस्मग्नेरुत्तरभागे संस्थाप्य आज्याधिश्रयणं कृत्वा उपाकर्मब्रह्मकृणाम
९९ ह आज्यस्य त्रिःपर्यग्निकरणं कुर्यात्। उत्सर्जनेत्रोतिकर्मण्यपि सकृदवदनं संस्कारयेत्। अत्र भगवान्। पौ
र्णमास्यां तु यामाधीतस्यामुत्सर्जनं भवेत्। तत्र याम्याद्दिहिर्भूत्वाशुचौ देशे मनोरमे॥ विविक्ते स्थंडिलं कुर्यात्त
त्रोल्लेखनपूर्वकं। पुरस्ताच्च विधायाज्यसंस्कारान्तं यथाविधि। पश्चाद्दत्तं गृह्ये पक्वं पृथक्कृत्वान्यभाजने।
तत्रत्यसाधं विधिश्रित्य तत्पुरुषमभिघार्य च। प्रत्यग्गृहे निधायाज्यभाजनस्य समीपतः। ततः परिध्याधानादि
तंत्रशेषं समापयेत्। कृत्वोपाकर्मबहिर्हाप्याज्यभागान्तं समंत्रकं जयेत्। ततो माघ्यां पौर्णमास्यां याम्याद्दहि
र्विविक्ते देशे ग्न्युपसमाधानं कृत्वा गृह्यसिद्धमोदनं कस्मिंश्चित्पात्रे गृहीत्वाग्निसमीपे निधायाज्याधिश्रयणा
दि करोति। इह्याप्याज्यभागौ हुत्वेति। नवाज्याहुतिपर्यंतमुपाकरणवद्भवेत्॥१८॥ जुहोति गृह्यसिद्धान्नमु
पाकरणवत्तथा। अनेन स्विष्टकृद्धोमान्तः प्राशनमार्जने॥१९॥ वेदस्यारंभणं कृत्वा शिष्टं कर्म समापयेत्
दिति। अस्यार्थः। सावित्र्यादिनवउपाकर्मवदाज्याहुतीर्हुत्वा अनंतरं गृह्यसिद्धान्नमग्निमीळ इत्यादिभिर्वि
शतिमंत्रैरुपाकरणवज्जुहोति। पश्चादन्नेन स्विष्टकृद्धोमं कुर्यात्। अत्र प्राशनमार्जने न भवतः। अनंतर ९९
मग्नेः प्रत्यग्विभागे प्रागग्रेषु दर्भेषूपविश्य नथेवदं भोजलयः उक्तप्रकारेण उपाकर्मवद्देववेदारंभणं
कृत्वा शिष्टं कर्म अयाश्वेत्यादिहोमशेषं समापयेत्। अत्र भगवान्। सावित्र्यादिनवभ्यश्च विधायाज्याहु

तीर्नव। ततोन्नेन जुहुयादृग्भिरग्निमीळे पुरोहितं। इत्यादिभिरुपाकर्मविहिताभिर्यथाक्रमं॥ जयंतश्च सावि
त्र्याद्याज्याहुतीर्हुत्वा ततो वदानधर्मेणाग्निमीळादिभिरुपाकरणे प्रतीकेन गृहीताभिर्विंशतिभिर्ऋग्भिरयं जु
होति। हुत्वेति च चनादन्याप्यास्मिन्नेव प्रदेशे स्विष्टकृतं हुत्वा परेण गत्वा वेदारंभमेव करोति प्राशनमार्ज
नं च न करोति। ततः पूर्णपात्रनिनयनादि शिष्टं कर्म समापयेदिति॥ अथ तीरसमं गत्वा स्नात्वाचम्य यथावि
धि॥२०॥ सावित्र्याद्यान वाग्न्याद्या देवतास्तर्पयत्यथेति॥ अस्यार्थः। निनयनाद्य शिष्टकर्मसमापनानं
तरं। अपां समीपे गत्वा विधिवत्स्नात्वाचम्य प्राणानायम्य उत्सर्जनांगभूतं विहितं तर्पणं करिष्ये इति प्र
तिज्ञाय ता एव होमदेवताः सावित्र्याद्यानव अग्निमीळ इत्याद्याश्च तर्पयेत्। तत्र सौकार्यार्थं स्वयमेव
प्रयोगं दर्शयति। सावित्रीं तर्पयाम्यग्निं तर्पयामीति तर्पयेत्॥२१॥ जयंतस्त्वग्निमीळादिमंत्रैस्तर्पणमु
क्तवान्। ब्रह्मयज्ञांगमुक्तं यत्तर्पणं तदिहापि तु॥२२॥ अस्यार्थः॥ ॐ सावित्रीं तर्पयामि अग्निं तर्पयामी
त्यादि छंदांसीत्येतावत्पर्यंतं द्वितीयांतपदं कृत्वा तर्पयेत्॥ जयंतनिबंधकारस्तु अग्निमीळादिभिर्मं
त्रैस्तर्पणं कार्यमित्युक्तवान्। तदपि कृत्वा ब्रह्मयज्ञांगतर्पणं कार्यं। आचारप्राप्तं तर्पणं विना दिनत्रयं
न कुर्यात्। ततः। यमाय धर्मराजाय मृत्यवे चांतकाय च। वैवस्वताय कालाय नीलाय परमेष्ठिने। औ
दुंबराय दध्नाय सर्वभूतक्षयाय च। वृकोदराय चित्राय चित्रगुप्ताय वै नमः। एभिर्नामभिः प्रत्येकं यमं

Indira Gandhi National
Centre for the Arts

तर्पयामीत्यनेन प्रकारेण तर्पयेत्। ततो वरुणस्नात्वा। नेत्रपि चान्ते विसर्जयेत्॥ शौनकोपि। तर्प
यित्वाथ पित्रादीन् पितृन् पितृतर्पयेत्। स्नायं च कुर्याद्विप्राः प्रकारयेत्तर्पणं हि तं। इत्युत्सर्जनमासे कर्मा
१०० चार्यसमीरितमिति। जयंतश्च। अपांतीरे गत्वा दर्भासुरत्वासीनः अग्निमीळे इति ऋक् यते इद कुमारविद्या
सिद्ध्यन्तर्पयित्वा प्रजापत्यार्थं तर्पयती॥ अत आरभ्य षण्मासान्वेदांगानि च धीयते। शुक्ले वेदमधीयी
त कृष्णेंगानिति केचन।२३॥ कर्मद्वयमिदं केचिल्लौकिकेग्नौ प्रकुर्वते। अस्यार्थः। उत्सर्जनानंतरं षण्
मासपर्यंतं वेदाध्ययनं न कार्यमिति। उत्सृष्टेषु वेदेषु अध्ययनस्मरणं च निषेधात्। अत आरभ्य व्या
करणादिवेदांगेरेव षण्मासान्नयेदिति। अथ वा जनऊधिया मनुयदार्थं पक्षांतरमाह। शुक्लपक्षे
वेदाभ्यासः कृष्णपक्षे अंगाभ्यासः। एवं षण्मासपर्यंतं उत्सर्जनानंतरं पठेत्। उपाकरणानंतरं
षण्मासपर्यंतं साक्षाद्वेदाभ्यासः। कूर्मपुराणेपि। छंदांस्यूर्ध्वं रहस्यं च शुक्लपक्षेषु वै द्विजः। वेदां
गानि पुराणानि कृष्णपक्षेषु मानवइति। मनुरपि। अतः परं तु छंदांसि शुक्लेषु नियतः पठेत्। वेदांगा
नि रहस्यं च कृष्णपक्षेषु संपठेत्॥ एतत्कर्मद्वयं लौकिके औपासने वा स्वेच्छया कार्यमिति। केचिन्म १००
न्यते। जयंतश्च। एतद्वे कर्मणी अध्यायोत्सर्जनपरं भोके। विल्लौकिकेग्नौ कुर्वंतीति। केचिदुक्तेविक
ल्पः। उक्तकालालाभे अनुकल्पकालमाह स्मृतिमारससमुच्चयकारः। उत्सर्जनं पौषमाघ उपाकर्मादि

नेपि वेति॥ इत्युत्सर्जनं॥ ॥अथ श्रवणाकर्म सर्पबली उच्यते॥ उच्यते श्रवणाकर्म सर्पबल्याख्यक
र्मवाक्। कर्त्तव्यं श्रावणे मासे पौर्णमास्यामिदंद्वयं॥२४॥ पूरयेन्नवकलशं नवं यावकसक्तुभिः॥ निधा
यतेन वेशिक्ये दर्व्या ऐकं कतीमपि॥२५॥ प्राच्यां दिशि शुचौ देशे बल्यर्थं परिकल्प्य वा यथा। विभज्य
कं भागमभ्यज्य सर्पिषेति॥२६॥ अस्यार्थः। श्रवणाकर्मसर्पबलिकर्म च कथ्यते॥ तदिदं कर्मद्वयं श्रा
वणे मासि पूर्णिमायां भवति। तत्र उपाकर्मवत् न नक्षत्रनियमः। पूर्णिमानियम एव। तत्र निकर्तव्य
स तामाह। नवं अव्रणं मनोहरं कलशं पायसं यावकसक्तुभिः परिपूर्य लौकिकप्रसिद्धेन रेवेरज्जुनि
र्मिते शिक्ये तं कलशं निधाय विकंकवृक्षोद्भवां दर्वीं मापेन तत्रैव निधाय तच्छिक्यं कुत्रचिदुन्नत प्र
देशे स्थापयेत्॥ पूर्वदिग्भागे बल्यर्थं शुद्धप्रदेशं कारयित्वा शौनकोक्तप्रस्थपरिमितानां यवा
नां भर्जनं लौकिकेग्नौ कारयेत्। अथ एवं यवा धाना इत्युच्यन्ते। तासां शद्वयं कृत्वा तयोरेकं भागं
लौकिकेनाज्येनाक्तं कृत्वा स्थापयेत्। अपरं तथैव पात्रांतरे स्थापयेत्। इदमत्र गृह्यं। श्रावण्यां
पौर्णमास्यां श्रवणाकर्म। धृतमक्तं नवं कलशं पूरयित्वा [illegible] नवे शिक्ये निद
ध्यादक्षतधानाः कृत्वा सर्पिषार्धं अनक्त्य स्थापमिते। अर्धशब्दः नपुंसकवाचीति वैयाकरणाः
वदंति [illegible] स्याधाः शस्त्वार्धाः। शौनकोपि। श्रावण्यां पौर्णमास्यां तु श्रवणाकर्म संज्ञितं॥

Indira Gandhi National
Centre for the Arts

१०१ कर्मकृत्वा पुनः सर्पबलिं चास्यां समाचरेत्। व्रीहीणां वा यवानां वा येस्युः खंडनवर्जिताः। तंडुलायेः समुष्य
घसंकृतैः कलशान्तं। पूजयित्वाथ देवीं च बलिं प्रक्षोपसाधनी। वैकंकतीं मृगाकारां निर्माय धाययि
क्युके। तासामर्थं पृथक्कृत्य लौकिके नैव सर्पिषा। अकं कृत्वा विधानेन धानास्कैः पात्रयोर्द्वयोः। संभा
राने वमाहृत्य रवावस्तमिते सती। तां जयंतः। यस्मिन्नहनि श्रवणाकर्म तस्मिन्नेवा सर्पबलिरप्यन
स्तादहन्येवा खंडितैर्यवैर्व्रीहिभिर्वा सक्तून्कारयित्वा तैः सक्तुभिर्नवं कलशं पूरयित्वा नवे शिक्ये स्था
पयित्वा दर्वीं च बलिहरणीं तत्रैव स्थापयति। दर्वी वैकंकती मृगाकृतिः। एते रेव धानाः कृत्वाना
मामधर्मसंस्कृतेनाज्येनाभज्यो भेद्वयोः कृत्वा द्वन्येव निदधाति। आदित्येस्तमिते कुर्यादन्नाधाना
दि पूर्ववत्। हविर्द्वयस्य तूष्णीं स्यान्निर्वापप्रोक्षणे इदं॥२७॥ द्रुवं रवघातादिस्याद्विभज्य चतुं र्व
लात्। तत्रैकेन पुरोडाशमन्येन श्रपयेच्चरुं॥२८॥ एकस्मिंस्तु पुरोडाशं कपाले श्रपयेदिह। आज्ये
नसह धानानां पर्यग्निकरणं भवेत्॥२९॥ आज्यस्य केवलोस्य दोतासां त्रिः प्रोक्षणं भवेत्। अस्यार्थः।
अस्तमिते रवौ औपासनं कृत्वा श्रुतिरपि कर्मांगं द्विरावम्यपवित्रे धृत्वा देशकालौ निर्दिश्य पूर्ववद
न्वाधानं कृत्वा चरोः पुरोडाशस्य च निर्वापप्रोक्षणे। स्मिन्कर्मणि तूष्णीमेव कृत्वा व्रीहीणां पूर्ववैहन १०१ दव
नादिकारयित्वा तंडुलान्विभज्य च तत्रैकेनांशेन चरुं श्रपयेत्। अन्येनांशेन एकस्मिन्कपाले पुरोडा

शं श्रपयेत्। पुरोडाशश्रपणरूपं यथा नरेद्र दः तत्रैवं। पूर्वं पुरोडाशार्थं तंडुलान्प्रक्षिप्य पृथक्कृत्य स्वयं किं
चित्पिष्टीकृत्य कृष्णाजिने प्रस्कंद्य पत्न्या दास्या वा चूर्णं कारायितव्यं तत आज्यवेर्थ मध्ये दक्षिणभागे
स्थालीं निधाय ततो ग्नेः पश्चात्परिस्तरणस्य मध्ये उपवेषसंज्ञिय काष्ठेन द्वावंगारौ पृथक्कृत्य
तयोरेकं वायव्यदेशो निरस्यापः स्पृष्ट्वावशिष्टमंगारं दक्षिणमवस्थाप्य तस्मिन्कपालमुपधाय
मानवीनमवस्थाप्य तत्र पवित्रे निधाय पूर्णपात्रोदकं स्रुवेण पिष्टे निनीय प्रनहाभिरद्भिः पि
ष्टं परिप्लाव्य मिश्रीकृत्य पिंडीकृत्य पूर्वमुपाहितं कपालादंगारं तृणेनापोह्य चतुरस्थाल्यां तंडुलोनो
प्य पुरोडाशं कपाले निधाय अश्वशफमात्रं कूर्माकृतिं माद्भिः शुक्लीकृत्याज्यं संस्पृत्या ज्यारी निवत्या
रिहवीषि त्रिः पर्यग्निं कृत्वा पुरोडाशस्तु कंपनिनष्प दर्भैः प्रज्वाल्याते रेव स्पृष्टं तं श्रपयित्वा उप
रि भस्मनांगारानिक्षिप्य वा चावि सृज्य हस्तं प्रक्षाल्य संचापपात्रं प्रक्षालयेत्। तत आज्योद्वास
नं कृत्वा आसाद्य स्रुक्स्रुवसंमार्जनं कृत्वा पुरोडाशोपरिस्थित भस्मादि तृणेनापास्य चरुपुरोडा
शाव भिघारयेत्। एतत्सर्वमापस्तंबोक्तं गृह्यकर्मणि मंत्रं विहाय तंत्रमात्रं कर्तव्यं मंत्राणां श्रौ
तविषयत्वात्। एतत्सर्वमापस्तंबोक्तमितर आरिभ्यकारिकार्थः। आज्येनेति। आज्येन सह च
तुधाना पुरोडाशानां त्रिः पर्यग्निकरणं यथान्तरा भवत् आज्यस्य धानानां पर्यग्निकरणं भवनो

Indira Gandhi National
Centre for the Arts

स्कं॥ यत्र आज्यस्य केवलमुत्सवनं तत्र तासां नादीनां त्रिः प्रोक्षणं भवेत्। अत्र भगवान्। स्नाय
१०२ नोपासनं कृत्वा गत्वान्वाधानपूर्वकं। पूर्णपात्रानिधानांततं कृत्वा पुरस्तात्। निर्वापकाले हविषः पु
रोडाशस्य चोभयोः श्रीहीन्निरुप्य पर्याप्तानि धाय प्रोक्षणं तथा। अवहत्य पृथक्कृत्य तंडुलान् तथा पि
ष्ट्वा। प्रज्वाल्यैकत्र तत्साध्वं चरोः श्रपणमाचरेत्। पार्श्वेन्यत्र पुरोडाशं श्रपदेकेकपालके। पुरोडाशा
र्थमन्यस्मिन्निमग्नं करोति प्रकाशापि दृष्ट्वा। कृत्वाज्यभागपर्यंतमिध्माधानादि कृत्वा निर्वपणं पृथक्।
ततश्चतु पुरोडाशे पश्चेतां च यथा पुरा। जयंतः। ततो रुमिनश्चादित्यऔपासनं कृत्वा धानादि पूर्णपा
त्र निधानांतं कृत्वा हविषो निर्वपणकाले पुरोडाशस्यापि निर्वापप्रोक्षणे कृता। वहत्य तंदुलान्
पक्कं कृत्वा एकभागेन चरुं श्रपयित्वा एकेन पुरोडाशोयथा श्रप्यते तस्मिन्नेव काले श्रपयति। के
चित्पुरोडाशस्य पृथगेव निर्वापणं कुर्वीत। चरुमासादयेत्पूर्वं पुरोडाशं ततः परं॥३०॥ बर्हिष्या
ज्यान्तरे कृत्स्नं पुरोडाशं निमज्जयेत्। प्रकाशपृष्ठमथवा पुरोडाशं निमज्जयेत्॥३१॥ अस्यार्थः॥
पक्वयोश्चरुपुरोडाशयोर्मध्ये पूर्वं चरुमुद्वास्य बर्हिषि आसादयेत्। अनंतरं पुरोडाशमुद्वास्य ए
कस्मिन्पात्रे निधाय अनंतरं घृतमादाय पुरोडाशस्थितपात्रं पूरयेत्। यथा तस्मिन्नाज्ये कृत्स्नं सम १०२
स्तपुरोडाशं निमज्जयेत्। अथवा दृश्यमानपृष्ठं पुरोडाशं निमज्जयेत्। यथा पृष्ठं दर्शनयोग्यं भव

श्यं

तितावदाज्यमापूरयेत्। अत्र भगवान्। पक्वयोरुभयोः पूर्वं हविरुद्वास्य बर्हिषि। स्तीर्णे ततः पश्चि
मेन्यस्य पुरोडाशोमतः परं। उद्वास्य पात्रे कस्मिंश्चिद्देतधायततः परं। यथा दृश्येत त्राज्यस्योम
ग्नो वाथ घृते भवेत्। पूरयेत्तं पुरोडाशं तथैव घृतधारयेदिति। जयंतः। उद्वासनकाले पूर्वं हविरुद्वा
स्याभिघार्य बर्हिषि निदधाति ततः पुरोडाशस्य धानासंस्कारः पूर्वमुक्तः अथाज्येन पुरोडाशं नि
मग्नं करोति प्रकाशस्य पृष्ठं वा। कृत्वाज्यभागपर्यंतमिध्माधानादि पूर्ववत्। जुहुयात्सर्वं वक्ष्याथ
चर्वीहुतिचतुष्टयं॥३३॥ अग्नेनयादिभिः पूर्वं स्वाहाकारमृगंततः। उपस्तीर्याथ सव्येन दक्षि
णे प्रोक्षितेकरे॥३४॥ सव्येनेककपालं तमोप्य कृत्स्नमखंडितं। उपरिष्टाच्च सव्येन कुर्यादभि
भिघारणं॥३५॥ अच्युतायेति मंत्रेण दक्षिणेन जुहोत्यथ। यस्मिन्नाज्ये निमग्नोयं स्रुवेणेव जु
होति तत्॥३६॥ उपर्येककपालस्य मानो अग्न इति स्रचा॥ अथोपस्तरणादन्यः करोति गृहिणो
जलौ॥३७॥ स तेन जुहुयाद्दक्षाधानाः शंनो भवंत्विति। यास्कधाना अनभ्यक्ताः पुत्रादिभ्यो ददाति
ताः॥३८॥ अथ स्विष्टकृतं हुत्वा चरुधानेकदेशान्। पारिषेचनपर्यंतं होमशेषं समापयेदिति॥३९॥
अस्यार्थः॥ पूर्ववदिध्माधानादि आज्यभागपर्यंतं कृत्वा अनंतरं चर्वीहुति चतुष्टयं अग्नेनय

Indira Gandhi National
Centre for the Arts

स्रुपधारायेअस्मान्नित्यादिभिः चतुर्भिर्मंत्रैःस्रुगंतेनस्वाहाकारेणजुहुयात्। पूर्ववदित्यग्नौवेनधर्मेण
णाचरुहोमानंतरंयजमानः प्रोक्षितेनपात्रेस्थापितेनस्वस्यदक्षिणेकरेस्वयंसव्यकरेणोपस्तीर्य
१०३ तस्मिन्नेककपालमखंडितंसंपूर्णकृतंपुरोडाशंसव्येनस्थाप्यपश्चात्पुरोडाशस्योपरिसव्ये
पा→ नकरद्वितीयरमाभिघारणंकुर्यात्। अनंतरंअच्युतायभौमायस्वाहेतिमंत्रेणतंपुरोडाशंदक्षिण
पाणिनाजुहोति। यस्मिन्नाज्येपुरोडाशोनिमग्नस्थितः तदाज्यंस्रुवेणैवगृहीत्वापुरोडाशस्योपरि
मानोअग्नेवस्सजोअघायेत्यनयर्चाजुहुयात्। अभ्यहोमानंतरंअन्यःकोपिवैदिकः गृहिणो
यजमानस्यांजलिमुपस्तीर्यतत्रैवपूर्वमेवाज्याक्तधानादिरवदायद्विरुपस्तृणाति। अनंतरं
यजमानस्तेनांजलिनाघृताक्ताधानाः शंनोभवंत्वित्यनेनमंत्रेणजुहुयात्। पात्रांतरेपूर्वस्थापिता
धानाः अनभ्यक्तानाः धानापुत्रपौत्रादिभ्योददाति॥ अनंतरंचरोर्धानानांचैकदेशतोगृहीत्वाद्विरभि
घार्यस्विष्टकृतंकृत्वापरिषेचनांतंहोमशेषंसमापयेत्। अत्रभगवान्॥ इध्माधानादिकंचाज्य
भागहोमावसानकं। अवशिष्टंपुरस्तात्कृत्वाथोहविषः श्रुविः। अवदायावदायाग्नेर्यस्याद्यं
चतुर्थकं। कर्मास्यचमुक्ताकृत्वासव्येनपाणिना। विधायदक्षिणेपाणावुपस्तृत्यवधारणं॥ १०३
उक्ताच्युतायभौमायस्वाहेतिजुहुयात्ततः। अस्यसर्वहुतत्वेननात्रद्विरवदानता। यस्मिन्नाज्येपु

रोडाशःप्रक्षिप्तःप्राक्ततोपिच। किंचित्स्रुवेणावदायपुरोडाशस्यचोपरि। मानोअग्नेवस्सजोअघायेतिजु
हुयात्ततः। परःसभ्या
कुर्याद्वा। आदायांजलिनाधानाघृताक्तानिहिताःपुरा। शंनोभवंत्वित्यनेनमंत्रेणजुहुयात्ततः। परःसभ्या
त्मकःपाण्योर्विनियोगंदधात्यतः। आज्योपस्तरणाद्यन्यः कश्चित्कुर्यादितीष्यते। अनक्तास्त्वितराधानाः पु
त्रादिभ्योदिशेत्ततः। स्विष्टकृद्धोममारभ्यापवितंत्रंसमापयेत्। जयंतः। इध्माधानाद्याज्यभागांतंकृत्वा वदा
नधर्मेणाग्नयेतिचतस्रभिरृग्भिःप्रत्यृचंजुहोति। अथसव्येनहस्तेनस्रुवेणाज्यंगृहीत्वादक्षिणपाणावा
सिंचति। ततस्तत्रैवपुरोडाशंनिधायाभिघारयति। अस्यसर्वहुत्वाद्द्विरवदानमर्थाल्लुप्तं। ततोच्युतायभौ
मायस्वाहेतिपुरोडाशंजुहोति। यस्मिन्नाज्येपुरोडाशःसंस्थितः तस्यैकदेशतःस्रुवेणाज्यंगृहीत्वामानोअ
ग्नेवस्सजोअघायेत्यनेनपुरोडाशस्योपरिजुहोति। ततःकर्ताअंजलिंकृत्वास्तोउपस्तरणाभिघारणप्र
त्याभिघारणमन्यःकरोति। शंनोभवंतुवाजिनोहावेष्वित्यनयायाअक्ताधानास्ताअंजलिनाजुहोति। अन
क्तास्ताःपुत्रादिभ्योददातिधानाश्चरुभ्यां। स्विष्टकृदर्थमवदायजुहोतिहोमशेषंसमापयति॥ इतिश्र
वणाकर्म॥ ७३॥ ॥अथसर्पबलिः॥ श्रावणंकर्मगदितंसर्पबल्याख्यमुच्यते। अथप्रभुरयेद्दर्वीसक्तु
भिःकलशस्थितैः॥ ३९॥ गृहात्प्रागुपनिःक्रम्यशुचौदेशेद्विकस्थिते। प्रोक्ष्याद्भिःप्रक्षिपेत्सक्तून्सर्पदेवेति
मंत्रतः॥ ४०॥ नांतराबलिमात्मानंव्यवेयादिहकश्चन। व्यवायस्यनिषेधोयमुक्तोआपरिदानतेइति॥ ४१॥

Indira Gandhi National
Centre for the Arts

अस्यार्थः॥ एकस्मिन्नेव दिने श्रवणाकर्म सर्पबल्योः क्रियमाणमिति कृत्वा पूर्वं श्रवणाकर्म निरूप्येदानींस
र्पबलिनाकर्मोच्यते। तदेव कथयति। पूर्वस्मिन्नेकस्मिन्स्थिरदृढप्रदेशे नूतनरज्जुनिर्मितशिक्यापरिस्थापि
१०४ तकलशस्थितैः सक्तुभिः तत्रैव निहितां वैकंकतीं दर्वीमादाय तां गृहीत्वा गृहात्प्रमुखो निष्क्रम्य प्राच्यां
दिशीत्यर्थः। पूर्वं दिवैव कल्पिते शुद्धस्थले जलमासिच्य सर्पदेवजनेभ्यः स्वाहेति सकृन्निक्षिपेत्। सर्पे
भ्यो बलिं दद्यादित्यर्थः। आत्मनो बलेश्च मध्ये केनाप्यत्र व्यवधानं न कार्यं। परिदानपर्यंत ध्रुव मां ते परिद
दामीत्येतावत्पर्यंतं व्यवधानस्य निषेधेऽपि उक्तः॥ ये सर्पा इति मंत्रेण नमस्कुर्यात्कृतांजलिः। बलिं प्रदक्षि
णं कृत्वा पश्चादस्योपविश्य च॥४२॥ सर्पोऽसीत्यादिकं मंत्रं ददाम्यंतं सकृद्वदेत्। ध्रुवाममुं ते परिददाम्ये
नमुक्त्वा निवेदयेत्॥४३॥ ज्येष्ठानुक्रमतः पुत्रान् पत्न्या दुहितानतः। ततः पत्नीं ध्रुवाममुं इत्याद्यावर्तनेत्र
तु॥४४॥ पुत्रादेर्नाम च वक्तव्यं द्वितीयांतममुं पदे। ध्रुव मां ते परित्यादिनात्मानं परिवापयेति॥४५॥ अस्यार्थः॥
बलिदानानंतरं ये सर्पाः पार्थिवा ये अंतरिक्ष्या ये दिव्या ये दिश्यास्तेभ्य इमं बलिमाहार्षं तेभ्य इमं बलि
माहार्षं करोमीत्यनेन मंत्रेण यजमानः कृतांजलिः सन् सर्पानुद्दि... नमस्कुर्यात्। ततो बलिं प्रदक्षिणी
कृत्य अस्य बलेः पश्चादुपविश्य च। सर्पोऽसि सर्पाणां सर्पाणामधिपतिरस्यन्नेन मनुष्यांस्त्रायसे पू १०४
पेन सर्पान्यज्ञे देवांस्त्वयि मा संतं त्वयि संतः सर्पा मा हिंसिषुः ध्रुवाअमुं देवदत्तं पुत्रं ते परिददामीति

मंत्रं सकृज्जपित्वा ज्येष्ठानुक्रमतः ज्येष्ठानुपूर्वं पुत्रादीन्निवेदयेत्॥ दद्यादित्यर्थः। ततः ध्रुवसावित्रीते अमला
मविवाहितां दुहितरं परिददामीति निवेदयेत्। ततो ध्रुवं सत्यवतीममुं ते पत्नीं परिददामीति पत्नीं निवे
दयेत्। द्वितीयांतममुमित्यस्मिन्पदे पुत्रादीनां नाम च वक्तव्यं। आत्मानमपि ध्रुव मां ते परिददामीति पश्चान्नि
वेदयेत्। अन्यः कुर्वीत चेदाह गृहिणो नासमापदे। सर्पदेवाति मंत्रेण सायं प्रातर्बलिं हरेत्॥४६॥ नमस्का
रादि कुर्वीत यावत्प्रत्यवरोहणात्। सायं प्रातश्च यावंतः कालास्तत्र दिनादथ॥४७॥ तावंतो वा बलींश्चोप
हरेत्तदहरेव तु॥ अस्यार्थः॥ कार्यव्यासंगादिके चिरकारणेन अन्यकर्ता चेत्तमामिति पदस्थाने गृहिणो
यजमानस्य नाम द्वितीयांतं निर्दिशेत्॥ आप्रत्यवरोहणात् प्रत्यवरोहणं मार्गशीर्षस्य पौर्णमा
यां चतुर्दश्यां भवति। तावत्पर्यंतं प्रत्यहं सायं प्रातः सर्पदेवदेवजनेभ्यः स्वाहेति मंत्रेण बलिं दद्यात्।
नमस्कारबलिप्रदक्षिणप्रत्यङ्मुखोपवेशनमंत्रजपरिदानांतं करोति। जयंतशौनकयोर्मते प्रत्यहं मा सर्व
र्गशीर्षपर्यंतं बलिप्रक्षेपणमात्रमेव कुर्यात्॥ नमस्कारादयो निवर्तंते॥ अथवा तद्दिनात् श्राव
णीप्रतिपदमारभ्य मार्गशीर्षस्य पौर्णिमापर्यंतं चतुर्दशीपर्यंतं वा तन्मध्यवर्तीन्यहानि ह्रास
वृद्धिभ्यां परिगणय्य तेषु दिवसेषु यावंतः सायं प्रातः कालास्तावतो बलींस्तदहरेव उपहरेदुक्ता
दित्यर्थः। तदा नमस्कारप्रदक्षिणादीनि तत्र न्यायान्निवर्तंते॥ अत्र भगवान्॥ ततः सर्पबलिं कर्तुं

Indira Gandhi National
Centre for the Arts

...कभिः कलशस्थितैः। सर्पेभ्यो बलिमाधायये सर्पाइति पूर्वेकं। उपाक
नवेशिक्ये निवेदितुं ... रामीयतं चवमन्त्र मुक्तानमस्कृतः॥ बृ आर्यं सर्पानुद्दिश्य प्रादक्षिणमथो बलिः परीत्य पश्चिमेन स्थाद्देप विश्यम
रामीयतं च मन्त्र मुक्ता नमस्कृतः॥ वृ आर्यं सर्पानुद्दिश्य प्रादक्षिणमथो बलिः परीत्य पश्चिमेन स्थादुपविश्य म
१०५ हीतले। मन्त्रं हि सिसुरियं नसर्पोसीस्य वमादिकं। जपित्वा थृक्रवेत्सेच संबुध्यानदनंतरं। ज्येष्ठानुपूर्व्या पत्न्यादीन्
सर्वास्क्रूपरिदायतु। अथास्मानोपि सर्वाने परिदानं समाचरेत्। आत्मनः परिदानोतु क्रवमांत मितीनयेत॥
ननु पित्रोरात्मन श्वस्त्र रुद्ध्वनानृथा। स्वयं कर्तृ च मे नत्व कर्मणाहीर मर्थनः॥ अन्यकर्त्तृकपक्षे पि सोधि
कार्यत्र कर्मणि। तस्यैव मार्गशीर्षस्य पौर्णमास्यामथापि वा। ततः श्रुक्रू चतुर्दश्यां नास्ता प्रत्यवरोहणं।
करिष्यमाणं तत्कर्मतनुः प्राग्नितु उत्तरं। कुर्वीत प्रत्यहो रात्रं सायं प्रातरिमं बलिं। तेनैव मन्त्रेण तयाद्व्यां
सिद्धे सक्तुभिः। अत्रोपवेशनं सम्यग्वले मैत्र जपस्तथा। नमस्कारश्च सर्पेभ्य इति सर्वे निवर्तते। यद्वा
नत्रैव समये नास्त्वानप्यतो बलीन्। संख्यापहरहश्चैवमाचार्यः केचिदूचिरे इति। जयंतः। अथाहन्येव स्त
सर्व्य बलिहरणार्थं प्राच्यां दिशि शुद्धमनकाशं कल्पयति। अथास्मिन्काले नवे कलशे सक्तून्गृहीत्वा नेदं
अपूरयति। अथानां गृहीत्वा प्राङ्मुखो निष्क्रम्य पूर्वसंकल्पिते देशे स्रोनिनीयत स्मिन्प्रदेशे सर्पदेवजने
भ्यः स्वाहेति सक्तूनावपति। अनंतरं ये सर्पाः पार्थिवा इत्यनेन प्रणामं करोति। अथ तं बलिं प्रदक्षिणी १०५
कृत्वा पश्चिमदेशे उपविश्य सर्पोसीयेतं मन्त्रं जपति। अथ पुत्रादीन्ज्येष्ठानुक्रमेण परिददाति एवं
देवदत्तं परिददामि एवं यज्ञदत्तेन परिददामि। एवं विष्णुमित्रं ते परिददामि। ततः अप्रमत्त दुहितॄणां

परिदानं भवति। ततः पत्नीमपि। एवं सर्वं परिदायात्मानं मां ते परिददामि। अन्य एव कर्ता चेत्। तदा एव ह ३
वमां ते परिददामीत्यत्र मामित्यत्र गृहिणो नाम निर्दिशति। अथ प्रत्यवरोहणस्य द्वयोः कालयोः का
लयोरेककालमवधायाहरहः सायं प्रातरा प्रत्यवरोहणाद्बलिं करोति। सर्पदेवजनेभ्यः स्वाहेति नम
स्कारपरिदानाद्यन्यत्र करोति। अथवा कालज्ञानविशेषकाशे प्रत्यवरोहणार्थी कानाम ह्रापारि
माणं ज्ञात्वा यावत्सहानि तावती राहुती स्तदहरेव जुहोति॥ इति सर्पबली कर्म॥ ॥अथाश्वयुजी
कर्म॥ ॥कुर्वीताश्वयुजी कर्म तदिदानीमथोच्यते॥४८॥ स्यादाश्वयुजमासस्य पौर्णमास्यां तु क
र्मतत्। निवेशनमलं कुर्यात्कुड्यानां भलेपनं भवेत्॥४९॥ उपर्याछादयेत्तेषां समां भूमिं करोत्यथास
र्वे गृह्या विशेषेण स्नाति शुक्लाम्बरास्तथा॥५०॥ औपासने हुते प्रातरन्वाधानादि पूर्ववत्। अस्यार्थः॥
इदानीमयाश्वयुजी कर्मोच्यते। नवधान्यादिसामग्रीं पृषातकं च संपाद्य आश्विन्यां पौर्णमास्यां तत्क
र्म कुर्यादिति। भगवानपि॥ यापौर्णमास्याश्वयुजी स्यात्कानक्षत्रयोगतः। तस्यामाश्वयुजीकर्मेत्येवम
न्वर्थसंज्ञयेति॥ निवेशनं मन्दिरं संमार्जनं भित्तिचित्रातोरणादिभिः रंगवल्लिकाभिश्च अलंकुर्यात्॥
उपरि यत्त्रुटितं स्फुटितं स्ववलितं च तत्समं कार्यमिति। अंगणादिदेशे नीचोच्चस्थलं समं कुर्यात्। गृह्याः
गृहनिष्ठा मनुष्याः सर्वे पि विशेषेण स्नाति तैलोद्वर्तनादिभिरित्यर्थः। तथा शुक्लाम्बरधारणमपि कु

Indira Gandhi National
Centre for the Arts

र्वेति। अनेन प्रकारेण सर्वं विधाय प्रातरौपासनं कृत्वा तत्पूर्ववदन्वाधानादि पूर्णपात्रनिधानां
तं कृत्वा अत्र प्रधानदेवता पशुपतिः। शौनकोपि। यत्कर्म पशुपतिनस्य प्रयोगोऽत्र निबध्यते। पूर्वेद्युः
१०६ परले पार्वणस्थालीपाकनिवर्तनात्प्रभातकाले यः स्नातः शुक्लाम्बरधरो भवेत्। प्रातरौपासनं कृत्वा तस्मिन्न
ग्नौ पुरस्तात्। अन्वाधानादिकं तत्र प्रणीतासाधनाद्यन्तं। जयंतः। अथाश्वयुज्यां पौर्णमास्यामाश्वयुजीक
र्म करोति। तत्र पूर्ववदेव प्रत्यवरोहणोक्तेन विधिना गृहस्यालंकारं करोति। अथास्यां पौर्णमास्यां पुत्रादि
यः स्वयं च विशेषेण स्नानं कुर्वन्ति। शुद्धवस्त्राश्च भवंति। ततः प्रातरौपासनं कृत्वा अन्वाधानादि पूर्णपा
त्रनिधानांतं करोति॥ उक्ता पशुपतिपदं चतुर्थ्यंतं तत्तस्मै॥ ५१॥ त्वा जुष्टं निर्वपामीति निर्वपेत्प्रोक्षणं त
था॥ ५२॥ प्रोक्षामीति विशेषेण प्रोक्षणेऽन्यत्समं भवेत्॥ चरुः श्रपणपर्यंतमवघातादि पूर्ववत्॥ ५३॥
कुर्यात्पृषातकं नाम हविरन्यत्तदुच्यते। पयस्याज्यं निषिंचेत्तु तत्पयः स्यात्पृषातकमिति॥ ५४॥ अस्या
र्थः। पशुपतिपदं चतुर्थ्यंतं पशुपतये त्वा जुष्टं निर्वपामीति मुष्टिचतुष्टयं निर्वपेत्। तथै
व प्रोक्षणमपि कुर्यात्। प्रोक्षणे प्रोक्षामीत्येतावान्विशेषः। अन्यत्सर्वं समानमेव भवेत्। चरुः
श्रपणांतं पूर्ववदवहननादि कुर्यात्। पृषातकं नाम अन्यद्धविरुच्यते। एकस्मिन्भाजने होमार्थं ग
व्यं दुग्धं प्रक्षिप्य तस्मिन्दुग्धे आज्यं निक्षिपेत्। तेन तदा तत्पयः पृषातकं भवति। तदिदं द्रव्यं पृषातका १०६

रव्यं प्रत्येतव्यं। अत्र पयो द्रव्यस्याधिकरणत्वात्। पयसो घृतापेक्षया आधिक्यं प्रतीयते अर्थादा
ज्यस्याल्पत्वमिति। अस्यापि च सहाज्येन पर्यग्निकरणं भवेत्। इध्माभिघारणांतं स्यादाज्यस्यो
द्वासनादिकं॥ ५५॥ आज्यस्य केवलोत्पूतौ तस्य त्रिः प्रोक्षणं भवेत्। कृत्वाज्यभागपर्यंतं तत्तन्वार
ब्धः स्रुवादिभिः॥ ५६॥ अस्यार्थः। तत्पृषातकपात्रमग्निसमीपे स्थापयित्वा ततः पर्यग्निकरण
वेलायां पृषातकस्य चरोश्च आज्येन सह पर्यग्निकरणं भवति। आज्यस्य केवलमुत्पवनपक्षे
तस्य पृषातकस्य त्रिः प्रोक्षणं भवति। आज्योद्वासनादि इध्माभिघारणांतं कर्म विहाय यय
जमानः स्रुवादिभिरन्वारब्ध इध्माभ्याधानादि आज्यभागांतं कुर्यात्॥ अत्र भगवान्। कृत्वा
च पशुपत्यर्थं चतुर्मुष्टिकं प्रकारः ततः। परावशेषितं तत्र माज्यसंस्कारपूर्वकं। आज्यभागांत
माचार्य इति। जयंतः। पशुपतये त्वा जुष्टं निर्वपामीति अनेन निर्वापप्रोक्षणे करोति पय
सि घृतं मिश्रीयते तयोः पृषातकमिति संज्ञा भवति। अस्य संस्कारः। पूर्वमुक्तः। होम
काले पुत्रादयो गृहिणमन्वारभंते। पशुपतये शिवाय शंकराय इत्यादिनाम मंत्रैः॥ पृषातका
य स्वाहेति मंत्रेण जुहुयाच्चरुं॥ ५७॥ अथोपस्तरणादन्यः करोति गृहिणोंजलौ। द्रवतत्तः स्र

Indira Gandhi National
Centre for the Arts

वेणैव पृषातकमवद्यति॥५८॥जुहोत्यंजलिनाचैव दूनं मे पूर्यतामिति॥हविर्द्वयैकदेशाभ्यां स्विष्टकृत्स्यात्समाप
१०७ येत्॥५९॥अस्यार्थः।ततो दर्व्यामुपस्तरणादिकृत्वा अवदानधर्मेण चरुमवदाय पशुपतये शिवाय शंकराय
स्वाहेति हुत्वा ततः पृषातकद्रव्येण होमं करोति।तस्य प्रकारमाह।अनंतरं गृहिणो यजमानस्यांजलावुप
स्तरणाद्यन्यः करोति।द्रव्य द्रव्यत्वात्स्रुवेणैव पृषातकमंजलौ अवद्यति एतत्पृषातकमंजलिना जुहो
ति।ॐ ऊनं मे पूर्यतां पूर्णं मे मोपसदत् पृषातकाय स्वाहेति मंत्रेण।अनंतरं चरुपृषातकयोरेकदेशं गृही
त्वा स्विष्टकृतं हुत्वा होमशेषं समापयेत्।अत्र भगवान्॥अवदाय चरुं ततः।मंत्रमुक्त्वा पशुपतय इत्या
दि जुहुयात्।पुनः पुरः कृत्वेत्य जुहुयुः।शुचिवाससइति।होमस्य बहुकर्तृत्वश्रुतेः पुत्रादयो।पित्वा स्ना
त्वा शुक्लांबरधरा भूत्वा प्रयतमानसाः।अन्वारंभे रकर्तारं मासीरन्वानदंतिके।ॐ ऊनं मे पूर्यतां पूर्ण
मित्यक्रमसंयुतं।पृषातकाय स्वाहेति पर्यंतं मंत्रमाहितः।उदीर्यांजलिना पश्चाज्जुहुयाच्च पृषा
तकं।अंजलौ पाणियुग्मस्य विनियोगादिहापि च।धानाहोमवदन्यस्यात्कर्तोपस्तरणादिके।क्षी
रेण यत्घृतं मिश्रं तत्पृषातकमुच्यते।ततो विष्टकृतादूर्ध्वं तंत्रं परिसमापयेदिति।ननु यंतः पशुपतये अ १०७
नेन हुत्वा पृषातकमंजलिना जुहोति।अस्योपस्तरणाद्यन्यः करोति।पृषातकं स्रुवेणावद्यति तदूनं मे
पूर्यतामिति अनेन मंत्रेणांजलिना जुहोति।ततः स्विष्टकृदादिहोमशेषं समापयंति॥ ५७॥ ५७॥ ॥

---

इत्याश्वयुजीकर्म॥६॥अथाग्रयणकर्म॥शरद्याग्रयणं नाम पर्वणि स्यात्तदुच्यते॥पूर्णपात्रनिधानांत
मन्वाधानादि पूर्ववत्॥६०॥निर्वापप्रोक्षणे तूष्णीं भवेतामत्र कर्मणि।कृत्वाज्यभागपर्यंतमवधानादि
पूर्ववत्।अस्यार्थः।शरत्काले पूर्णिमायाममावास्यायां वा आग्रयणं नाम कर्म भवेत्।तत्कर्मेदानीमुच्यते।
धाना पूर्ववदाश्वयुजीकर्मवत्स्वानतो पासनान्वाधानादि पूर्णपात्रनिधानांतं कृत्वा अस्मिन् कर्मणि निर्वापप्रोक्षणे तूष्णी
न एव भवेतां।अवहननादि चक्षुषी पर्यंतं पूर्ववत्कृत्वा अथ धानाहुतीर्जुहुयात्।अत्र भगवान्।अनाहिताग्निरप्यग्नि
विहस्योपासनं ततः स्थालीपाकप्रकारेण चरुं पक्त्वावदाय च।एतैरेव त्रिभिर्मंत्रैर्हुत्वा स्विष्टकृदादिकं कृत्वोपरि कं॥
तनं तंत्रमथाभं हुतशेषितं।वैश्वदेवावशिष्टं च पात्रे निक्षिप्य कुत्रचित्।तस्मात्रमंत्रसहितं सव्ये पाणौ निधाय
च।तत्र प्रजापतेस्याद्यं मंत्रमुच्चार्य पाणिना।दक्षिणेनाभिमृश्याथ भद्रान्नः श्रेय आदिकं।उच्चार्य मंत्रं प्राश्यैव माच
म्य हृदयं हृतः।अमोसि प्राणतद्दतं ब्रवीमीत्यमादिकं।मंत्रमुच्चार्य हस्तेनाभिदेशं परामृशेदिति।तिसृ
श्चर्वाहुतीश्चाथ सजूरित्यादिभिस्त्रिभिः।स्विष्टकृत्स्याच्चरोरेकदेशं सव्ये निधाय च॥६१॥प्रजापतेति मंत्रेण
दक्षिणेनाभिमृश्य तत्समिति।अस्यार्थः।सजूरित्यादिभिर्मंत्रैस्तिस्रश्चर्वाहुतीर्जुहुयात्।दर्व्यामुपस्तरणादि कृ
त्वा वदानधर्मेणावदाय।ॐ सजूर्ऋतुभिः सजूर्विधाभिः सजूरिंद्राग्निभ्यां स्वाहेति हुत्वा तथैव पुनरादाय द्वि
तीयां हुत्वा विश्वेभ्यो देवेभ्यः स्वाहेति।पुनस्तथैवावदाय द्यावापृथिवीभ्यां स्वाहेति हुत्वा स्विष्टकृद्धोमं कृत्वा त्रेतं

Indira Gandhi National
Centre for the Arts

नरं होमशेषाणां चरोः सकाशात्। एकदेशं किंचिन्मात्रं [illegible] हस्ते [illegible] पयित्वा ततः। ॐ प्रजापतये त्वा ग्रहं गृह्णामि मह्यं श्रियै मह्यं यशसे मह्यमन्नाद्यायेति मंत्रेण [illegible] पाणिनां तद्धाम पाणिस्थितं [illegible] भिन्न
१०८ श्य भक्षयेदिति॥ भद्रान्न इति तु प्राश्यायाचमेत्। [illegible]॥६३॥ अलाभे [illegible] तमे वामोसि मंत्रतः। प
नीतमध्य हविषः शेषं प्राश्यास्यमंत्रकं॥६४॥ परिषेचनपर्यंतं होमशेषं समापयेत्॥ इदमाग्रयणं कुर्याच्चेता
ग्निस्त्वाहितानकइति॥६५॥ अस्यार्थः। अभिमर्शनानंतरं दक्षिणहस्ते गृहीतान्॥ ॐ भद्रान्नः श्रेयः सम
नेष्ट देवा [illegible] समश्रीमहि त्वा। स नो मयोभूः पितवाविशेह शन्नो भव द्विपदे शं चतुष्पद इति मं
त्रेण तदन्नं भक्ष[illegible]दिति। अर्थात् होमशेषं किंचित्का भक्षणं कार्यमिति। ततः पाणिं प्रक्षाल्य द्विराचम्य
ततः स्वासने उपविश्य। ॐ अमोसि प्राण तदृतं ब्रवीम्यमासि सर्वाननुप्रविष्टः। स मे जरां रोगमपनुद्य श
रीरादमा म एधि मा मृथा म इन्द्र। इति मंत्रेण आत्मनो नाभिदेशं स्पृशेदिति। अनंतरं पत्न्याश्च शेषं मध्यप
देशे कदेशं दद्यात्। मा हविश्शेषममंत्रकं प्राश्नोति। ततः परिषेचनपर्यंतं पूर्वप्रकारेण समापयेदिति।
यदा आश्वयुजी कर्म आग्रयणीकर्म च सह तंत्रेण क्रियते तदा नवान्नेनैव कार्यं। प्राशनं तु आग्रयणविभा
गेनैव भवति। यदि पर्वांते आग्रयणं क्रियते तदा आश्वयुज्यां नवान्नेन होमविधानेनावश्यं कर्तव्यं। सि आ १०८
हिता। रग्निस्त्रेताग्निः आहिताग्निके आग्रयणं कर्म कुर्यात्। आश्वयुजी कर्म आहिताग्नेरपि औपासनाग्ना

वेव भवति। अनाहिताग्निस्त्वाग्रयणं कर्म शालाग्नौ करोति। शालाग्निस्त्वौपासनाग्निः। तथा च गृह्ये। आ
हिताग्नेराग्रयणस्थालीपाको नाहिताग्नेरपि शालाग्नौ। इदमाग्रयणं यदा वर्षस्य तृप्तिः तदा भवति। शर
दी भवतीत्यर्थः। तथा च वचनं। शरदि व्रीहिभिर्यजेतेति। तत्रापि पर्वणि भवति। वसंते प्याग्रयणमस्ति प्रा
शनमाग्रयणद्वयेपि भवति। वसंते पर्वैरेव भवतीति पर्वाग्रयणमुच्यते। जयंतः। अनाहिताग्निः पित्र्या
लीधर्मेण पूर्वोक्तमंत्रैर्होमं समाप्य प्राशनं करोति॥ कुतश्चिद्देकदेशमेकस्मिन्पात्रे गृहीत्वा सव्ये पाणौ
करोति। ततो दक्षिणेन पाणिना प्रजापतये त्वेत्यनेनाभिमृशनं कृत्वा भद्रान्न इति अनेन प्राश्याचम्य तत्रे
वासीनेनाभिमालभेत्। अमोसीत्यनेन पत्नीत भवान्नं वैश्वदेवं प्राश्नाति॥ इत्याग्रयणकर्म॥ ॥अथ प्रत्यव
रोहणं॥ एवमाग्रयणं प्रोक्तं वक्ष्ये प्रत्यवरोहणं॥ मार्गशीर्षस्य मासस्य पौर्णमास्यां तदिष्यते॥६६॥ पु
र्वेद्युर्वा भवेत्तद्वद्गृहालंकृत्य निवेशनं। भास्वत्सकामिते कुर्यात्स्न्वा धानादिपूर्ववत्॥६७॥ निर्वापप्रोक्षणे तूष्णीं
पयसि श्रपयेच्चरुमिति॥ अस्यार्थः॥ पूर्वोक्तप्रकारेणाग्रयणमुक्त्वा प्रत्यवरोहणं वक्ष्य इति प्रतिजानीते।
तत्र कालमाह। तच्च मार्गशीर्षपौर्णमास्यां भवति। तच्च गृहालंकरणादिकं पूर्वेद्युरिति चतुर्दश्यां कुर्यात्॥
अथवा पूर्णिमायां तद्वदाश्वयुजीकर्मवत्। एतच्च गृहालंकरणादि तद्दिवेव भवति। सूर्येऽस्तंगते स
ति औपासने हुत्वा[illegible]रपि कर्मांगं द्विराचम्यासने उपविश्य प्राणानायम्येति। थिश्रवणांते प्रत्यवरोह

Indira Gandhi National
Centre for the Arts

णारथ्यं कर्म करिष्ये। तदंगमन्वाधानं करिष्ये। इति प्रतिज्ञायान्वाधानादि पूर्ववत्कृत्वा। निर्वापप्रोक्षणी
तु स्थालीमय अत्र निर्वापणमष्टमुष्टीभर्यात्। अवघातादि प्रक्षालनांतं कृत्वा मुग्धचरुं श्रपयेत्। अ
त्र भगवान्। मार्गशीर्षस्य मासस्य पौर्णमास्यामथापि वा। तस्य शुक्लपक्षे तु दृश्या नाम्ना प्रत्यवरो
हणं। शास्त्रानुरपुरुषमंत्र प्रोक्तं पदमुच्यते। वर्षा कृत्वा रिछिन्नस्यावेश्मनो लेपनादिभिः। कुर्यात्पुन
र्नवीकारं पूर्वमेवावधानतः। मृदंतरेण कुड्यादेर्वारि मिश्रेण कुड्य। भिन्नानाराप णार्थं च परामृ
ज्यावलेपनं। छिद्रपिधानमन्यत्रे संस्तरणमुच्यते। निम्नस्थाने समं यत्स्यात्तदुपस्तरणं मतं। ए
वं मंतनर्वीकृत्य निवासं लेपनादिभिः। करोदः शयनार्थस्याप्य हन्यर्चा विशोधनं। कृत्वाय तदहमर्कं स्तंग
ते स्थोपासनानलं। विहृत्य हुत्वायुः स्थालीपाकधर्मेण पायसं। श्रपयित्वा च रुं निांता जयंतश्च॥ अथ
यथोक्तकाले प्रत्यवरोहणं नाम कर्म करोति। तत्र पूर्वमवलेपनादिभिर्गृहं पुनर्नवीकरोति। अहन्येव तत्कं
बलादिस्वयमेव गृहीत्वा स्यद्रव्यशुद्धिप्रकरणोक्तेन विधिना संशोधं करोति। पूर्वमेव प्रारब्धमन्वारस्त
मितश्चादित्यं औपासनं हुत्वा स्थालीपाकधर्मेण पायसं चरुं श्रपयति। कृत्वाज्यभागपर्यंतमन्वारब्धः १००
स्कंदादिभिः ६८॥ अपश्वेतेति मंत्राभ्यां जुहुयात्स्वाय स्वाहुती। जपेदभयमित्यादि मीढ्माणाह वि

पर्था०२

भुजं॥ ६९॥ उक्ताशिवो नइत्यादि हेमंतेति परं स्मरेदिति॥ अस्यार्थः॥ तत आज्यभागांतं कृत्वा स्कंदादिभिरन्वार
ब्धः पायसं जुहुयात्। तद्यथा। दर्व्यामाज्योपस्तरणमवदानादि कृत्वा॥ आपश्वेतपदाजहि पूर्वेण चापरेण
च। सप्त च वारुणीरिमाः सर्वाश्च राजबांधवीः स्वाहेति प्रथमाहुतिं हुत्वा पुनरुत्थैवावदाय। न वै श्वेत
स्याध्याचारे हिर्ददाश किं चन। श्वेताय वैदार्वायन नमः स्वाहेति द्वितीयाहुतिं हुत्वा अग्निं विलोकयन्। अ
भयं नः प्राजापत्येभ्यो भूयादिति मंत्रं जपेत्। अत्र भगवान्। होमसमये समुपस्थिते। अन्वारब्ध स्कंदपुत्रा
द्ये रपश्वेत पदाजहि। इत्याभ्यां तु खिलार्थाभ्यामृग्भ्यां हुत्वा यथाक्रमं। जथाभयं न इत्याद्यं मंत्रं पश्यन्हु
ताशनं। जपं नन्त स्कंद हेमंतशब्दं स्कंद मनसा स्वयं। संबुध्यं तरुस्कृत्वाथ शिवो नः स्कमना भव। इत्येत
स्यापि मंत्रस्य मनसा जपमाचरेदिति। जयंतः। अथ होमः पुत्रादिभिः रन्वारब्धः। आपः श्वेतपद
दाजहि तेनाभ्यामृग्भ्यां हुत्वा अभयं नः प्राजापत्येभ्यो भूयादित्य। मीढमाणो जप शिवो नः
स्कमना भवेत्येन मंत्रं तेहेमंतशब्दं मनसा ध्यायति॥ स्वस्तरं स्वयमास्तीर्यु पश्चादग्ने रनः परं॥ ७०॥
तत्रोपविशति स्योना पृथिवीति जपेद्दश्वं। एतत्प्रभृति मंत्रज्ञा जपेयुः सूनवो पि च॥ ७१॥ शयीत
तत्र सामासः प्राकृशिरा उदगाननः। गृहिणोनंतरं यो यो ज्यायांस्तद्वच्छयीत व॥ ७२॥ यथावकाश
मथवा शेरत्नुतद्वदेव नरा इति। अस्यार्थः। हेमंतस्मरणानंतरं अग्नेः पश्चिमभागे स्वयमेव शयनयोग्य

Indira Gandhi National
Centre for the Arts

खस्तरमास्तीर्य तस्मिन्स्वस्तरे उपविश्य स्योना पृथिवीति ऋचं जपेयुः। कृताध्ययनाः पुत्रादयो पि तस्मिन्ना
सित्वा इमामेव ऋचं जपन्ति। जपस्तु सर्वेषां सकृदेव। अथ जपानन्तरं सामात्यः कलत्रादिसहितः प्राक्
११० शिरा उदगाननः सन्नशायी तशयनं कुर्यात् इति। तत्र शयनप्रकारमाह। तस्मिन्स्वस्तरे पूर्वं यजमा
नः शायी पश्चात्सर्वे अमात्याः ज्येष्ठादिक्रमेण यजमानवच्छेरते। अथवा अवकाशानुसारेण ते सर्वे
तद्वच्छेरते। अत्र भगवान्॥ पश्चिमेग्नेः पलाशाद्यैः स्थात्स्तरायनो। यताशय्या शोभनमास्तीर्य तत्रासि
त्वा यथासुखं। जपेदृचमथ स्योना पृथिवीत्येवमादिकं। जपित्वा तत्र भार्याग्निः पुत्रैश्च सह संगतः। शा
यीतोदङ्मुखः प्राच्यां शिरा दक्षिणपार्श्वतः। यथावकाशमितरे पौत्राद्यास्तत्र शेरते। अनुज्येष्ठशा
यी स्याद्गृहिणीनन्तरं सुतास्तु गृहिणानन्तरं ज्येष्ठः संविशेत्तस्य चानुजः। तदन्वयं इत्येवं क्रमेणा
ऽपि शेरते। ये मंत्रान्मंत्रितुं योग्याः स्त्रीबालादिविवर्जिताः। शयानोऽसावतः स्योना पृथगित्यादिका
मृचां जपित्वेति जयंतः। अथात्मनः शयनेन तत्रैवानीय सम्यक्स्वयमेव स्तृणाति। ततोऽस्मिन्शयने उप
विश्य स्योना पृथिवि भवेत्येनं मंत्रं जपित्वा प्राक्शिरा उदङ्मुखः तत्रैव संविशति अमात्यैः सह तेन च
यथावकाशं संविशति। अथवा यो यो ज्येष्ठः असावस्मान्वतरो भवति॥ उत्थाय च मन्तो देवाः प्राङ् ११०
मुखास्त्रिर्जपंत्यथ॥७३॥ ऋचोऽस्याः प्रथमं पादं जपेयुर्दक्षिणामुखाः। प्रत्यङ्मुखाद्वितीये तु तृ

तीयमुदगाननाः॥७४॥ ततोऽत्रास्विष्टकृद्वर्जं होमशेषं समापयेदिति॥ अस्यार्थः। शयनलक्षणमंगलस्य
र्मं कृत्वा निद्रामकृत्वैव सर्वे उत्थाय अतो देवा इत्यृचं प्राङ्मुखाः संतः त्रिवारं पठंति। अनन्तरमस्या एव ऋ
चः प्रथमं पादं दक्षिणमुखाः सकृज्जपित्वा तथैवस्या एव ऋचः द्वितीयं पादं पश्चिममुखाः सकृज्जपि
त्वा तथैव तृतीयं पादं उत्तरमुखाः सकृज्जपंति। जपानंतरमस्मिन्कर्मणि स्विष्टकृद्धोमो नास्ति त
स्मिन्स्विष्टकृद्वर्जं होमशेषं समापयेदिति। अत्र भगवान्। उत्थाय शयनाद्दासितो प्राङ्मुखाः सहस्त्रि
नो देवा ऋचं वा या त्रिर्जपित्वा समाहिताः। पश्चाद्दिशो दक्षिणाद्यास्तिस्रः प्रोच्य यथाक्रमं। ततोऽतो
चोऽस्यास्त्रीः सर्वे जपेयुः सह संगताः। संविश्य संविशोत्थाय कुर्युश्चानुदिशं जपं। अयं चोत्थाय शय
नाद्दक्षिणाप्रत्यगुत्तराः। दिशस्तिस्रः प्रतिदिशं प्रतिमेव यथाक्रमम्। जपेयुरेतामृचमेव सकृत्सकृ
दखंडितं। अथोपरिष्टात्तंत्रं च स्विष्टकृद्धोमवर्जितं। विधाय रात्रिशेषं तु संविशंतु यथापुरमिति। जयं
तः॥ अथास्माच्छयनादुत्थायातो देवा अवंतु न इत्यृचं प्राङ्मुखास्त्रिर्जपंति। अस्या एव ऋचस्त्रयः पादास्तिस्रो
दिशो यथाक्रममवलोकयंतो जपंति। अतो देवा अवंतु न इति दक्षिणामुखाः जपंति यतो विष्णुर्विच
क्रम इति प्रत्यङ्मुखा जपंति। पृथिव्याः सप्तधामभिरिति उदङ्मुखा जपंति। अथाकृद्वर्जं होमशेषं
समापयेदिति। ततो निर्गत्य यथापूर्वं शेरते। यथाशय्यं शयित्वा ते संगता उदिते रवौ॥७५॥ जपेयुः

Indira Gandhi National
Centre for the Arts

त्रास्मिन्कर्मणि साधनं अर्थ प्राप्तं सर्वमाग्नेयीमुखमिति परिभाषते ॥ अग्नेर्वायव्यदेशे ईशान्यदेशे
वा आग्नेय्यग्रकोदर्भान्नास्तीर्य तेषु स्थाल्यादीनि सादयेदिति । स्थाल्यादीनि यत्कर्मङलुपर्यंतान्युक्तानां
११२ न्येव एकैकमासादयेदिति द्वंद्वं वर्जनीति भावः ॥ पात्रासादनानंतरं स्थाली शूर्पेण गृहीत्वा व्रीहिपूर्णं
स्थालीं कुर्यात् । व्रीहिमच्छकटं चाहेद्दक्षिणस्यामवस्थितं ॥ ८२॥ आरुह्य व्रीहिभिः स्थालीं पूर्णां शूर्पेण नि स्य
मृज्य च । शकटारोहणं चैव भवेद्दक्षिणभागतः ॥ ८३॥ शूर्पस्थान् शकटं प्रास्य कृष्णाजिन उलूखले ।
चरुस्थाल्यां स्थिता व्रीहिनवहन्यात्ततः परमिति ॥ ८४॥ अस्यार्थः । अग्नेर्दक्षिणभागे स्थापितं व्री
हिपूर्णं शकटं दक्षिणभाग आरुह्य अर्थादेव शकटे शूर्पं स्थापयित्वा तस्मिन् शूर्पे स्थालीं संस्थाप्य
व्रीहिभिः पूर्णां कृत्वा अधिकान् स्थालीमुखस्थितान् शूर्पे निमृज्य प्रक्षिप्य शूर्पस्थान् व्रीहीन्पुनः
शकटे प्रक्षिप्य कृष्णाजिन उलूखले स्थापिते सति अर्थादेव चरुस्थालीगतान् व्रीहीन् तस्मिन्नुलू
खले प्रक्षिप्य अनंतरं तान् व्रीहीन् मुसली अवहन्यात् । सकृन्मुसलीकृतानत्र सकृत्सशाल्यतंडुलान् ॥ अपाये नूफली
त्वोल्मुकं कृत्वा चेरूपेस्यानली दिशं ॥ ८४॥ अनिप्रणीत एषोग्निः स्तपरिस्तीर्य पूर्ववत् ॥ अर्वागस्मात्लिखे
स्वेच नलेखामपहताइति ॥ ८५॥ अभ्युक्ष्य नाम वस्तीर्य सकृदाछिन्नं बर्हिषे ॥ कंडनानंतरं शूर्पेण स ११२
कृत्फलीकरणं कृत्वा सकृदेव प्रक्षाल्य पाकार्थं सोपासनाग्नौ स्थापयेत् ॥ अथाग्नेः सकाशादुल्मुकं ग्र

हीत्वा स्रुपाणीत्यादिमंत्रेणाग्नेयीविभागे स्थापयेत् । एषोग्निरतिप्रणीत इत्युच्यते । अस्याप्युपाग्निवद्दाग्ने
य्यग्रैकैरेव दर्भैः परिस्तरणं कृत्वा अस्मादग्निप्रणीतादर्वाग्विभागे अपहता असुरा रक्षांसि वेदिषद इति
मंत्रेण लेखामुल्लिखेदिति । मंत्रस्यास्य भवे कुशमूलेन तिर्यक् उल्लेखने विशेष उक्तो हेमाद्रौ ब्रह्मांड
पुराणे । सव्येतराभ्यां पाणिभ्यां कुर्यादुल्लेखनं द्विजः । त्रयघर्षणं ततः कुर्याछादकमध्यतं द्वितः । स्मृत्यं
तरे । कराभ्यामुल्लिखेत्स्फ्येन कुशेर्वापि मही द्विज इति । ततस्तां रेखां तूष्णीमभ्युक्ष्य सकृदाछिन्नकुशा
भावे कुशादिभिर्वा कार्यं । तथा च विष्णुधर्मोत्तरे । पिंडनिर्वपणं कार्यं कुशाभावे विचक्षणैः । कुशेषु रा
जहूर्वा स्फ्पवित्रे परमेस्मृत इति । तस्यां तरेखायां आग्नेय्यग्रं बर्हिरास्तृणीयात् ॥ अनुत्स्तं विलीनाज्यं
स्रुवायां सिच्यते धुना ॥ ८६॥ उत्स्तं नवनीतं वा सादयदक्षिणतो स्रुवं ॥ अभिघार्य चरुं स्रुवेणोदगुद्वा धौ
स्यपश्चिमे ॥ ८७॥ आसाद्य वांजनादीनि दक्षिणस्यां हविर्भुजः । प्राचीनावीत्यथेदानीमाधायेध्मं हविर्भुजमि
ति ॥ ८८॥ अस्यार्थः ॥ अधुनानीमस्मिन्काले स्रुवायामुक्तामाज्यं प्रक्षिप्य अग्नेर्दक्षिणभागे स्रुवमासादयेत् ॥
अथ शृतं स्थालीपाकं स्रुवापात्रस्थितेनाज्येन चरुमभिघार्य उदगुद्वास्य अग्नेः पश्चिमभागे स्थापयेत् ॥ त
तः अग्नेर्दक्षिणभागे अंजनाभ्यंजनकशिपूपबर्हणानि स्थापयेत् । उत्तरत्रोपयोगार्थं ॥ अर्थादेतावस्त्वंतं स
व्येनैव पिंडपितृयज्ञांगकर्म कृत्वा प्राचीनावीति भूत्वा अभिघारणं विनैव अमंत्रकं इध्ममग्नौ जुहोति । इध्म

Indira Gandhi National Centre for the Arts

११२ स्रुक्पितृकर्मणि उदुंबरवृक्षस्य प्रशस्यते। तदभावे याज्ञिकाः पालाशादीनां न प्रसंगी कुर्वंति। अत्रेभ बंधनं
नास्ति। अत एवात्र रज्जुकरणं स्कतरां लुप्तमेव। अथावदानधर्मेण गृहीत्वा मेक्षणेन तु। चर्वी कुर्गिद्वयं हुत्वा सो
मायेति द्वयेन तु॥८९॥ स्वाहाकारेण होमश्चेदुपवीतिभवेदिह। मेक्षणेनानुप्रहृत्यं तं मंत्रयोर्व्यत्ययस्तथा
॥९०॥ अस्याग्नौ मेक्षणं चापो निनयेत् पितृतीर्थत इति॥ अस्यार्थः॥ अथ इध्माहोमानंतरं अग्नौ जुहोति। अ
थावदानधर्मेणोपस्तरणपूर्वकं। तच्चेवां मेक्षणं वामहस्तेन गृहीत्वा दक्षिणहस्तस्थितेन स्रुवेणाज्यमा
दायतास्मिन्मेक्षणे न उपस्तृत्य तेनैव मेक्षणेन व स्थालीपाकं मध्यादिदेशाद्विवारं गृहीत्वा पुनर्वाम मेक्षणं सं
स्थाप्य पात्रस्थमभिघार्य मेक्षणस्थं चाभिघार्य पुनर्मेक्षणं दक्षिणेन गृहीत्वा ॐ सोमाय पितृमते स्वधा
नम इति हुत्वा पुनस्तथैव मेक्षणे उपस्तरणादि कृत्वा ॐ अग्नये कव्यवाहनाय स्वधा नम इति द्वितीया
स्वाहा माहुतिं जुहुयात्। अत्र ओंकारेण होमपक्षे यज्ञोपवीती भूत्वा मंत्रयोर्व्यत्ययं कृत्वा जुहुयादिति। तद्यथा। अ
ग्नये कव्यवाहनाय स्वाहा। सोमाय पितृमते स्वाहा। एवं पक्षद्वये सूत्रोक्तं स्पष्टीकं। स्वाहाकारपक्षेस
व्येन होमः स्वधा नमः शब्दयोः स्थाने स्वाहाकारो विधीयते॥ इदमत्र गृह्यं। स्वाहाकारेण वाग्निं पूर्वं यज्ञोप
वीती मेक्षणप्रहरणं तमुपवीत्येन भवत्रीति तथा मंत्रव्यत्ययः। सव्यापसव्ययोरुभयोरपि पक्षयोरग्नौ ११३
मेक्षणप्रहरणमुपवीत्येव। अग्नौ मेक्षणं प्रास्य निक्षिप्य रेखायां पितृतीर्थतः अपो निनयेत् शौनकः॥

ततोवदानधर्मेण गृहीत्वा मेक्षणे चरुं। सोमायेत्यादिमंत्रेण नमोंतेनाहुतिं पुरः। एकां हुत्वाग्नये कव्यवाहनाये
त्यपक्रमं। मंत्रेन नमोंते मुच्चार्य द्वितीयामाहुतिं ततः। आचरेन्मेक्षणेनैव यद्वा मंत्रयोर्द्वयोः। इमं स्वाहांतमुक्तोत्क्रा
क्रमेण जुहुयाच्चरुं। स्वाहाकारेण होमे तु भवेद्यज्ञोपवीतवान्। तत्र प्रागग्नये हुत्वा पश्चात्सोमाय भाहूयतां। अग्नौ
यज्ञोपवीत्येव प्रक्षिपेन्मेक्षणं ततः इति॥ लेखायां पिंडदेशेषु शुंधंतामिति तु त्रिभिः॥९३॥ तत्र पिंडत्रयं दद्यात्परा
चीनेन पाणिना। पित्रादित्रिभ्य एतत्ते विष्णो ये चेति मंत्रतः॥९२॥ नचेन्नामानि जानीयात्ततेत्यादि त्रयेक्रमादि
ति। अस्यार्थः। स्फ्येन कुशेन वा उल्लिखितायां लेखायां पिंडदेशेषु त्रिषु पितृतीर्थतः। शुंधंतामित्यादि त्रिभिर्मं
त्रैः शुंधंतां पितरः शुंधंतां पितामहाः शुंधंतां प्रपितामहा इति अपः प्रक्षिपेत्। अंभोनिनयनानंतरं वर्हिरा
छन्नरेखायां पिंडत्रयं दद्यात्॥ पराचीनेन पाणिना उत्तानपाणिनेत्यर्थः। केभ्यः पिंडदानं। तत्सापेक्षायां
पित्रादिभ्यस्त्रिभ्य इति विधीयते। तत्र केन मंत्रेणेत्याह। ॐ एतत्ते ताम च इशर्मन्ये च त्वामत्रानु इति मंत्रे
ण। यस्य नाम न ज्ञायते तत्र तेति तस्मै दद्यादिति। अत्र भगवान्। कृतशिष्टाश्चरोरन्नं कंचिद्दुग्धस्य भाजने।
तेन पिंडत्रयं कृत्वा पितृभ्यो निर्वपेत्क्रमात्। तत्र प्रथममासिता पूर्वदक्षिणादुदङ्मुखः। स्फ्येनोल्लिखितले
खायामादिमध्यांतदेशतः। शुंधंतां पितरः पूर्वं मंत्रत्रयमनुक्रमात्। उच्चार्योच्चार्य सलिलं किंचित्किंचिन्निषि
च्यतत्। तेषु स्थानेषु पित्रादेः पिंडं दद्याद्यथाक्रममिति॥ स्वाहांतेनोक्तमंत्रेण पिंडो जीवायहृदयं नाशः॥९३॥ नष्ट
नात्र पितरद्मातिनानुमंत्र्यतु॥ अप्रदक्षिणमावृत्य प्राचीदकपाणां नियम्य चा॥९४॥ अभ्योवृत्यानुमंत्र्यामी

Indira Gandhi National
Centre for the Arts

मदंतेत्यादिमंत्रतः। चरुशेषमथाघ्राय निनयेत्सितृहूर्वेकं जलमिति॥९५॥ अस्यार्थः॥ पिताम
११४ हप्रपितामहयोर्मध्ये योजीवति तदुद्देशेन उक्तमंत्रेण स्वाहांतेनाग्नौ जुहोति। एवं पिंडत्रयं दत्वा
अत्र पितर इति मंत्रेण तान्पिंडाननुमंत्र्य अपदक्षिणमावृत्य उदङ्मुखो भूत्वा उपविश्य आचम्य।
आदावंते तथाचार्यां विप्राणां पादशोधने विकिरे पिंडदाने च षड्डिराचमनं स्मृतमिति। पिंडदा
नानंतरमाचमनं कर्तव्यं। तदुपवीतिना कार्यं। अत आचम्य यथाशक्ति प्राणान्निरुध्य च। अयं तु मं
त्रः। अनुच्छ्वासेनैव च पठितव्यो भवति। उक्तं च। कल्पलतायां॥ यावदेवोच्चरेन्मंत्रं तावत्प्राणान्निरोध
येदिति। मंत्रमध्ये श्वासोत्सर्गो न कार्य इत्यर्थः। मनुः। आचम्योदक्परावृत्य त्रिराचम्य शनैः शनि
रिति। पुनरुत्थे वा पार्श्वे अभ्यावृत्य पिंडसन्मुखो भूत्वा पुनः पिंडानमीमदंतेति मंत्रेणानुमंत्रयेद
दिति। ततः पिंडपात्रस्थं चरुमवघ्राय तन्निरस्य तस्मिन्पात्रे हस्तं प्रक्षाल्य पूर्ववदेव शुंधंतामिति त्रि
भिर्मंत्रैः त्रिषु पिंडेषु जलं पितृतीर्थेन सिंचेत्। तथा च शौनकः। अथैषामत्र पितर इत्याद्येनानुमंत्र
णं। मंत्रेण कुर्यात्पिंडानां त्रयाणां तत्र ततः सकृत्। ततः सव्येन पार्श्वेन व्यावृत्योदङ्मुखो भवेत्॥ निय ११४
म्य वायुमासित्वा कंचित्कालं यथाबलं। ततस्तेनैव पार्श्वेन पर्यावृत्य पुनः पितॄन्। अमीमदंतेत्याद्येन

मंत्रेणाप्यनुमंत्र्य तान्। पिंडशेषाच्चरोः किंचिद्दायाघ्राय तत्यजेत्। प्रक्षाल्य हस्तं शुंधंतामित्याद्यैरेव पूर्वव
त्। मंत्रैः पिंडेषु पानीयं निषिंचेत्सुतृतीयतः। अत्र व्याघ्रस्मृतौ विशेषः॥ अद्भिः प्रक्षाल्य तत्पात्रं प्रक्षा
लयित्वा तच्चतेनैवोदकेन अन्नमिश्रणेनैरेव मंत्रैः पितृतीर्थेन सेचनं कृत्वा तत्पात्रं दक्षिणभागे अधो
मुखं कर्तव्यं। एतद्व्याख्यानांतरविषयमिति केचिदाहुः। तथा पिगुणोपसंहारन्यायेन अस्मदा
स्त्रेपि एतद्ग्राह्यं तु युक्तं भवति। गुणोपसंहारो नाम यत्र स्वशाखोक्तकर्मसिद्धिर्भवति। अनुच
शास्त्रांतरोक्तः कश्चन गुणातिशयो भवति। सो यं गुणोपसंहार इति॥ अभ्यंक्ष्वांक्ष्वेति नामादि
मंत्राभ्यां तैलमंजनं। दद्यादिशामथैतद्व इति पिंडे ब्रतः परं॥९६॥ नमो व इत्यकृपरण्य यमनान्वेतितृ
चेन च। परेतनेति मंत्रेण पिंडास्तान्वै प्रवाहयेत्॥९७॥ ओं पामनोतिकं गत्वा जपेद्ययेतमित्यृचं। पद
तां गरिक्षमित्येतां तत्स्थ एव जपेदृचं॥९८॥ गार्हपत्यपदस्यांते लोपन्यायविदो विदुरिति॥ अस्यार्थः॥
ततउदकसेचनानंतरं पित्रादीनां संबुध्यंतं सगोत्रं नामोच्चार्य अभ्यंक्ष्व इति मंत्रेण प्रतिपिंडमंजनं द
द्यात्॥ स्मृत्यंतरेपि। गृहीत्वा दर्भपिंजूलैस्त्रिभिः कुर्याद्यथाविधि। अपसव्यं पितृभ्यस्तु दद्यादुन्नम
मंजनं॥ तैलं कृष्णतिलेभ्यश्च यत्नात्सपरिरक्षितं। तैलमंत्रेण दातव्यं पिंडस्याभ्यंजनं हितं दिति॥

Indira Gandhi National
Centre for the Arts

अत्रांजनस्यञ्जाप्यस्यमाप्तत्वं बादिविषयं। अस्मच्छाखायां कारिकायामत्रैव। अभ्यंक्ष्वांस्वेतिनामादि
११५ मंत्राभ्यां तैलमंजनमिति। अत्रैवोक्तत्वात्। अभ्यंजनं प्रथमं भवति। ततोंजनमिति। अभ्यंजनानंतरं पि
ण्डेषु एतद इत्यादिमंत्रेण दद्यात्। यत्तु ब्रह्मपुराणे। दद्यात्क्रमेण वासांसि श्वेतवस्त्रस्य वा दशामिति।
श्रा तच्छाखांतरविषयं। अस्मत्सूत्रे तु। आचार्येण कंठोक्त्या दशादानस्यैव निहितत्वात्। उक्तं च। दशामूर्णा
स्तुकां इति मेषीलोमनिर्मितसूत्रैकदेशं स्वलोमेति प्रसिद्धं। पराशरः॥ पंचाशद्वर्षिको यस्तु दद्या
ल्लोमस्वकं शुभं। तद्वक्ष्यं प्रदेयं स्याद्विधिसंपूर्णता कृता इति। सर्वत्र उक्तमंत्रेणैव द्रष्टव्यं। अत्र सूत्रां
तरे। गंधपुष्पनैवेद्यानैरुपचारैः पिंडानर्चयेदित्याद्युः। उक्तं संग्रहे। दशां दत्वाथ पिंडेषु गंधपुष्पैस्स
मर्चयेत्। धूपं दीपं च नैवेद्यं विधिसंपूर्णता कृता इति। ततः नमो वः पितर इत्यादिकैर्मंत्रैः पिंडानां सं
मुखस्थित्वा मनोन्वेति ऋचा उपस्थानं कुर्यात्। ततः परेतनेत्यादिमंत्रेण तान्पिंडान्प्रवाहयेत् ज्वाल
येदित्यर्थः। पिंडचालनानंतरमोपासनाग्निसमीपे गत्वा तत्रैवोक्तमंत्रद्वयं जपेदिति। श्रौते तु द
क्षिणाग्निविहिते पिंडपितृयज्ञे गार्हपत्यस्य विद्यमानत्वात्। यथापाठमेव मंत्रो गृह्यते। अ ११५
त्र तु गार्हपत्यस्याग्नेरभावात्। गार्हपत्यपदं विनैव स एव मंत्रः पठितव्यो भवति। न्यायविदो मी

मांसाशास्त्रकुशला इत्यर्थः। अत्र भगवान्। ततः पिंडेषु तैलं च दद्याद्दर्भेण तत्र तु। पित्रादिनामा
न्यत्रादौ संबुध्यांतान्यतः परं। अभ्यंक्ष्वेति वदन्तैलं दद्याद्दर्भैरनुक्रमात्। यथा महादेवशर्मन्नभ्यं
क्ष्वेति तथांजनं। अंक्ष्वेति च वदन्दद्यात्स्रुवेण पितृतीर्थतः। एतद्वः पितरो वास इत्याद्यं मंत्रमीर
यन्। दद्यात्पिंडेषु वस्त्रांतं सूत्रच्छेदमथापि वा। गुणसूत्रं कुशकूलं दर्भेण पितृतीर्थतः। दाता
पदि तु पिंडानां पंचाशद्वर्षनाधिकः। तदात्मीयकोष्ठस्य लोम वा सोर्थमावपेत्। अथैनानुप
तिष्ठेत पितॄन्पिंडनिवासिनः। मंत्रैर्नमो व इत्याद्यैर्मनोन्वाहिति त्र्युचेन च। उद्वासयेदथ पितॄन्पिं
डस्थान्सकलानपि। उक्त्वा परेतन ऋचं याम्यां पिंडान्प्रवाहयेत्॥ अग्नेत मध्यदंताभ्यां दक्षि
णाग्निमनुव्रजेदिति॥ वीरं मे दत्त मंत्रेण पिंडमादाय मध्यमं॥ ९९॥ पिंडं तं प्राशयेत्पत्नीमाध
त्तेत्यादिमंत्रतः। अप्सु वाग्नौ प्रणीतायां वितरौ प्रक्षिपेदथ॥ १००॥ अथेह सादितानां च नवयज्ञा
युधानि तु। द्वे द्वे एवोत्सृजेत्तानि शिष्टं साधं तृणेन तु॥ १॥ अस्यार्थः॥ ततो वीरं मे दत्त पितर इति मं
त्रेण मध्यमपिंडं गृहीत्वा आधत्तेत्यादिमंत्रेण पत्नीं प्राशयेदिति। एवं मध्यमपिंडविनियोगानं
तरं प्रथमतृतीयावितरौ तु अप्सु प्रक्षिपेत्। अप्सु अतिप्रणीतेग्नौ वा निक्षिपेत्। अत्र पिंडपितृयज्ञे आ

Indira Gandhi National Centre for the Arts

सादितानां स्वल्यादीनां द्वादशानां मध्ये वृद्धिरिध्ममेक्षणेषु प्रतिपत्तिंगतेषु विनियोगं गतेषु अवशि
११६ ष्टानां नवसंख्याकानां तेषामस्मिन्काले उद्वासनं द्वयोर्द्वयोर्भवति। द्वयोर्द्वयोरुद्वासने अवशिष्टं
विषमं कुशान् तृणं गृहीत्वा तद्युग्मलक्षणं युग्मत्वं साधयित्वा तदप्युद्वासयेदिति। शौनकः। वीरं
मे दत्त पितरो गृहीत्वा प्राशयेद्यधुं। प्रक्षिपेदिति रावप्सु दणीतो वोल्मुकेन ले। वयस्य चास्तु न विष:स
प्राश्नीयादुभाविमौ। अचिकित्स्यमहारोगग्रस्तो वा म... देमौ। रोगान्मुक्तिर्मे तिवास्य भवेदन्यनरा
गतिः। उपयुक्तावशिष्टानि पात्राणि द्वंद्वमुत्सृजेत्। द्वंद्व तिरिक्तमेकं वेत्तत्तृणेन सहोत्सृजेदिति।
॥ इति पिंडपितृयज्ञः॥ अथ पार्वणश्राद्धविधिः॥ सर्वेषां श्राद्धभेदानां दर्शश्राद्धप्रकृतिकत्वात्तदी
तत्प्रकारो निरूप्यते। दर्शश्राद्धप्रकृतिकत्वं तु श्राद्धं पार्वणवत्कुर्यादित्यभिहितत्वात्। दर्शश्राद्धस्य
पार्वणसंज्ञाकनमित्यपेक्षायां ज्ञातानपोके लिख्यते। दर्शश्राद्धं तु यत्प्रोक्तं पार्वणं तत्प्रकीर्तितमिति।
अथ कारिका॥ कुर्वीत पार्वणश्राद्धं दर्शेन दभिधीयते। कामयोगेन वान्यस्यां तिथावेत्य पुरे त्रुव
न्॥ २॥ अस्यार्थः॥ अस्य पार्वणश्राद्धस्य सर्वश्राद्धानां प्रकृतिरूपत्वात्तस्य स्वरूपं निगद्यते। तस्य ११६
णि कालमाह। दर्शे अमायां तदाभिधीयते पर्वभवं पार्वणमिति यथाप्येकस्मिन्नेव पर्वणि अमायां

भवतिनोभयोः कुतः। शौनकः। श्राद्धस्य पार्वणस्यायं प्रयोगः समुदीर्यते। तत्रानाहितवह्नी
नां पार्वणं पूर्वमुच्यते। प्रतिपत्संचदर्श्योर्यः संधिः सर्वतिकथ्यते। तत्संबंधात्पंचदशी कृत्वा पे
र्वेतिकथ्यते। सामाने पिच पर्वत्वे पंचदश्योर्द्वयोरपि॥ यात्वेतयोरमावास्या श्राद्धकालीय
मिष्यत इति। प्रकृते तु अपरे कामना विशेषादपि तिथ्यंतरे पि पार्वणमाहुः॥ किंच। अ
र्घ्यत्रयं साध्यं त्रिपुरुषोद्देशेन क्रियमाणं रूध्यात्तत्पार्वणमित्यभिधीयते शास्त्रवद्भिः अ
थ निमंत्रणं योग्य ब्राह्मण कथन पूर्वकं निमंत्रण प्रकारमाह। ब्राह्मणान्वेदसंपन्नान्
दांतान्शांतानलोलुपान्। अक्रोधनान्नरोगांस्तपस्वि कुलनिस्पृहान्॥ ३॥ विहितानां
मनुष्याणां निषिद्धानां च वर्जकान्। एवं विधद्विजाभावे समकेन गुणेन वा॥ ४॥ युक्तान्निमं
वयी त्रैतार्यान्न सद्गुणविवर्जितमिति॥ अस्यार्थः। एवंविधान्ब्राह्मणान्निमंत्रयीत निमंत्रये
दित्यर्थः। छंदसायं प्रयोगः। अन्यथा लिङ्परस्मैपदे निमंत्रयेदिति स्यात्। उक्तलक्षणद्वि
जाभावे श्राद्धं न कार्यमिति शंकनीयं। एकेन वा महता गुणेन विशिष्टान्ब्राह्मणान्निमंत्र
येदित्याह। अविद्यमाने पि गुणातिशये असद्गुणरहितं अन्वेषणीयं। असद्गुणवतां अप

Indira Gandhi National
Centre for the Arts

स्यस्तम्य। ग्निप्रान्ययोरिमानिति। तत्र ब्राह्मणसंख्यामाहाचार्यः। द्वौ दैवे पितृकार्ये त्री
११८ नेकैकमुभयत्र वेति। वृद्धवसिष्ठोपि। श्राद्धद्वयं करिष्यंस्तु दशावा चतुरोपि वा। त्रीन्
वा निमंत्रयेद्विप्रानेकं वा ब्रह्मवादिनमिति। तदनेकब्राह्मणाभावविषयं। बृहस्प
तिः। यद्येकं भोजयेच्छ्राद्धे छंदोगं तत्र भोजयेत्। ऋचो यजूंषि सामानि त्रितयं तत्र वि
द्यते। सायणीये। ऋचा तु तृप्यतु पिता यजुषा तु पितामहः। पितुः पितामहः साम्ना छं
दोगेभ्यधिकस्ततइति। पात्रविषयेअनुकल्पमाहाचार्यः। सत्पात्राणामलाभेतु पात्र
भूतांस्तु बंधवान्। कृतोपिकारिणश्चापि श्राद्धे भोक्तुमर्हति। मातुलो भागिनेयश्च
जामाता तत्सुतस्तथा। सुहृदः श्वशुरः स्यालः संबंधीज्ञातिरेव च। नियता दोषनिर्मु
क्ता गुणैश्चोक्तैः समन्विताः। अनुकल्पे च नीयास्तु बांधवश्चोपकारिण इति। निमंत्रण
समये कर्तावेवं वदेत्। भवद्भिः श्राद्धकार्ये नः सपाद्यच प्रसीदथ। अभ्यर्थ्य नियता विप्रा ११८
न्कर्ता चैव पुनः पुनः। सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः। भवितव्यं भवद्भि

र्नः श्वो भूते श्राद्धकर्मणि। एवं निमंत्र्य नियमान् श्रावयेत्पैतृकान्बुधः। अक्रोधनैः शौ
चपरैः सततं ब्रह्मचारिभिः। भवितव्यं भवद्भिश्च मया च श्राद्धकर्मणि। अतः परं कारि
कार्थः। भोक्तुर्भोजयितुश्चैवेति एवं निमंत्रितानां ब्राह्मणानां कर्तुश्च निमंत्रणानंतरं ब्र
ह्मचर्यं विहितं। तथा च मनुः। निमंत्रितो द्विजः पित्र्ये नियतात्मा भवेत्सदा। न च छंदां
स्यधीयीत तस्य श्राद्धं भवेदिति। ततः कर्ता नियमाश्चोक्तान्नियमान्पालयन् रात्रिंनी
त्वा परेद्युः संगवे स्नात्वा स्वयं च कृतमध्याह्निकक्रियः सन् कर्म कुर्यात्। स्वयं तदेव क
थयति। कृत्वेध्माधानपर्यंतं पितृयज्ञं निमंत्रितान्। तान्स्नातान्कृतपच्छौचानाचांतानु
पवेशयेत्। द्विराचमंति ते विप्राः कर्त्रा प्रक्षालितांघ्रयः। द्वौ दैवे प्राङ्मुखौ पित्र्ये त्रीन्विप्रा
नुदगाननान्। ध्यायन्समेते पितर इति तानुपवेशयेत्॥८॥ अर्चयित्वोपविष्टांस्तु दैवेस्म
स्तुकमार्गत इति। अस्यार्थः। अत्र एकाग्निविषये पिंडपितृयज्ञस्य दर्शश्राद्धस्य च उभयोः

Indira Gandhi National
Centre for the Arts

सहैवानुष्ठानात्मकः प्रयोग इह कारिकायां निगद्यते। तथा सति श्राद्धकाले प्राप्ते ब्राह्मणा
११९ नूं समीपस्थान् कृत्वा इध्माहोमांतं पिंडपितृयज्ञपूर्वोक्तप्रकारेण करोति। अत्र संकल्पस्त्वे
वं करोति। पूर्वेति धिश्रवृणांतं कृत्वा पिंडपितृयज्ञं साहित्येन प्रतिज्ञातं दर्शश्राद्धं करि
ष्य इति प्रतिज्ञाय इध्माहोमांतं करोति। अनंतरं प्राचीनावीति श्राद्धारंभं च कुर्यात्। तत्र
स्मृत्यंतरोक्तं किंचिल्लिख्यते। तत्र बृहन्नारदः। निमंत्रितेषु विप्रेषु मिलितेषु द्विजोत्त
मः। प्राय श्चित्तविशुद्धात्मा तेभ्योनुज्ञां समाचरेत्। दद्याद्दैवं ब्रह्म दं अर्थं हिरण्यं कुश
मेव वा। श्राद्धार्थं समुपन्नानो विप्रान् भूयो निमंत्रयेत्। उभौ च विश्वेदेवार्थं पित्र्यर्थं त्री
न्यथाविधि। निमंत्रणं तु — पं कर्तव्यं। तेषेन द्वितीयामंत्रणं भूयो ग्रहणात्। तदुक्तमाप
स्तंबधर्मे। पूर्वेद्युः निमंत्रणमपरेद्युः द्वितीयमामंत्रणं तु विधायेति। ब्राह्मणानुज्ञानंत
रं यजमानकर्तव्यं प्रदर्श्यते। तथा च स्मृत्यर्थसारे। तिथिवारादिकं स्मृत्वा संकल्प्य च य ११९
थाविधि। प्राचीनावीतिना कार्यं सर्वं संकल्पनादिकं। तस्य संबंधकं ब्रूयान्नाम गोत्रेति

लान्वितं। वस्वादिरूपतां चापि स्वपितृणामनुक्रमादिति। निमंत्रितान् — तान् कृतपवो
चानां तानुपवेशयेत्। निमंत्रितान् नित्यनेन अपरेद्युः निमंत्रणद्वयं सूचितं। स्नाता
नित्यत्र स्नानं कर्तुं निवेदितं तैलोद्वर्तनादिकं निष्पन्नं ज्ञातव्यं। इतरथा स्नाता नित्यस्य
पदस्य वय्यर्थ्यं प्रसज्येत। कुतः सर्वेषां ब्राह्मणानां प्रातर्मध्याह्निकस्नानद्वयमंतरे
ण भोजनादिकार एव नास्तीति स्मृतिषूक्तं। श्राद्ध दिने ब्राह्मणानां तु अवश्यं यजमानेन
तैलोद्वर्तनादिना स्नानं कारयितव्यं। तथा च देवलः। तैलमुद्वर्तनं स्नानं पानीयं च पृ
थग्विधं। पात्रैरौदुंबरैर्दद्याद्वैश्वदैविकपूर्वकमिति। मार्कंडेयः। अथाह्नः षण्मुहूर्ते
षु गतेषु — तथान् द्विजान्। प्रत्येकं प्रेषयेत्प्रेष्यान्प्रदाया मलकोदकमिति। एतदा
मलककल्कप्रदानं प्रतिषिद्धतैलासु तिथिषु द्रष्टव्यं। स्वगृहे प्याहूय अलंकारपूर्वकं
स्नानं कारयित्वा तव्य मित्युक्तं संग्रहे। श्राद्धकाले समाहूतान् कुर्वीत तान् द्विजान्। श्म
श्रुकर्मशिरःस्नानसधूपाभ्यंजनांजनैरिति। तथैवात्रकृतपचोचानित्यत्र स्थापस्व

Indira Gandhi National Centre for the Arts

र्घ्यं णजनितदोषनिराकरणार्थं पादप्रक्षालनं स्वेन कार्यमेवं तथा पिकुशाक्षततिलयवर्चिते
१२० द्वारप्रदेशे विश्वस्फक्तप्रकारेण गोमयनिर्मिते मंडले अपरे वा कुशाक्षततिलपुष्पा
दकैः यथासंभवं समेत्य यजमानकर्तृकं ब्राह्मणपादप्रक्षालनमभिहितं। शुद्धपादत्वेप्यत्रनि
यमेनपक्षेप्येवं कार्यमित्यर्थः। तत्र मंडलकरप्रकारं स्थानप्रक्षालप्रकारमाह। शंभुः। संमा
र्जितोपलिप्ते तु द्वारि कुर्वीत मंडले। उदक्प्रवणमुदीच्यं स्याद्दक्षिणं दक्षिणाप्लवं। उत्तरे क्षत
संयुक्ता दूर्वाद्यान्विन्यसेत्कुशान्। दक्षिणे दक्षिणाग्रांस्तु सतिलान्विन्यसेद्द्विजः। मंडलप्रमा
णमाह संग्रहे। प्रादेशमात्रं देवानां उत्तरे चतुरस्रकं। वितस्तिमात्रं पित्र्ये तु मंडले वर्तुलं भवे
त्। यज्ञोपवीती देवार्थं पित्र्यर्थं चापसव्यतः। अंतरं तु प्रकुर्वीत तयोर्मध्ये षडंगुलमितित
त्र देवपूर्वं निमंत्रितक्रमेण पादप्रक्षालनं कार्यं। तत्राचार्यः स्मृतिब्रह्मनिरुक्तयोः। पादंचे
वनथाचार्घ्यं देव आदौ प्रयोजयेत्। श्री ओदेवीनिकथनपूर्वकमाचमनमाह। मंडलस्योत्त
रेभागे विप्रस्याचमनक्रिया। अमृतं स पिबेत्तोयं रुधिरं दक्षिणं तथेति। तथाचमनवारद्व १२०
यं कर्तव्यमिति। द्विराचमंतिते विप्रा इति। किंच। तेन भोजनार्थं श्राद्धांगं वा द्विराचमेयुरि

तिरत्तिकारः। यजमानेन प्रक्षालितपादान् एवं विधानतानुपवेशयेदिति। तत्रोपवेशनप्रका
रमाह। द्वौ दैवे इति। दैवे विश्वेदेवस्थाने द्वौ प्राङ्मुखौ पितृस्थाने उदङ्मुखान्त्रीन् एते समपि विप्रान्
तर इति ध्यायन्नुपवेशयेत्। तानागतान्द्विजानुपवेशयेदासने घितिविशेषः। चद्वि
कार्यो। दर्भपाणिर्द्विराचम्य लब्धवासा जितेंद्रियः। परिश्रितेशुचौ देशे गोमयेनोपलिप्य
ते। दक्षिणाप्रवणे सम्यगाचांतान्प्रायतान्शुची। आसनेषु च सर्वेषु विविक्तेषूपवेशयेदिति।
अस्मद्व्याख्यायां देवार्चनप्रकारो नोक्त इति कृत्वा स्मृत्युक्तमार्गेण कार्य इति। स्वयमेवका
रिकाकार आह। अर्चयित्वोपविष्टान्विति। विश्वेदेवस्थाने उपविष्टान् विप्रान् स्मृत्युक्तप्रकारे
णार्चयित्वा पित्रर्चनं कुर्यादिति। अथ स्मृत्युक्तार्चनप्रकारः प्रदर्श्यते कात्यायनः। सव्ये
नैवासनं धृत्वा दक्षिणे दक्षिणं करं। ओं भूर्भुवः स्वरित्युक्ता आसने ह्युपवेशयेत्। समा
ध्वमिति चैवोक्ता दक्षिणं जानु संस्पृशन्। आस्यतामिति तान्ब्रूयादासनं संस्पृशन्नपि।
स्पृष्ट्वैतरं। पृथक्पृथक्कृत्वासने घृततिलतैलेन दीपकाः। अविच्छिन्ना स्यथा देयाः सेनु र
क्षाध्वेते द्विजैः। स्कंदपुराणेपि। स्थाप्याः प्रतिद्विजं दीपाः श्वेतसूत्रजवर्तिकाः। अन्येनम

Indira Gandhi National
Centre for the Arts

हिषेणापि आज्येन कृततेजसा। अथ संकल्प्यप्रकारमाहाचार्यः। त्रोण संयमनं कृत्वा
पितृपंजरमारभेत्॥ निघ्नन्तिलान्कुशांस्तावल्लक्षिपेन्मंत्रमुच्चरन्। स चायं मंत्रः। अ
१२१ ग्निष्वात्ता बर्हिषद आज्यपाः सोमपास्तथा। रक्षां लिलकुर्वर देशान्सर्वेन श्रमयस्तथा। संग्रहे
पि। अग्निष्वात्ता इमं मंत्रं पठंत्सर्वा दिशु क्रमात्। सिद्धार्थकांस्तिलान्दर्भान्विकिरे च्छ्राद्धभू
मिषु। पितृपंजरमित्याहुरेवं विकिरणं द्वियते। संग्रहे। उभौ हस्तौ समौ कृत्वा जानुनोरं
तरे स्थितौ। नमस्कारांजलिः पृच्छेदुपविष्टान्द्विजोत्तमान्। श्राद्धं करिष्य इत्येव मनुज्ञातश्च
तेरथा। विधानं च परं कुर्याद्यथा गृह्यमनुक्रमात्। संग्रहे। इदं करिष्य इत्युक्त्वा तिलानप
हता इति। विकिरेज्जलसंयुक्तान्द्वारदेशे प्रसव्यवत्। स चायं मंत्रः। ॐ अपहता असु
रा रक्षांसि वेदिषद इति पृथिवीमनु। अन्यत्रेतो गच्छंतु यत्रेषां गतं मनः। इति मंत्रेण द्वार
देशादि सर्वत्र तिलान्विकीर्येति। स्मृत्यर्थसारे। अपहता इति सर्वत्र तिलान्विकीर्य दी १२१
रता मित्यृचा प्रोक्षेत्। श्राद्धभूमिमिति शेषः। पाराशरः। अपवित्रः पवित्रो वा सर्वाव

स्थां गतोपि वा। यः स्मरेत्पुंडरीकाक्षं स बाह्याभ्यंतरः शुचिरिति। श्राद्धभूमौ गयां ध्यात्वे
ति पठित्वा देवविप्रपूजनमारभेत्। तत्र प्रचेताः। देवानां ऋजवो दर्भाः प्रदातव्याः पृथक्पृ
थक्। धर्मोसीत्यृथ मंत्रेण गृह्णीयुस्ते तु तान्कुशान्। तत्र मंत्रः। धर्मोसि विराजा प्रतिष्ठित
इत्यनेन यजुषा वैश्वदेविकब्राह्मणा एव गृह्णीयुः। वैश्वदेवार्चने। नारायणः। उदङ्मुखो वा
ये देवा उपवीतीसमाहितः। निपात्य दक्षिणं जानु विपरीतं तु पैतृके। तत्र क्रममाह या
ज्ञवल्क्यः। पाणिप्रक्षालनं दत्वा विष्टरार्थं कुशानपि। प्रथमतः विप्रहस्ते उदकं दत्वा
आसनार्थं कुशानपि दद्यादित्यर्थः। संग्रहे। ऋजून्दर्भान्समादाय सजलान्सयवान्
क्षतान्। उदग्गयानितिदद्याद्दक्षिणपार्श्वतः। तौ दैवे च विप्रो उदगग्रेषु उपविशन्निति
जयंतः। ततः क्षणविधानमुक्तं गालवेन। दर्भान्नादाय हस्ताभ्यां गृहीत्वा दक्षिणे करे।
दैवे क्षणः क्रियतां निरंगुष्ठं करं ततः। गृहीत्वा प्रेष मुक्त्वा तु क्षणं कृत्वा ततो द्विजाः। ॐ
तथेति प्रतिब्रूयुस्ते प्राप्नोति भवानिति। कर्ता ब्रूयात्ततो विप्रः प्राप्नुवानीति वै वदन्। पा

Indira Gandhi National
Centre for the Arts

राशरः। यावदस्मान्नतो देवान्विज्ञाप्यावाहनं प्रति। ततः सव्यं करेन्यस्य वि प्रदक्षिणजानुनि॥
१०२ देवानावाहयिष्येहमिति वाचमुदीरयेत्। गोभिलः। ॐकारं प्रथमं कृत्वा मंत्रेणावाहयेत्ततो प्रश्र
भवेदिति। याज्ञवल्क्यः। आवाहयेदनुज्ञातो विश्वेदेवास इत्यृचा। शंखः। सयवं पुष्पमा
दाय चरणादि शिरोंतकं। अर्चतेदर्चनं कुर्यादंतरं चोदकं तथेति। अर्चनप्रकारः स्मृत्यंतरे।
पाद्याचारभ्य पादांतं दक्षिणांगाच्च मूर्धनि। देवानामर्चनं सव्यं मूर्धादि पितृषु स्मृतमिति।
अस्यायमर्थः। पाददेशाद्दक्षिणजानुनि दक्षिणांसे सव्यांसे शिरसि च क्रमेण यवपुष्पैर
र्चयेत्। अथ विश्वेदेवाधिष्ठितान् विप्रान् ध्यात्वा विश्वान्देवानअनंतरं। विश्वेदेवाः शृणुतेमं
गं छत्त्विय प्यथा परः। अथार्घ्यपात्रविधिः॥ अष्टांगुलं भवेत्पात्रं पितृणां राजतं शुभं। द
शांगुलं तु देवानां सौवर्णं यत्र चोदितं। अलाभे यथासंभवं यज्ञियवृक्षजानि पलाशपत्र
पुटादीनि वा अर्घ्यपात्राणि भवंतीति संग्रहकारः। बैजवापः। राजतानि प्रशस्तानि पित्र्ये १२२
हेमानि दैविके। अपि वा ताम्रपात्राणि पैत्रे दैवे च कर्मणीति। तत्र आसादनप्रकारः॥

स्मृत्यंतरे। अथ दर्भान्समास्तीर्य प्रागग्रान्सयवान्भुवि। स्थापयेदर्घ्यपात्रे द्वे न्युब्जे तत्र कु
शोपरि। द्वे द्वे पवित्रे विधिवत्पात्रयोस्तु परिक्षिपेत्। तूष्णीं प्रोक्ष्याम्भसा पात्रे कुर्यादू
र्ध्वमुखे ततः। पूरयेत्पात्रयुग्मं तु पवित्रांतर्हितं च तत्। चतुर्विंशतिमतेपि। द्वे द्वे पवि
त्रे देवानां पात्रे कृत्वा प्रक्षिपेत्। तत्र पवित्रकरणमाह याज्ञवल्क्यः। पवित्रे कारयेद्द्वे
द्वे पवित्रे स्थ इति मंत्रतः। प्रागग्रके कुशाच्छिन्ने कोशे प्रादेशसंमिते इति। कुशाच्छिन्नकुश
मंतर्धाय पवित्रे स्थ इति मंत्रेण अंगुष्ठांगुलिपर्वभिश्छित्वा पात्रयोर्निक्षिपेत्। अपां
क्षेपणे मंत्रमाह याज्ञवल्क्यः। शन्नो दिव्या अपः क्षिप्त्वा यवोसीति यवांस्तथेति संग्रहे॥
गंधपुष्पाणि तूष्णीं तु प्रक्षिपेत्पात्रयोस्ततः। स्मृत्यर्थसारे। गंधपुष्पाणि क्षिप्त्वा स्वाहार्घ्यं
इति निवेद्य अर्घ्यपात्रस्थितं पवित्रं विप्रहस्ते दद्यात्। आचार्यः। प्रागग्रे दक्षिणे पाणौ
कुर्वीत स्थाप्य वार्चयेदिति। नारायणः। दत्वा हस्ते पवित्रं तु कृत्वाप्यर्घ्यं च पादतः। आरभ्य
यवपुष्पैः स्क मस्तकं तं च पूर्ववत्। ततोर्घ्यदानं। ब्रह्मपुराणे। ततश्च वाम हस्तेन गृही

Indira Gandhi National Centre for the Arts

त्वा वमसा नक्रमात् । ततोयं दक्षिणे कृत्वा देवतीर्थेन दापयेत् ॥ यादिव्या इति मंत्रेण हस्तेत्वर्घ्यं
१२३ विनिक्षिपेत् । केचिदर्घ्यपात्रेणैव दद्यमिति वदंति । तन्निर्मूलत्वादुपेक्षणीयं स्मृतिषु निषे
धस्मरणात् । अत एव गभस्तिः । अर्घ्यं च पिंडदानं च स्वस्य हस्ते न चैव च । गंधपुष्यादिकं
सर्वं पात्रेष्वेव न दापयेत् । एवमर्घ्यदानानंतरं गंधपुष्पधूपदीपाच्छादनादिभिर्देवविप्रपूजनं कृत्वा कृतांजलिर्भूत्वा आसनाद्युपचाराः सर्वे संपूर्णा भवंत्विति । तो प्रत्यक्षाअ
र्चनविधेः स्वर्चितमस्त्वन्यूनातिरिक्तः सर्वविधिर्वदस्तु । यस्य स्मृत्या च नामोक्त्या तपोय
ज्ञक्रियादिषु । न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतं । इत्यकालपुष्पदत्तजया पित्र्यार्च
नं करिष्य इति संकल्प्य पितृसमीपउपविश्य आग्नेयीमुखः पितृकर्म कुर्यात् । ये पक्षाः
कथिताः पिंडयज्ञे जीवमृतान्प्रति ॥ ९ ॥ आद्धेपि वेदितव्यास्ते पक्षा इत्याह वृत्तिकृत् । प्रा
चीनावीत्यपोदद्यात्पितृकर्मा प्रदक्षिणमिति । १० ॥ अस्यार्थः । जीवमृतानां पिंडनिपरण
मधिकृत्य ये पक्षा उक्तास्ते श्राद्धेपि ज्ञेयाः । इति वृत्तिकारः । तत्र मृतेभ्यः पिंडदानं जीवेभ्यः १२३
प्रत्यक्षेणैव तद्धस्ते पिंडं दद्यात् भक्षणं कुर्युरिति । अथ जीवोद्देशेन स्वाहांतमंत्रेण अ
ग्नौ होम इति वा इत्यादि पक्षाः पिंडपितृयज्ञोक्ताः इह श्राद्धेपि प्रत्येतव्या इति । अथ पित्रर्थं
ब्राह्मणपूजाविधिरुच्यते । तत्र प्रथमं विप्राणां हस्ते प्राचीनावीतिउदकं दद्यादिति । सर्वं पि
तृकर्म आप्रादक्षिण्येन भवति । तथैव सर्वं कर्म आग्नेयीमुखः कुर्यादिति वृत्तिकारः ॥
दर्भान्द्विगुणभुग्नांस्तान्दत्त्वैषामासनेषु तु । आपोदत्त्वार्थदर्भेषु पात्राण्यासादयेत्ततइति
॥ ११ ॥ अस्यार्थः । ततः हस्ते उदकदानानंतरं द्विगुणभुग्नान् दर्भांस्तेषां आसनेषु र्थाद्वाम
भागे ददाति । ते पि ब्राह्मणाः दक्षिणाग्रेषु दर्भेषु उपविशंतीति जयंतः । यम स्त्वासने नि
यममाह । आसने चासनं दद्याद्वामे वा दक्षिणेपि वा । पितृकर्मणि वामे चेद्दैवे कर्मणि
दक्षिणे । आसनानंतरमपि पुनर्विप्रहस्ते उदकं दत्त्वा आग्नेयीसंस्थान् दर्भानास्तीर्य अ
र्घ्यपात्रे सादयेदित्यर्थः । अस्मच्छाखायां पितृब्राह्मणसमीपे उपविश्य आग्नेयीमुखः पि
तृकर्म कुर्यात् । शाखांतरे तु दक्षिणमुखं पितृकर्म भवति । तत्र पितृयजने क्रमविधाय
कं श्रौतसूत्रं । अपः प्रदाय दर्भान्द्विगुणभुग्नानासनं प्रदापयेति । यदुक्तं कारिकायां तदस्मत्सू
त्रे वर्तत इति प्रदर्शितं । व्यासोपि । कुशास्तु पंचसप्ता स्तान् सतिलान्द्विगुणीकृतान् । व्याह

Indira Gandhi National
Centre for the Arts

णमपि तत्रैव ॥ अ[illegible]कृष्णमार्गे ॥ पितॄणां राजतं शुभं । दर्भाग्रलघुदेवानां सो भवेत्सात्रे
१२५ वर्णयत्र चोदितो । एक एव मन्त्रः पात्रत्रये तूष्णीमेव उदकं प्रक्षिप्य पात्रत्रयं सकृदेव शं
न्नो देवीरभिष्टय इत्यादिमंत्रेण अनुमंत्र्येत् अनुमंत्रणं नाम पात्रत्रयाणामपि सकृदेव
निरीक्षणं शक्यत्वात् । अनुमंत्रणानंतरं तिलोसीत्यादिमंत्रेण प्रतिपात्रं मंत्रावृत्त्या
तिलांश्च प्रक्षिपति । पितामह प्रपितामह पात्रयोः पितृशब्द ऊहो न कर्तव्य इति ।
तूष्णीमेव गंधपुष्पादिकं पात्रेषु निक्षिप्य निवेदयेत् । स्वधार्घ्या इत्यपो र्घ्यानु उ
पवीति निवेदयेत् ॥ अन्या अपः प्रदातव्या विप्रपाणिष्वतः परं ॥ १४ ॥ अर्घ्यस्पर्शो
षमादाय दक्षिणेन तु पाणिना । सव्यहस्तगृहीतेन निनयेत्पितृतीर्थतः ॥ १५ ॥ त्रि
भिः पितरिदं तेर्घ्यमिति पाणिषु अनुक्रमात् । दत्त्वा दत्त्वा निनी[illegible] । याहि व्या चानुमं
त्र्यतु ॥ १६ ॥ पितृपात्रे प्रसिद्ध्यार्थं शेषं पात्रद्वये स्थितं । अनस्ति[illegible]पुत्रकोसौ मुखमेको म१२५
कृते जलैः ॥ १७ ॥ न्य[illegible]ग्बिलं पितृपात्रं स्याद्दासमाप्तेर्न चालयेत् । उत्तानं वा तृनं येनापि हि

तं न च चालयेदिति ॥ १८ ॥ अस्यार्थः । एतावत्पर्यंतं अपसव्येन कृत्वा इदानीमुपवीती भूत्वा
स्वधार्घ्या इति मंत्रेण ता अर्घ्यस्था अपो निवेदयेदिति । निवेदनं नाम दानयोग्यकरणं
न तु दानं । दानस्य उत्तरत्र विधानदर्शनात् । अधुना उपवीतित्वादिति हेतुनिर्देशाद
त आरभ्या गंधमाल्यादिदाना यज्ञोपवीतिना कार्यमिति गृह्यनिर्दे: इतस्य सव्य
पाणेरंगुष्ठांतरेणार्घ्यं प्रयच्छेत् । उपवीतित्वाद्धेतोः पैत्रेनावृत्प्राचीनावीतिना भाव्य
मयं चोपवीतिस्यानेत्यर्थः । अथवा सव्यपाणेः शिष्टगर्हितत्वाद्दक्षिणपाणिं स
व्येन पाणिना गृहीत्वा दक्षिणेनैव पाणिना उपवीत्येवार्घ्यं प्रयच्छेत् । इति वृत्तिकृता
गृह्यव्याख्या लिखिता । अतः परमपां निवेदनानंतरं विप्रपाणिषु हस्तशुध्यर्थम
न्यज्जलं दत्त्वा सव्योपगृहीतेन पाणिना [illegible]षमर्घ्यमादाय पितृतीर्थेनः विप्रपाणि
षु निनयेत् । पितरिदं तेर्घ्यं पितामहेदं तेर्घ्यं प्रपितामहेदं तेर्घ्यमिति । अर्घ्यं दत्त्वा
विप्रहस्ताद्गलिता अपः पतनावसरे एवया दिव्या इति मंत्रेणानुमंत्रयेत् । शौनकः ।

Indira Gandhi National Centre for the Arts

१२६ या दिव्या आप इत्यादि मंत्रमुच्चार्य पेतृकी। अपोनुमंत्रयीतास्य पाणेः प्रांमु वती र्महीमि
ति। पाणेः सकाशान्महीं प्रानुवतीरपः अनुमंत्रयेदिति। न च भूमि प्राप्तं न च विप्रह
स्त स्थितं। नादृशमुदकं गलत्संदं तरात्स्थितं या दिव्या इति मंत्रेण अनुमंत्रयेदित्य
र्थः। अत्र केचित्तु विप्रहस्तगलितमुदकं भूमो पात्रांतरे कुर्वंतित च्छास्वांतर।
पयमत्र गंतव्यामिति। अथ पात्रद्वये स्थितमर्घ्य शेषं प्रथमपात्रे प्रक्षिप्य तेउ
के रेको कुर्तेः पुत्रकामः स्वमुखं सिंचेदिति। अनानंतरं नेवनयेत्। अत्र पात्रस्
न्यग्विलस्थापनमेको दिष्टविषयमिति केचित्सार्व णादौ तु उत्तानं प्रथमं प त
तीयपात्रेणाच्छादितं कर्तव्यमित्यपमेवपक्षः साधीयान्। अत्र स्थापनं देशस्त्। तृ
णां वामभाग इति कात्यायनादयः। अपरे आश्वलायनादयः पिंडार्थमास्तृते बा
नत्समीपे कुशेषु दक्षिणाग्रेषु स्थापयेत्। ब्राह्मणानामुत्तरतः भूमौ स्थापयेदिति॥ १२६
श्राद्धरत्नावल्यां। पितृपात्रं निधायाथ न्युब्जमुत्तरतोन्यसेत्॥ पितृभ्यः स्थानमसी

ति निधाय यथार्चयेद्विजान्। तथाप्यश्राद्धदेशे उत्तरे भूमे स्थापयेत्॥ पितृभ्यः स्थान
मसीति मंत्रेण दक्षिणाग्रेषु दर्भेषु तत्प्रथमपात्रं स्थापयेदिति संग्रहे। प्राचीनावीत्य
थेदानीं गंधमाल्यं सधूपकं। दीपं वस्त्रं यथाशक्ति ब्राह्मणेभ्यो ददात्यथेति॥१९॥ अस्यार्थः॥
अर्घ्यनिवेदनादारभ्य एतावत्पर्यंतं उपवीति भूत्वा कर्म कृतं। इदानीं गंधादिदानार्थं प्रा
चीनावीति भवेदिति। गंधादिदाने अस्मच्छाखायामाचार्येण मंत्रानोक्ताः तथावि कर्तुं
कृत्य मन्यतो ग्राह्यमिति। अन्यास्मृत्यंतरादपि ग्राह्यमिति युक्ताः। तत्र गंधदाने मार्कं
डेयः। चंदनागरुकर्पूरकुंकुमानि प्रदापयेत्। अश्वमेधमवाप्नोति पितॄणामनु
लेपने। एवं स्रग्धपुष्पकुसुमदीपदानुस्तथैव च सति विभवे प्रति ब्राह्मणंद
पदानं इति पूर्वमेवोक्तं। तथा वस्त्रदानमपि। कौशेयं क्षौमकार्पासं दुकूलमद
तं तथा। श्राद्धेष्वेतानि यो दद्यात्कामानाप्नोति पुष्कलानिति। कोशप्रभवं कौशेयं॥
क्षौमा अतसीतत्प्रभवं तत्क्षौमं दुकूलं पट्टोलकां अहतनमप्रक्षालितं शुक्लं वसनं। अ

Indira Gandhi National
Centre for the Arts

हतंतत्रनिर्मुक्तंशुक्लंवासः प्रशस्यते। दशाहीनं गलंकार्यं गावस्त्रेण सर्वदेति। वायवी
१२७ यपुराणे। वासो हि सर्वदैवत्यं सर्वदेवैरभिष्टुतं। तस्याभावे क्रिया न स्याद्यज्ञदानादि
काः क्वचित्। तस्माद्वस्त्राणि देयानि श्राद्धकाले विशेषतः। तद्दत्वेनान्यवाप्नोति यु
ज्ञदानतपांसि चेति। अत्र पादरक्षादानमपि प्रशस्तं। श्राद्धे उपानहौ दद्याद्ब्राह्मणे
भ्यः समाहितः। दिव्यं बलं भवेत्तस्य वा दानं भवेत्तथेति। तथात्र काले यज्ञोपवी
तदानमवश्यं बहुफलदं। उपवीतं तु यो दद्याच्छ्राद्धकाले तु धर्मवित्। पावनं स
र्वविप्राणां ब्राह्मणदानस्य तत्समम् इति। तस्याभावे यज्ञोपवीतदानं कार्यमवश्यं।
तथा च हेमाद्रौ ब्रह्मवैवर्ते। यज्ञोपवीतं दातव्यं वस्त्राभावे विजानतेति। उपानद्वि
षयेत्र प्रतिश्रवणमात्रं समर्पणं तु पश्चाद् एवेति। एतद्वस्त्रादिदानं सामर्थ्ये शास्त्रार्थ ठय
परिहारेणावश्यकं। विप्रार्चनानंतरमाचमनं कार्यं। यतः आह षड्भिः स्थलेष्वाच १२७
मनं श्रूयते तथाहि। आदावंते तथार्चायां विप्रपादस्य शोधने। विकिरे पिंडदाने च

षड्भिराचमनं स्मृतेति। आदौ विप्रपादप्रक्षालनात्पूर्वं तथा च प्रक्षालनानंतरं आचमनं आ
चायां मार्वीसमाप्तौ अनुज्ञानानंतरमाचमनं। एतावुत्सर्यं तं शास्त्रानुरहस्य क्रमे निरूप्य
नः कारिकार्थः प्रतिपादितेन तत्र संमतिमाह। एवं द्विजान्पूजयित्वा भोजनपात्रस्थापनार्थ
ब्राह्मणानां पुरतः पृथक्पृथक्मंडलं कुर्यात्। मंडलानि तु कार्याणि नीवारैः सक्तुभिः शु
भैः। गोरसांतकया वापि भस्मना गोमयेन वेति। स्मृत्यंतरे। चतुरस्रेषु पात्राणि मंडले
षु तु विन्यसेत्। योग्यानि भोजनार्थं तु सम्यक्प्रक्षाल्य धर्मवित्। अत्रिः। भोजने हेमरौप्या
णि दैवे पित्र्ये यथाक्रमं। पलाशाद्यन्यपात्राणि तदभावे तु कारयेत्। अत्र स्मृत्यंतरे। पंचा
शत्पलिकं कांस्यं ह्यधिकं भोजनाय वै। गृहस्थैः सदा कार्यमभावे हेमरौप्ययोः। ब्र
ह्मांडपुराणे। प्रक्षाल्य तानि पात्राणि द्विवारं पाणिनैव तु। घृतादिधारणार्थं तु विधि
वत्परिमार्जयेत्। यवैर्दर्भैस्तिलैर्मिश्रं शुचौ भूमौ विनिक्षिपेत्। देवमंडले यवदर्भा
न्क्षिप्त्वा पितृमंडले तिलदर्भान्क्षिप्त्वा भोजनपात्राणि स्थापयेदिति भावः। तत उदकदा

Indira Gandhi National
Centre for the Arts

नार्थं परितो भस्मादिना चतुःकोणाख्य मर्यादां कृत्वा द्विहस्तशुध्यर्थमुदकं दद्यात्। नान्यथा।
तथा च मत्स्यः। अकृत्वा भस्ममर्यादां यः कुर्यात्पाणिशोधनं। आसुरं तद्भवेच्छ्राद्धं पितॄणां
१२८ नोपतिष्ठति। मर्यादानंतरं पाणिशोधनं। तल्लक्षणं स्मृत्यंतरे। भस्मना वारिणा वा
पि कारयेन्मंडलं ततः। चतुःकोणं द्विजाग्र्यस्य त्रिकोणं क्षत्रियस्य च। मंडलाकृ
ति वैश्यस्य शूद्रस्याभ्युक्षणं स्मृतं। मर्यादामंडलयोरप्येकएवार्थः। विभूत्या
दिना पात्रसंमितान्मंडलान्कृत्वा हस्तप्रक्षालनस्य प्रतिपत्तिः श्रूयते। ब्रह्मांडपुराणे।
प्रक्षाल्य हस्तौ पात्रादि पश्चाद्दर्भैर्विधानवित्। प्रक्षालनजलं दर्भैः स्तिलैर्मिश्रं शि
पेद्बुधो। मंडले प्रक्षिप्यतइति शिष्टाचारः॥ अथाग्नौकरणविधिः॥ ॥ पितृयज्ञ
वदाग्नमुद्धृत्याभ्यज्य सर्पिषा। अग्नौकरिष्यइत्येतान्पृष्ट्वोक्तः क्रियतामिति॥ २०॥ १२८
मेक्षणानुप्रहृत्य तं पितृयज्ञं करोत्यथेति॥ अस्यार्थः। स्थालीस्थितस्य पिंडपितृय

ज्ञचरोः किंचिद्धोमार्थं पात्रांतरे उद्धृत्य स्रुवपात्रस्थितेनाज्येनाभिघार्य तान्। विप्रान् अग्नौक
रिष्य इति पृष्ट्वा क्रियतामिति तैरभ्यनुज्ञातः। उपस्तरणादि कृत्वा मेक्षणेनावदाय जुहुया
त्। श्रौतसूत्रे सोमाय पितृमते स्वधा नमो ग्नये कव्यवाहनाय स्वधा नम इति स्वाहाकारेण
वाग्निं पूर्ववद्यज्ञोपवीतीति। तच्चैवं। मेक्षणं वामहस्ते गृहीत्वा दक्षिणेन स्रुवेणाज्यं गृ
हीत्वा तत्र मेक्षणे उपस्तृत्य स्रुवं भूमौ स्थापयित्वा दक्षिणेन मेक्षणं गृहीत्वा तेनैव ह
विषो मध्यादिदेशाभ्यां द्विवारं गृहीत्वा मेक्षणं पुनर्वामे गृहीत्वा दक्षिणेन स्रुवं गृहीत्वा
पात्रस्थमभिघार्य मेक्षणस्थितं चाभिघार्य सोमाय पितृमते स्वधा नम इति मंत्रेण
हुत्वा पुनः पूर्ववदवदाय द्वितीयं जुहुयात्। सव्यहोमपक्षे अग्नये कव्यवाहनाय स्वाहा। सोमा
य पितृमते स्वाहा। पुनस्तथैव मेक्षणप्रहरणमप्यग्नौ कर्तव्यइति। अपसव्यपक्षे सव्यपक्षे
च सव्येनैव मेक्षणप्रहरणमग्नौ। प्रसंगात्पाणिहोमविधिरपि प्रदर्श्यते। अग्न्याभावे तु

Indira Gandhi National
Centre for the Arts

विप्रस्य पाणावेनोपपादयेदिति मनुवचनात् निरग्नीनां सर्वदा पाणिहोमो भवति। कश्चित्साग्नीनामपि पिण्डपितृयज्ञरहितेषु श्राद्धेषु पाणिहोम एव भवति। नमस्कार उक्तो गृह्यसंग्रहे।
१२९ उद्धृत्य भोजनीयान्नात्किंचित्पात्रेषु निक्षिपेत्। अभिघार्येह विद्वांश्च होमं कुर्याच्च पाणिषु॥
होमः प्रश्नं विना सर्वं विधानपूर्ववद्भवेत्। पाणिहोमेषु सर्वत्र प्रश्नं नेच्छन्ति सूरयः। अष्टकाप्रकरणे कारिकायां। उद्धृत्य भोजनीयान्नान् द्वे द्वे हुत्वाथ पाणिषु। सोमायेत्यादिमंत्राभ्यामेक्षणेन करेण वा। मेक्षणासंभवे दक्षिणहस्तेनैव सर्वेषां विप्रपाणिषु जुहोति। शौनकः।
विप्राणामुपविष्टानां सर्वेषामेव पाणिषु। विभज्य जुहुयात्सर्वं सोमायेत्यादिमंत्रतः। तत्राप्युक्तं स्मृत्यंतरे। पित्र्ये यः पंक्तिमूर्धन्यस्तस्य पाणौ यथाविधि। हुत्वा मंत्रवदन्येषां तूष्णीं पात्रेषु निक्षिपेत्। एतच्छाखांतरविषयं तच्च स्वसरेण वेदितव्यं। अत्रैव कारिकायां। प्राशितेषु बहुत्वेषु अन्यदन्नं ददात्यथो। उदीच्याः प्राक् रात्रैवं न प्राश्नीयात्करे हुतं। निधाय तत्सुतं पात्रे आचम्योपविशेदिति। पाणिहुतं भोजनपात्रे स्थापयित्वा आसनदेशात्किंचिद्दूरं गत्वापा १३०

णी प्रक्षाल्य सम्यगाचम्य पुनरासने उपविशेदिति। अग्न्यभावे शेषः। अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेदिति। पर्युक्ष्य दर्भानास्तीर्य एषोऽस्याग्निसमो द्विजः। अत्राग्न्यभावः स्मार्ताग्न्यभावाभिप्रायेणोच्यते। किंतु अकृतदारपरिग्रहाभिप्रायेण तथा च जातूकर्ण्यः। अग्न्यभावस्तु नस्नातवद्यावद्भार्यां न विंदति। भार्यापरिग्रहात्पूर्वं यानि समावर्तनादीनि कर्माणि निमित्तानि श्रौतानि तत्राग्न्यभावः न मृतदारस्य। तस्य देवादनंतरितः। आलस्यादनंतरितस्यापि न। एवमनग्निकस्य वैश्वदेविकस्य द्विजपाणौ होमः। अनुपनीतस्याप्येवमेव विधिः। तथा च वसिष्ठः। न ह्यस्मिन्विद्यते कर्म किंचिदामौंजिबंधनात्। नाभिव्याहरयेद्ब्रह्म स्वधा निनयनादृते। स्वधाशब्दः श्राद्धोपलक्षणार्थः। एवमुभयविधस्यापि निरग्निकस्य ब्राह्मणपाणौ दैवकरणोऽग्नौकरणं। तथा च वायुपुराणे। दैवेऽप्यनग्निकः कुर्याद्धविः पित्र्ये निवेदयेत्। न हि स्मृताः शेषभाजो विश्वेदेवाः पुराणगैः। यथा साग्निकस्यापि कार्ये अग्नौकरणे हवनं पितृपंक्तौ प्रति ब्राह्मणं भवति। तथात्र एवमुभयविधनिरग्निकस्य विश्वेदेवनिमित्तं प्रति ब्राह्मणमग्नौकरणं नास्ति पुराणवचनात्। विश्वेदेवयदेकस्मिन्भवेयुर्बहवो द्विजाः। तदेकपाणौ दातव्यं स्याद्धि धिर्विहितस्तथा। अतः मुख्य था

Indira Gandhi National
Centre for the Arts

विश्वेदेवस्थानेउपविष्टस्यैव करे होतव्यं।हुतशेषं पितृपात्रे प्रदातव्यमिति इतिपाणिहोमः॥
१३० अन्येषुपरिविष्टेषु हुतशेषं प्रदापयेत्॥२९॥ उद्दिश्य।चान्नं विश्वेभ्यः पितृभ्यश्च प्रयत्नितः।भुं
जानान् श्रावयेद्विप्रान् रक्षोघ्नान्पितृलिंगकान्।पुराणानि पवित्राणि कृषिगीता पितृस्तुतिरि
ति॥अस्यार्थः।अथ यथोक्तप्रकारेण भोजनपात्रोपस्तरणपूर्वकं सर्वान्नानि देवपूर्वं भोजनपा
त्राण्युपस्तीर्यस्य यं पत्नी अन्ये वापि नियुक्ताः।प्रशस्ता हविष्यान्नपूर्वकं परिवेषणं कुर्युः।अ
त्र परिवेषणप्रकार उक्तो मनुना।पाणिभ्यां तूपसंगृह्य स्वयमन्नस्य वर्धितं।विप्रांतिके पितॄ
न्ध्यायन् शनकैरुपनिक्षिपेत्।अन्नस्य वर्द्धितं भक्तादि पूर्णमित्यर्थः।उपनिक्षिपेदिति विप्राणां
समीपभूमौ स्थापयेदिति भावः।पुनः स एवाह।उपनीय तु तत्सर्वं शनकैः सुसमाहितः।परिवेष
येत्प्रयतो गुणान्सर्वान्प्रचोदयेत् इति।अत एव शौनकः।पाकं सर्वमुपानीतं संवेद्य च पृथक्
पृथक्।विधिना देवपूर्वं तु परिवेषणमारभेत्।स एव।हुतावशेषं परिशिष्टं तु पितृपात्रेष्वनंत
रं।निवेद्यं वापसव्येनाग्नौकरणं तदा।हुतशेषप्रदानमप्यपसव्येन।पादिसव्येन हवनं स दासव्ये १३०
नैव।परिवेषमुभयथा सव्येनैव।सव्येनैव प्रकर्तव्यं पित्र्येपि परिवेषणं।स्वेनैव भुक्तिभावे

न महापुण्यमभोक्षनेति वचनात्।आचार्यः।वारंवारं चतुर्वारं हविर्दद्यात्तु दैविके।एकवारं त्रिवा
रं वा पैतृके प्रथमं स्मृतं।प्रथमपरिवेषणे त्वयं नियमः।भुंजानेषु तु विप्रेषु अपेक्षितं पुनः पुन
र्दातव्यं॥न चात्र संख्यानियमः।संग्रहे।एकपंक्त्युपविष्टेभ्यो दद्यादन्नं सम समं सदा।गुणानां तारतम्यं
तु विप्राणां न विचारयेदिति प्रत्यवायस्मरणात्।कुनदीसेतुकारस्य कन्याविघ्नकरस्य च।पंक्त्या
विषमदातुश्च कन्याविघ्नकरस्य च।पंक्त्या विषमदातुश्च निष्कृतिर्नोपपद्यत इति।तस्मान्नानारस
वंति शाकपाकादीनि सदृशान्येव दातव्यानि॥भार्ययापि परिवेषणं कार्यमिति वायुपुराणे॥
परिवेषः प्रशस्तस्याद्भार्यया परितृप्तये।पितृदेवमनुष्याणां स्त्री सहायमतः स्मृतेति॥ स्कं नाद
योन्येपि वा सुगोत्रिणो नियता बांधवाः परिवेषणं कुर्युः।मत्स्यपुराणे।उभाभ्यामपि हस्ताभ्या
माहृत्य परिवेषयेत्।सतिलं परिवेष्यान्नं दर्भपाणिरशेषतः।पूर्वमेव पाकावस्थायां तिलमि
श्रं कृत्वा परिवेषयेदिति भावः।न च भोजनपात्रे पृथक्तिलदानं कार्यमिति।अत एव पराशरः।
सर्वदा च तिला ग्राह्याः पितृकृत्ये विशेषतः।भोज्यपात्रे तिलान् दृष्ट्वा निराशाः पितरो गताः इ
ति।नारदीयपुराणे।रोप्यहस्तेन दातव्यं यत्किंचित्पितृदैवते।तेन स्युः पितरस्तृप्ता यावन्नदा भूत

Indira Gandhi National
Centre for the Arts

१२१ संप्लुवमिति। एकहस्तपरिवेषणे दोषस्मरणात्। सम्यग्भांडमादाय पाणिनैकेन दीयते। तद्व्यं पितृपात्रेषु सहस्रांकिभिराशिभिरिति। अतो हस्तद्वयेन दर्व्यादिसाधनेन परिवेषयेत्। अत एवाचार्यस्मृतौ। उदुंबरमयाद्वास्याद्दर्व्याद्याः श्राद्धकर्मणि। दर्व्यादिः संप्रदातव्यं न तु हस्तेन किंच नेति। मनुरपि। दर्व्या देयं घृतान्नं तु समस्तं व्यंजनानि च। हस्तदत्तं न भोक्तव्यमिति पैठीनसीव चनात्। लवणं व्यंजनं चैव घृतं तैलं तथैव च। लेह्यं पेयं च विविधं हस्तदत्तं न भक्षयेत्। तस्माद्दर्व्यादिसाधनैनैव सर्वमन्नादिकं परिवेषयेदिति। राजतपात्रसाधनेन परिवेषणे फलाधिक्यमुक्तं मनुना। राजतैर्भाजनैरेषामथवा रजतान्वितैः। वार्यपि श्रद्धया दत्तमक्षयायोपकल्पत इति। रजतान्वितैरिति दानतात्रपात्रादीनामेकदेशं रौप्ययुक्तं कृत्वा तैर्वा परिवेषयेदिति मेधातिथिः। हारीतः। सौवर्णराजताभ्यां वा खड्गेणौदुंबरेण वा। दत्तमक्षय्यतां याति फल्गुपात्रेण वा पुनः। संग्रहे। तृणपर्णादिभिर्दद्याद्दर्भो येश्राद्धकर्मणि। आन्नसेनैव दातव्यं न तु हस्तेन कुत्रचित्। केवलं हस्तेनैव प्रदानं न तु दर्व्या कदाचन। तत्र दोषमप्याह। दुं
मनुः। अपक्वं स्नेहपक्वं च यो दर्व्यादानुमिच्छति। स ब्रह्महा स्मृतः पश्चात्स तेनो गुरुतल्पगइ १२१

ति। अतः स्नेहपक्वान्नफलमूलकठिनद्रव्यादिव्यतिरेकेण दर्व्यादिभिः साधनैः ओदनपूर्वकं सर्वान्नादि परिवेषयेत्। परिवेषणविशेषांतरमपि श्रूयते। तत्र वाक्यं। भुंचिनाभुंचयेदेयं संप्रदेयं च तद्भुंचिः संप्रदानस्य इष्टत्वाच्च तत्र देयमिति। संकल्पे तु दत्तं दास्यमानमिति पदं दत्तमेव दास्यमाने तत्पूर्वमिस्य वर्गतव्यं। एतावत्सर्यंतप्रासंगिकं स्मृत्युक्तं परिवेषणादिसर्वं किंचित्किंचिद्वाक्यद्वारा प्रदर्श्य पुनः प्रकृतमनुसृत्य कारिकार्थः समर्थ्यते। एवमुक्तप्रकारेण चिपरिविष्य होमावशिष्टं तं च रुं तु देव वर्जं पितृपात्रेषु दद्यादित्याह। पितृपात्रेषु कृतशेषदानं अग्निहोमे पाणिहोमे च समानं। ततः कृतशिष्टदानानंतरं। विश्वेभ्यो देवेभ्यः स्मृत्युक्तप्रकारेण अन्नसंकल्पः। तत्र पात्रालंभनप्रकारः। चतुर्विंशतिमते। उत्तानं दक्षिणं सव्यं नीचं पात्राण्युपस्पृशेत्। स्वस्तिकेन पितॄन्देवान्धश्चोर्ध्वं च दापयेत्। पृथिवी ते पात्रमित्यादिना मंत्रेण पात्राभिमंत्रणं कृत्वा इदं विष्णुर्विचक्रम इत्येताभिः पंचभिर्ऋग्भिः द्विजांगुष्ठ-ग्रहणं कृत्वा। तथा च स्मृत्यंतरे। इदं विष्ण्वादि पंचर्चैर्जलांगुष्ठाद्ध्रविः स्पृशन्॥

Indira Gandhi National Centre for the Arts

स्पृष्ट्वा स्पृष्टिर्न दोषाय पितॄणामक्षयं भवेत्। ऋग्विधाने। इदं विष्ण्वादिभिर्मंत्रैः पंचभिः श्राद्धकर्म
१३२ णि। अंगुष्ठग्रहणं कुर्यात्तेन रक्षो न बाधत इति। तत्र वैश्वदेवे यज्ञोपवीती विष्णो हव्यं रक्षेति। पित्र्ये
प्राचीनावीती कव्यं रक्षेति द्विजांगुष्ठमन्नादिसामग्र्यां निवेशयेत्। विष्णो हव्यं वैश्वदेवे ब्रूयाद्र
क्षेति वै क्रमादिति स्मरणात्। तत्रांगुष्ठनिवेशने विशेषः स्मर्यते। परिवेष्येति हस्तयुक्तो न
कृत्वा द्विजांगुष्ठनिवेशनं न कुर्यादित्यर्थः। एवमन्नोदके अंगुष्ठेनावगाह्य ऋजुदर्भोदकपूर्वकं
चतुर्थ्या संकल्पयेत्। एवं तिलदर्भोदकेन पितृभ्यः संकल्पयेत्। स्वधेति विशेषः। तथा चात्रिः।
हस्तेन मुक्तमन्नाद्यमिदं मंत्रमुदीरयन्। स्वाहेति च ततः कुर्यात्स्वसत्त्वाविनिवर्तनं। पुनर्देश्व
देन ब्राह्मणविषयं। पितृकर्मादुद्दर्पयेति स्वसत्त्वाविनिवर्तयेदिति। दंपत्योरेवान्नत्यागे अधि
कारः। तथा च त्रिकांडमंडनः। त्यागं तु सर्वथा कुर्यात्तत्राप्यन्यतरस्तयोः। उभावप्यसमर्थौ
चेन्नियुक्तः कश्चनस्त्यजेदिति। अत्र ब्राह्मणविषये बलिदानवसे दानिषेधः श्रूयते। अत्रिवच
नात्। दत्ते वाप्यथवा दत्ते भूमौ यो निक्षिपेद्बलिं। तदन्नं विफलं याति निराशैः पितृभिर्गते १३२
रिति। पितृग्रहणं वैश्वदेवोपलक्षणार्थं तत्र पुराणोक्ता जप्यमंत्राः। यज्ञेश्वरो हव्यकव्यस

मस्त भोक्ताव्ययात्मा हरिरीश्वरोऽत्र। तत्सन्निधानादपयांतु सद्यो रक्षांस्यशेषाण्यसुराश्च सर्वे। तां
योगिनश्चिंतयंतीत्यादिकमुच्चार्य तिथ्यादिकथनपूर्वकं पितृनामगोत्राण्युच्चार्य द्विगुणदर्भ
तिलमिश्रं जलमुत्सृजेत्। ॐ भूर्भुवः स्वः यथा सुखं जुषध्वमिति पितृरूपी यज्ञपुरुषः प्रजा
पतिः प्रीयतामिति। ततः। अपोशानं प्रदायाथ सावित्रीं त्रिर्जपेदथ। मधुवाता इति तृचं म
ध्वित्येवं त्रिकं तथेति। अत्र बलिनिषेधः। न दद्याद्धर्मराजाय बलिं श्राद्धे कदाचन। अमृतोप
स्तरणमसि मंत्रेणैवाप आचमेदिति। अपोशानविशेषः स्मृतिसारसमुच्चये। अपोशानं
वामभागे सुरापानसमं भवेत्। दक्षभागे तु यः कुर्यात्सोमपानसमं भवेदिति। अपोशानं
करे कृत्वा रुत्वानुपतितोदकं। पूरणं तु पुनः कृत्वा सुरापानसमं भवेदिति। नित्यभोजनाश्चि
तनियमाः प्राणाहुत्यंता भोक्तॄणामत्रापि संतीति गम्यते। व्यासः। जुषध्वमिति तेनोक्ताः
सम्यग्विधृतभोजनाः। कृतमौनाः समश्नीयुरपोशानादनंतरं। अपोशानानंतरममृतोप
स्तरणमसीत्यनेन मंत्रेण आचमनानंतरमित्यर्थः। तथा च विष्णुपुराणे। ततोऽन्नमिष्टमि

Indira Gandhi National
Centre for the Arts

त्पर्यमभीष्टमतिसंस्कृतं। दत्वात्तु पथ्यमिच्छातो वदेत्तत्तदनिष्ठुरं। अत्र भोजनपात्रे प्रकार धारण
१३३ माहसंवर्तः। अंगुष्ठमूले नीचैव मध्यमा चू तृतीयका। तिस्रश्चांगुलयः प्रोक्ताः प्रशस्ताः पा
त्रधारण इति। एतावत्पर्यंतं स्मृतक्रमं ओपयोगिवाक्यद्वारा कर्मनिर्वाहार्थं क्रमं कला
पमुक्त्वा इदानीं कारिकार्थः कथ्यते। भुंजानानिति। भुंजानान् एतान्विप्रान् रक्षोघ्नान्पि
तृलिंगकान् सूक्तविशेषान् श्रावयेदिति। भोजनस्यानुपर्याप्तं देयं किंचित्ततोधिकं। २३।
तृप्तेषु श्रावयेत्तिस्रो मधुवाताऋतायते। अक्षन्नितिच तान्विप्रान्संपन्नमिति पृच्छति। २४।
तेपि संपन्नमित्येवं प्रतिब्रूयुस्ततः परमिति। अस्यार्थः। भोजनकार्यप्रवृत्तेभ्यो विप्रेभ्यः
च अपेक्षितं देयं ततोप्यधिकं देयं। अथ तेषु तृप्तेषु मत्सूक्तमंत्रान्श्रावयेदिति। सूत्रेपि। तृप्ता
न्ज्ञात्वा मधुमतीः श्रावयेदक्षन्नमीमदंतेतिच। एतन्मंत्रश्रवणानंतरं संपन्नमिति विप्रा
न्पृच्छति। तृप्तिविषये संपन्नमिति प्रश्नार्थः। तथैव प्रतिवचनं तेपि ब्रूयुरिति। यद्युक्तं तु १३३
ततः किंचिदन्नं पिंडार्थमुद्धरेत्। २५। पितृयज्ञे परोरन्नमुद्धतं प्रक्षिपेदथ। अन्नासंकिर

घ

णार्थं च सर्वस्मादन्नमुद्धरेत्। २६। अस्यार्थः। यद्यपि तृप्तभुक्तशेषं तत्तदन्नं किंचित्किंचिदुद्धृत्य
पितृयज्ञचरौ तत्सर्वमुद्धृतं प्रक्षिपेदित्यर्थः। स्मार्त्यां सर्वपिंडयोग्यं कुर्यादिति उत्तरत्र प्रकी
रणं सिध्यर्थं सर्वस्माद्भुक्तशेषादुद्धृत्य कवलमात्रमन्नं पात्रांतरे प्रक्षिपेदिति। ब्राह्मणेभ्य
स्ततः शिष्टं सर्वमन्नं निवेदयेत्। तेपि स्वीकुर्युरिष्टं चेदनुजानंति वा पुनः। २७। पिंडदानम
नाचांते घाचांतेथवा पुनः। अंभोनिनयनाद्यंतं पितृयज्ञं समापयेत्। २८। अस्यार्थः। भुक्त
शेषं सर्वमन्नं तेभ्यो निवेदयेदन्नशेषः किं क्रियतामिति। इत्युक्ते सति यद्यभिमतं भवति त तेषां
दा तत्स्वीकुर्वंतु। अथवा इष्टैः सह भुज्यतामिति यदि अनुजानंति अनुज्ञां ददत्युः। तदा यजमाने
न आमंत्रितैः सार्धं भोक्तव्यमिति। अत्र प्रतिवंदनानंतरं पुराणे मदालसावाक्यं। तदन्वाचम
नार्थाय दद्यादापः सकृत्सकृत्। तदनु पश्चादमृतापिधानमसीत्याचमनार्थं प्रति ब्राह्मण
मपो दद्यात्। अत्र पिंडदानस्य कालो विधीयते। अनाचांतेषु विप्रेषु आचांतेषु कार्यमिति।
उच्छिष्टापनयनं शुचिलक्षणमाचमनं। तत्र कृते कृते वा पिंडदानं भवति। एवं यथेच्छया का

Indira Gandhi National
Centre for the Arts

र्थमिति। तस्मिंश्च पिंडदानसंभोजिनयनमादिं कृत्वा समाप्तिपर्यंतं तेनैव पिंडपितृयज्ञप्रकारेणैव पिंडदा
१२४ नं समापयेदित्यर्थः। अन्नप्रकिरणार्थं यत्तदानीयजलकृतं। आचांतानां समीपिषुखग्रतः प्रकिरे
द्धुवीति॥२९॥ अस्यार्थः। यल्लाकिरणार्थं स्थापितमन्नं ततः पुनः आनीय जलेन जलेनाभिषिच्य आ
चांतानां विप्राणां पुरतः प्रकिरेदिति। अत्र पिंडदाने पक्षद्वयं। आचांते अनाचांते वा भवति। वि
किरणं तु पिंडदानांते आचमनोत्तरमेव भवति। न तु पूर्वं। निपरणात्प्रकिरेदिति आश्वलायने
नोक्तत्वात्। शाखांतरे तु विकिरणं तु पिंडदानात्पूर्वं पश्चादपि भवति। ब्रह्मांडपुराणे। प्रोक्ष्य
भूमिं तथा द्विस्कृ भूमौ पितृपरायणः। ततो विकिरणं कुर्याद्विधिदृष्टेन कर्मणेति। तथा वपु
राणांतरे। विकिरं श्चास समाचंतु न तु दद्यात्पृथक्पृथक्। उच्छसर्वमन्नं तु पंक्तिमूर्धनि दाप
येदिति। तत्र दैवे पित्र्ये तूभयत्र मंत्रौ। असोमपाश्च ये देवा यज्ञभागविवर्जिता इति। पितृविष
ये बृहस्पतिः। ये ऽग्निदग्धा कुले जाता ये चदग्धाः कुले मम। भूमौ दत्तेन तृप्यंतु तृप्ता यांतु परां १२४
गतिमिति। एवं कृत्वा हस्तौ पादौ प्रक्षाल्य द्विराचम्य विप्रपाणिषु प्रोक्षणादि कमाचरेत्। तच्चा

स्मचास्त्रे। आचार्येण अनुक्तमित्यतः। स्मृत्यंतरोक्तमविरोधित्वाद्ग्राह्यं तत्र मत्स्यः। तथाचांतेषुवा
चम्य वारि दद्यात्सकृत्सकृत्। इति। अत्र पूर्वोक्तस्यैवाचमनस्यानुवादकः। उभयेषामपि। अ
थ सकृत्सकृत्सर्वेषां विप्रपाणिषु क्रमेण उदकं दद्यादिति। संग्रहे। दर्भपाणिः समिध्यर्थं द
र्भश्चैव पृथक्पृथगिति। आचार्यस्मृतौ तु। मण्यतेषु विप्रेषु समाचांतेषु कृत्स्नशः। दद्या
त् हस्तेषु पुष्पं गंधमाल्यात्सकुंकुमान्। इति पद्मपुराणे। आचांते षूदकं दत्वा पुष्पाणि स
यवानि च। पित्र्ये तु तिलयुक्तानि वारि चापि पृथक्पृथक्। चंद्रिकायां। अथ हस्तदत्वाक्षतपु
ष्पादीनि विप्राः कुत्र चित्यजेयुरिति। पुनर्गंधादिदानविधानदर्शनात्। अत एव मत्स्यः। आ
चांतेषु पुनर्दद्याज्जलपुष्पाक्षतादिकमिति। स्मृत्यंतरे। कृप्रोक्षितादिकर्तव्यमाचांते षूपवी
तिनेति। अत्र विप्रपाणिषु उदकदानमंत्रः। पुराणांतरे। अपां मध्ये स्थिता देवाः सर्वमप्सु प्रति
ष्ठितं। ब्राह्मणस्य करे न्यस्ताः शिवा आपो भवंतु मे। इत्युदकादिदानमंत्रः। लक्ष्मीर्वसति पुष्पे
षु लक्ष्मीर्वसति पुष्करे। लक्ष्मीर्वसेत्सदा सोमे सौमनस्यं सदास्तु ते। इति पुष्पदानमंत्रः। अ

Indira Gandhi National
Centre for the Arts

क्षयं चास्तु मे पुण्यं शांतिः पुष्टिर्धृतिश्च मे। यद्य छ्रेयस्करं लोके तत्तदस्तु सदा मम। इत्यक्षय्यतदानमं
१३५ त्रः। देवलः। ततोभिवाद्य प्रयतो वरान्। याचेत तान्पितॄन्। अघोराः पितरः संतु संत्वित्युक्ते पुन
र्द्विजैः। गोत्रं तथा वर्धतां वस्तथेत्युक्तैश्च तैर्द्विजैरिति। एताः सत्याशिषः संतु संत्वित्युक्ते च तैः पु
नः। आशीः पूर्वद्विजैर्दत्वा मूर्ध्न्या धार्या सतोक्षताः इति स्कंदसंवादेपि। इत्येता आशिषः सर्वा गृ
ह्णीयात् प्रतिभाषता इति। वृद्धयोगीश्वरः। ततश्च तिलकं कुर्यान्मंत्रेणानेन भक्तितः। नित्यानुष्ठा
नासिध्यर्थं सर्वदा यज्ञवृत्थयः। पितृमातृपराः संतः संतु स्मत्कुलजा नराः। अनंतरमुच्छिष्टपा
त्रचालनं। तदुक्तं जातूकर्ण्येन। पात्राणि चालयेच्छ्राद्धे स्वयं शिष्योथवा सुत इति। न स्त्रीभिर्न च भि
बालेन नान्यजात्या कदाचनेति। पात्राणि चालयित्वा कुत्रचित्सम्यक्प्रदेशे स्थापयेत्। प्रतिप
त्तिकार्यस्य उत्तरत्र वक्ष्यमाणत्वात्। पात्रसंनतासतितमुच्छिष्टं असमाप्तात्पूर्वं नैव मार्जयेत्।
उक्तं वृद्धवसिष्ठेन। शुध्यनोद्वासनीयानि उच्छिष्टान्यादिनक्षयात्। श्वोतं तेवै स्वधाकारास्ता १३५
न् पिबंत्यकृतोदकं इति। मृतानां येषां नोदकदानं ते तथोक्ताः। व्यासोपि। उच्छिष्टं न प्रमृज्यात्तु या

वन्नास्तमितो रविः। क्षीरधारास्ततो यांति अक्षय्याः स्वांश्च भागिनः इति। शौनकोपि। नोद्वासयेच्च
विप्राणामुच्छिष्टान्यादिनक्षयात्। तदेतत्सर्वं बहुगृहे विषयं। सपिंडीकरणविषयं वा। अत
एवाचार्यः। सपिंडीकरणश्राद्धे विप्रोच्छिष्टं तु नोद्धरेत्। द्वारं चापि हि तं तावं नोत्सृजेदादिनक्ष
यात्। यस्य एकमेव गृहं भवति तद्विषये विप्रविसर्जनानंतरं दिवैव उच्छिष्टमार्जनं कार्यमि परि
त्याह। मनुः। उच्छेषणं तत्तिष्ठेद्यावद्विप्रा विसर्जिता इति। उच्छेषणं भूमिसंलग्नउच्छिष्टा
दिकं तच्च विप्रविसर्जनात्पूर्वं नैव मार्जयेत्। विसर्जितेषु विप्रेषु मार्जयेदिति भावः। पात्रचा
लनानंतरं स्वस्तिवाचनं कारयेत्। उक्तं च स्मृत्यंतरे। चालयेद्द्विजपात्राणि प्रथमं स्वस्तिवा
चनादिति। तद्वैव परीत्ये दोषउक्तो बृहस्पतिना। भाजनेषु च तिष्ठत्सु स्वस्ति कुर्वंति ये द्विजाः। तद
न्नमसुरैर्भुक्तं निराशाः पितरो गता इति। अतः पात्रचालनानंतरमेव स्वस्तिप्रयोगो भवति।
तत्प्रकारमाह पारस्करः। स्वस्तीति भगवान् ब्रूहीत्युक्त्वा दद्यात्तिलोदकं। देवपाणौ तु याह
रुत्प्रसव्येन वा तिलोदकमिति। अयमर्थः। देवविप्रहस्ते अर्थाद्यवोदकं दत्वा पितृहस्ते च ति

Indira Gandhi National
Centre for the Arts

लोदकं दत्वास्वस्ती।ति भगवन्तो ब्रूहीति ब्राह्मणं कर्ता ब्रूयात्।विप्रेण देवेभ्यः स्वस्तीति वक्तव्यं॥
१३६ तथैवामुकगोत्रेभ्यः यजमानस्य पितृभ्यः अमुकशर्मभ्यः स्वस्तीति वाच्यं ततः कुर्यादक्षय्योदक
मेवचेति।स्मृत्यंतरेपि।देवपूर्वं जलं दद्यादक्षय्यं श्राद्धमस्त्विति।मार्कंडेयः।पितॄणां नामगोत्रेण ज
लं देयमनंतरं।ब्राह्मणानां हितेर्वाच्यमक्षय्यमिदमस्त्विति।अयमर्थः पुरूरवार्द्रवसंज्ञकानां विश्वे
षां देवानां दत्तं श्राद्धमक्षय्योदकमस्तु।तथैव ते प्रतिवचनं ददतुः अस्त्वक्षय्यमिति।द्वितीयत्रापि प्राची
नावीती अमुकगोत्रा मित्रा कल्को ऽस्मत्पितॄणां दत्तं श्राद्धमक्षय्योदकमस्तु तथैव प्रत्युत्तरं।अ
नंतरं कृष्णलेकारिकायां।उत्तानं प्रथमं पात्रं कृत्वा यज्ञोपवीत्यथ।दत्वा च दक्षिणां शक्त्या विसर्जे
दिं स्वधोच्यतां॥३०॥ॐ स्वधेति प्रतिब्रूयुर्याचेत मान्वरान् पितॄन्।दक्षिणां दिशमाकांक्षन्निय
तो वाग्यतः शुचिः॥३१॥दातारो नोभिवर्धंतां वेदाः संततिरेव च।श्रद्धा च नो मा व्यगमद्बहु देयं च
नोस्त्विति।अस्यार्थः।प्रथमं अर्घ्यपात्रं न्युब्जपक्षे उत्तानं कार्यं।अपिधानपक्षे अपिधानपा १३६
त्रं तस्मात् स्थानात् प्रथमपात्रं यथा विवृतं भवति तथा तथा कुर्यात्।उद्धृते दक्षिणे पाणावुपवी

त्यप्युच्यते बुधैः।सव्ये प्राचीनावीती निवीती कंठसूत्रवत्।अथोपवीतिः सन् दक्षिणां दत्वा
विसर्जयेदिति।ॐ स्वधेति वचनेन विसर्जयेदिति।अत्र दक्षिणादानावसरे तांबूलं दद्यादित्याचा
र्यः।दद्याद्यज्ञोपवीत्येव तांबूलं दक्षिणां तथेति।अत्र दक्षिणादाने आचर्य कृत्वमुक्तं ब्रह्म
पुराणे।दरिद्रोपि यथाशक्त्या दद्याद्विप्राय दक्षिणां।हस्तमश्रोत्रियश्राद्धं हतायज्ञास्त्वद
क्षिणाः।तस्मात्सुवर्णं काकिणं वा फलपुष्पमथापि वा।प्रदद्याद्दक्षिणां श्राद्धे तथा तु फलसंभ
वेदिति।भक्ष्यं भोज्यं समं देयं दक्षिणात्वनुरूपतः।दक्षिणादानानंतरं शौनकः।आत्म
पानथ पित्रार्थान् परीत्य त्रिः प्रदक्षिणं।सस्त्रीकैः स्वजनैः सार्धं प्रणमेद्द्विताञ्जलिः।कनि
ष्ठप्रथमाज्येष्ठचरमास्तः प्रादक्षिण्ये।तेषु क्षतान्विनिक्षिप्य प्रणमेयुर्द्विजाश्च ते।आशि
षो विविधाश्चयुः कुर्युश्चानुग्रहं ततः इति।अथ विप्रविसर्जनं स एवाह।पितृविप्रान्स्वधे
त्युक्त्वा गच्छेति ते च ते द्विजान्।तथास्त्विति प्रोक्ता दीर्घे व गच्छेयुः पुनर्नवेक्षकाः।अथ वा स्वस्त्व
स्त्वित्युक्त्वा गच्छतेति च तांश्च देवान्।तथोक्ता ते पि गच्छेयुरालयाद्वेनपेक्षकाः।विश्वेदेवाश्च ते

Indira Gandhi National
Centre for the Arts

पुनः प्रोच्चार्य तदनंतरं। प्रीयतामिति निर्दिश्य। कैश्विश्वेदेवो समुत्सृजेत्। जयंतः। विश्वे
१३७ देवाः प्रीयंतामिति विश्वेदेवार्थों विप्रो विसृजेदिति। शौनकः। तावप्युदीर्य प्रथमं प्रीयता
मिति तत्परं। विश्वेदेवानिस्फूर्दीय निर्गच्छतामथो बहिरिति॥ अथ गृह्यगणोक्ताश्च वरान्
याचेत। तत्र शौनकः। तिष्ठन् कृतांजलिर्याचेद्वरानीक्षन्पितॄन् पि। मनुः। विसृज्य ब्राह्मणांस्तो
स्तु नियतो वाग्यतः शुचिः। दक्षिणादिशमाकांक्षन् याचेतमान्वरान्पितॄन्। दातारो नोभि
वर्धतां वेदाः संततिरेव च। श्रद्धा च नो माव्यगमद्बहुदेयं च नोस्त्विति। आचार्यस्य तौ।
अन्नं च नो बहुभवेदतिथींश्च लभेमहि। याचितारश्च नः संतु मा च याचिष्म कंचन। वरा
निमान्पितॄन्। याच्य ब्राह्मणैश्चानुमोदितः परिक्रम्य नमस्कृत्य प्रार्थयेच्च पुनः पुनरिति। अ
स्य वरयाचनस्य गृह्यभेदात्कालभेदोपि दृश्यते। किंचिद्द्विप्रविसर्जनानंतरमेव आशी
र्वचनमिच्छतावृत्तिकृन्नारायणेन मनुवाक्यस्योदाहृतत्वाद्विप्रविसर्जनांतर एव भवति। १३७
बृहस्पतिः। आद्यमेसफलं जन्मइत्यादिपद्यद्वयेन प्रसादयेत्। विष्णुः। हविर्गुणान वक्तव्याः

पितरो यावदर्चिताः। पितृभिस्तर्पितैः पश्चाद्वक्तव्यं शोभनं हविरिति॥ वृद्धयोगीश्वरः। बहिः
प्रदक्षिणं कुर्यात्पदान्यष्टावनुव्रजेत्। बंधुवर्गेण सहितः पुत्रभार्यासमन्वित इति। अथ वि
प्रविसर्जनानंतरं पूर्वं प्रतिब्राह्मणस्थापितदीपा हस्ताच्छादनपूर्वकं निर्वासयेत्। तथाच
देवलः। निर्वर्त्य पितृमेधं तु दीपं प्रच्छाद्य पाणिना। आचम्य पाणिं प्रक्षाल्य ज्ञातीन्शेषेण भो
जयेत्। अनंतरमुच्छिष्टमार्जनं कार्यं। तथाच पैठीनसिः। नस्पृशंति यथा दुष्टास्तथैवोच्छिष्टमा
र्जनं। तेस्तु पृष्ठे न दुच्छिष्टं पितरो यांत्यधोगतिमिति। प्रचेताः। खनित्वा निक्षिपेद्भूमावन्य
था स्पर्शनं भवेत्। निषिद्धं स्पर्शनं तेषां तस्मात्खनन सुत्तमामिति। एवमुच्छिष्टमार्जनं कृ
त्वा नित्यवैश्वदेवादिकं श्राद्धशेषेण पाकांतरेण वा कार्यं। यत्र। पितृपाकान्समुद्धृत्य वै
श्वदेवं करोति यः। आसुरं तद्भवेच्छ्राद्धं पितृणां नोपतिष्ठत इति। पैठीनसिवाक्यं। न श्राद्धम
ध्ये श्राद्धात्पूर्वं वा वैश्वदेवकरणपक्षे यथाधिकारण प्रतिद्रष्टव्यं। स्मृत्यंतरे तु। मासाश्रा
द्धांते वैश्वदेवपक्षश्राद्धपाकेनापि वैश्वदेवस्य विहितत्वात्। अतएव चतुर्विंशतिमते। शेष

Indira Gandhi National
Centre for the Arts

मन्नं तु पश्चान्तेवैश्वदेवक्रियांततः। श्राद्धे द्विश्राद्धशेषेण वैश्वदेवं समाचरेत्। न चेह श्राद्धशेषेण
१३८ नियमः क्वचिद्दर्शितः। तस्माच्छ्राद्धांतकारेण पक्षे श्राद्धशेषेण कोपो तरेण वा वैश्वदेवो
भवतीति प्रतीयते। आदिकरण पक्षे यथाकारिणां सर्वेषां पृथक्पाकेनैव भवति। अत ए
व लोगाक्षिः। पित्रार्थं निर्वपेत्पाकं वैश्वदेवार्थमेव च। वैश्वदेवं न पित्र्यर्थं न दर्शं वैश्वदेवि
कमिति। वैश्वदेवार्थमन्नं पित्र्यर्थं न भवति। पित्र्यर्थमन्नं वैश्वदेवार्थं न भवति। तथा हि ताग्नी
नां सर्वदा श्राद्धात्प्रागेव वैश्वदेवः। तत्र पाकांतरेण भवति। तथैव येषां श्राद्धमध्ये वैश्वदे व
वः तत्रापि पृथक्पाक एव। इत्यादि सर्वशास्त्रतोऽवगंतव्यं। अथ वैश्वदेवानंतरमाचार्यः॥
ततः करोति नित्यानि बंधुभिः सह भुंजते। श्राद्धशेषं भुंजानः कर्ता निरयमृच्छति। विद्य
माने श्राद्धशेषे अन्यन्न भोक्तव्यमिति भावः। मत्स्यपुराणे। ततश्च वैश्वदेवांते सभृत्यसु
बांधवां। भुंजीतातिथिसंयुक्तः सर्वं पितृनिषेवितमिति कारिका। ब्रह्मचारी भवेत्तस्यां र १३८
जन्यां ब्राह्मणैः सह॥३३॥ अस्यार्थः। श्राद्धदिनरजन्यां द्विजैः सह ब्रह्मचारी भवेत्। श्राद्धस्य

वे दिने ब्राह्मणैः सह। ब्रह्मचारिणा भवितव्यमित्युक्तं तस्मिन्नपि दिने। एवं दिनद्वयं निय
मेन स्थातव्यमित्यर्थः॥ इत्याश्वलायनकारिकाव्याख्यायामेकाग्निसाध्यं पार्वणश्राद्धं स
माप्तं॥ ॥अथाष्टका निरूप्यंते॥ हेमंतशिशिराख्यर्त्वोः कृष्णपक्षचतुष्टये। अष्टमीषु
अवैकस्यां मष्टम्यामष्टका भवेत्॥३४॥ कार्ययत्कर्म सप्तम्यां तत्कुर्यात् पितृयज्ञवत्॥
व ओदनं कृसरं वै पायसं श्रपयेदिह॥३५॥ गृहसिद्धा उपादेया अपूपान्जुहुयादिति॥
अस्यार्थः। हेमंतशिशिरसंज्ञकयोर्ऋत्वोः कृष्णपक्षचतुष्टये अष्टमीषु तिथिषु कर्तव्याइ
ति॥ अथ चतसृणामसंभवे एकस्यां वेति। सप्तम्यां क्रियमाणस्य कर्मणः स्वरूपमाह। तत्क
र्म पितृयज्ञवत्कार्यमित्यर्थः। चरुणाश्रपणकाले होमद्रव्याणि भवंति। ओदनादित्रयं। अथ
वा अपूपाः पायसस्थाः स्त्रीसाध्याः अत्र वृत्तिकारः। चतुःशरावपरिमितधान्यस्य पेषणं कृ
त्वा अपूपं श्रपयेत्। अपूपाः पिष्टमयाः तेषां बहुसाधनसाध्यः। स्त्रीकर्तृकत्वान्नियु
क्तो श्रपणं न संभवतीति गृहसिद्धानामेवोपादानमिच्छंति वा तत्र द्वौ विकल्पार्थः। पूर्वाण्णि

Indira Gandhi National
Centre for the Arts

१३९ इदं च एकद्रव्यमिति। भोजने तु नायं द्रव्यनियमः। अपि तु होम एव। तथा च वृत्तौ। अ
ष्टकादि चतस्रस्तु पूर्वाह्णानि तथैव च। द्रव्यत्र यस्यां चैकत्वान्न यथासंख्यसंभवः। श्रये
ष्टकं च पूर्वं चरुः। त्रीणि द्रव्याण्यथापि वा। अष्टपद्रव्यमेवैकं नान्यव्याख्यानकल्पनेति।
इदमत्र गत्यं। हेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टका एकस्यां वे
ति। अस्यार्थमाह नारायणः। हेमंतशिशिरावृतू। अपरस्याः कृष्णपक्षाः। अष्टकाइति क
र्मनाम। एतदुक्तं भवति। मार्गशीर्षादिमासेषु ये कृष्णपक्षाश्चत्वारः। तेषु याश्चतस्रोऽष्ट
म्यः। तास्वष्टकाः कार्या इति। यदि ऋतुद्वयमध्ये मलमासो भवति। तदा तस्मिन्मासे
कर्तव्यमित्येवमर्थं चतुर्ग्रहणं। अपि च। बहुवचनस्य त्रित्वे वचरितार्थत्वात्संवत्सर
दर्शनाच्चतुर्ध्वमाग्रहायण्याः। तिस्रोऽष्टका इति तन्निवृत्त्यर्थं च तुर्ग्रहणं। एकस्यां वा। एत
स्यामेव वाष्टकाः कार्याः। चतस्रः पुनर्वा विकल्प्यन्त इति अष्टमीग्रहणमुपलक्षणं। अष्टकाश ११९
ब्देन सप्तम्यादिदिनत्रयसाध्यं कृत्स्नमपि। कर्माभिधीयते। उक्तं च संग्रहे। सप्तम्यादिनव

म्यां तु स्वगृह्योक्तविधानवत्। अष्टकाकर्म कुर्वीत कृष्णपक्षचतुष्टय इति। ॐ शक्तं प्र
ति तत्रैवोक्तं। चतुर्ष्वपरपक्षेषु यदि कर्तुं न शक्नुयात्। माघे कृष्णाष्टकां कुर्यात्स्वगृह्योक्तवि
धानत इति। शौनकोऽपि। माघमास्यसिते पक्षे याष्टमी समुपस्थिता। श्राद्धं तत्राष्टकाना
म स्मर्यते श्रुतिनोदितमिति। बृहस्पतिरपि। कृष्णपक्षेषु माघस्य मैत्रादित्रिषु भेषु च। गु
तिथयः सप्तमीपूर्वाः पितृणां तृप्तिदाः सदेति। आपस्तंबेति। या माघ्याः पौर्णमास्या उपरिष्टा
द्व्यष्टका तस्यामष्टमी ज्येष्ठया संपद्यते तामेकाष्टकेत्याचक्षत इति। ज्येष्ठया ज्येष्ठर्क्षेण यु
क्तेति भावः। नरसिंहोऽपि। माघे ज्येष्ठायुताष्टम्यां विशेषेण सुखं भवेत्। ज्येष्ठयोगे नवम्यां वा
श्राद्धं वृद्धिकरं भवेत्। इति। अशक्तमधिकृत्य सप्तम्यादिदिनत्रयसाध्यकर्माकरणपक्षे केव
लमष्टम्यामेव श्राद्धं कुर्यात्। अष्टमीश्राद्धविधानेनैव। नदातेनैवचरितार्थता। तथा च बोधाय
नः। उपरिष्टान्माघ्याः पौर्णमास्या अपरपक्षस्य सप्तम्यामष्टम्यां नवम्यामिति क्रियेत। पिबा
ष्टम्यामेवेति। यदि तिथित्रयं कर्तुमशक्तस्तदाष्टम्यामेवेति भावः। अत एव नरसिंहः। माघे

Indira Gandhi National
Centre for the Arts

मास्यसितेपक्षेयाष्टमीसमुपस्थिता।अष्टमीत्वष्टकास्यातातांतुकेतोर्भतोत्विदमिति।संग्रहेपि।मा
१४० घेकृष्णाष्टकाकार्मसप्तम्यादित्रिकेसकृत्।अष्टम्यामेववाकुर्यादष्टकास्ति।थिषुत्रिषु।अतःस
प्तमीश्राद्धमोदनादित्रयसाध्यं।अथवाअपूपद्रव्यैकसाध्यमिति।एवंव्यवस्था।केचित्तुओदनः
य सप्तम्यांपायसमष्टम्यांकृसरोनवम्यामितियदेतद्व्याख्यानंतन्नरोचते।तथाचगृह्यसूत्रे।पू
र्वेद्युःपितृभ्योदद्यादोदनंकृसरंपायसंचतुःशरावस्यवापूपानुदीरतामवरउत्परासइत्यष्टा
भिर्हुत्वायावतीभिर्वाकामयतीति।अत्रपूर्वेद्युःपितृभ्योदद्यात्सिद्धान्नभोजनंचदद्यादित्यर्थः।
पितृशब्देनात्रसप्तम्यांपित्रादित्रयमुच्यते।अन्वष्टक्येपिपिंडपितृयज्ञकल्पेनकृत्वापितृ
भ्योदद्यात्स्त्रीभ्यश्चमधिकंअतःपितृभ्योदद्यादितिवाक्यकारसार्थ्यात्।पिंडाभोजनं य
चदद्यादिति।अन्वष्टक्येपिपिंडपितृयज्ञकल्पदृष्टः।तथैवात्रापिसप्तम्यांपिंडपितृय
ज्ञविधानेनभवति।अत्रभोजनेपितत्रस्यापेक्षितत्वाच्चभोजनंपैतृकमिति।कृत्वापार्वण १४०
मेवतंत्रंपरिगृह्यते।अतःपरंप्रकृतमुच्यते॥पूर्वाह्णेनाथयथासंख्यंद्रव्याणांचेतिकेचन।३६।

ओदनस्तुप्रसिद्धस्यात्पायसस्तुपयसाघृतः।ओदनस्तिलमिश्रस्तुकृसरःपरिकीर्तितः।३७॥
तिलकल्कान्विनिक्षिप्यघृतोवाकृसरोभवेत्।अस्यार्थः।सप्तम्यादिदिनानांत्रयाणांओ
दनादित्रयाणांचकेचित्तुयथासंख्यमाहुः।ओदनःप्रसिद्धःस्तुपायसस्तुदुग्धेननि
ष्पन्नः।सोपिप्रसिद्धः।कृसरस्तुतिलमिश्रओदनःनिष्पन्नः।ओदनेतिलप्रक्षेपःतदाकृ
सरोभवति।अथवाश्रपणकालएवतंडुलमध्येतिलकल्कान्प्रक्षिपेत्।तथाभूतःकृ
सरइतिवा।कृत्वेध्माधानपर्यंतंपितृयज्ञविधानतः॥३८॥वासःप्रदानपर्यंतंश्राद्धपा
र्वणवद्भवेत्॥अस्यार्थः।कर्मांगहिरण्यंचस्यपाणानायस्यअग्निप्रज्वाल्यतिथ्यादिसं
कृत्वाएवंविशिष्टायांतिथौअस्मत्पितॄणामतिशयतृप्तिसंपादनार्थंआत्मनःवेदोक्त
फलसिध्यर्थंअष्टकाकर्मकरिष्ये।तत्रादौसप्तमीश्राद्धविधिकरिष्ये।प्रतिज्ञायप्राक्
दक्षिणाग्रैकैर्दर्भैःपिंडपितृयज्ञवदग्निंपरिस्तीर्यपात्रासादनार्थंतद्देवदर्भानास्ती
र्येतेषुस्थाल्यादीनिपात्राण्यासाद्यउत्तरंचकर्मतथैवकृत्वाओदनंकृसरंपायसंश्रपयि

Indira Gandhi National
Centre for the Arts

त्वा तद्दद्दैवद्ध्याधानपर्यंतं कुर्यादिति। तथैवात्र तिलायद्दक्षिणहानादि कृत्वा षष्ठो चादिवि
१४१ धिनः कृत्वा आच्छादनपर्यंतं तथैव पार्वणवत्कृत्वा अग्नौकरणं कुर्यात्। तत्प्रकारमाह॥
ओदनाद्युद्धृत्य पृष्ठोक्तः दर्व्वं च द्विजेः। सोमायेत्यनयोर्स्थाने कृत्वाहाभिरुदीरतां अं
भरानादि नि इत्यादुक्तौ संपन्नमित्यथ॥४०॥ अस्यार्थः। अग्नौकरणसमये तथैव दर्व्वी
क्रमकारेण पृष्ठोक्तेः सन् सोमायेत्यनयोर्मंत्रयोस्थाने उदीरतामवर उत्परास इत्य
ष्टाभिर्ऋग्भिः अवदानधर्मेण जुहुयात्। स्वाहाकारेण। इदं मंत्रगृह्य। उदीरतामव
र उत्परास इत्यष्टाभिर्हुत्वा यावन्नीभिर्वाकामयीतेति। अस्यार्थो वृत्तिकारेण निरूपितः।
ओदनादिभ्यस्त्रिभ्योन्नमुद्धृत्याक्तमनुज्ञापयति। अग्नौकरणमंत्रस्थाने उदीरतामव
र इत्यष्टाभिर्यावतीभिराधिकाभिः पितृलिंगकाभिश्च ऋग्भिर्वा हुत्वा मेक्षणम
नुप्रहरेत्। एवमग्नौकरणं कृत्वा भोजनपात्रेषु अन्नपरिवेषणादि भोजनावसान १४१
संपन्नेवचनांतं पार्वणवत्कुर्यात्। उद्धृत्य भुक्तशेषान्नं निदधाति न तत्रयेः। स्वास्ता

त्रोत्सर्गपर्यंतं श्राद्धशेषं समापयेदिति॥ इति सप्तमीश्राद्धविधिः॥ पूर्वेद्युः कर्म कथित
मष्टकाकर्म कथ्यते। अष्टम्यां पशुना कार्या स्थालीपाकेन वाष्टका॥ स्थालीपाकप्रयो
गस्कृत तत्ताव संप्रयोच्यते। पूर्णपात्रनिधानांतमन्वाधानादि पूर्ववदिति॥४३॥ अस्यार्थः।
प्रधानभूतमष्टकाख्यं कर्म अष्टम्यां उच्यते। अष्टकाविधानमष्टम्यां पशुकल्पस्थालीपा
केन वा कुर्यात्। तत्र पशुकल्पविधानं श्रौतं भवति तस्मान्नोच्यते। स्थालीपाकविधा
नमेवाच्यते। कर्ता आसने उपविश्य प्राणानायम्य तिथ्यादि स्मृत्वा अष्टकाश्राद्धा
गभूतं स्थालीपाकं करिष्ये। तदंगमन्वाधानं करिष्ये इत्यन्वाधाय पूर्णपात्रनिधा
नांतं पूर्ववत्कुर्यात्। मंत्रोक्तदेवतानां तु तूष्णीमेवाथ निर्वपेत्। चतुरश्च तु रोमुष्टीन्
प्रोक्षणे च तथा भवेत्॥४४॥ सहैव श्रपयेदत्र नास्ति युद्धरणं ततः। आदिष्टमंत्रहोमेषु
सर्वत्रैवं प्रतीयतामिति॥४५॥ अस्यार्थः। यत्र यत्र वैदिकमंत्रैर्होमस्तत्र होमार्थं सहैव
श्रपणं भवति युद्धरणमपि नास्ति निर्वाप प्रोक्षणे च तूष्णीमेव भवतः। एवं पूर्वोत्तरत्रा

Indira Gandhi National
Centre for the Arts

पि सर्वत्र प्रसेयं तव्यं। तत्र आज्यभागपर्यंतं स्थालीपाकं कृत्वा वक्ष्यमाणमंत्राभिर्मंत्रैश्चरुं जुहोति।
१४२ तानेव मंत्रमाह। अग्नेनय सुपथा राये अस्मानिति द्वे ऋचौ ॥ यो ग्निर्हव्याहेम इत्यादयः पंच अष्ट
कारवंडे उक्ताः। अविज्ञातः सूत्रगतो मंत्रः तत्र स्वरसंदेहः। एकश्रुत्येव पठितव्यो भवति॥
सौत्रद्रूपलक्षणं। स्वरापरिज्ञानमात्रेप्येवमेव पाठः। ततः स्विष्टकृतं हुत्वा होमशेषं स
मापयेत्। अथवा श्राद्धदिनदानांतं ह श्राद्धं पार्वणवद्भवेत्। उद्धृत्य उद्धृत्य भोजनार्था श्राद्धे
कृत्वाथ पाणि॥ सोमायेति तु मंत्राभ्यां मेक्षणेन करेण वा॥४९॥ एकैकमाहुतिं के विद्विग
स्येव प्रजुहुती ति। अस्यार्थः। ततः स्विष्टकृतं हुत्वेत्यत्र स्विष्टकृतमिति अग्नेर्विशेषणं स्विष्टकृ
त। सम्यक्हुत्वेत्यर्थः। होमशेषं समापयेत्॥ समाप्ते होमे आचमनादि सर्वं पूर्ववत्कृत्वा प्रधान
भूतमष्टकाश्राद्धं करिष्य इति प्रतिज्ञाय क्षणदान विप्रपादप्रक्षालनादिकं श्राद्धमाद्यानां
तं पूर्ववत्कृत्वा। अग्नौकरणावसरे त्र पिंडपितृयज्ञनास्तीति कृत्वा श्राद्धपाकादेव समु १४२
धृत्य प्रश्नमाहित्येनैव अवदानधर्मेण सर्वविप्रपाणिषु पूर्ववत् मेक्षणेन करेण वा जुहुया

त्। केचित्तु एकमाहुतिं गृहीत्वा एकैकविप्रहस्ते जुह्वति। प्राशितेषु हुते घन्ये घन्यदन्नं
दद्यात्पृथक् ॥५०॥ उदीच्याः प्राङ्गरत्रैवं न प्राश्नीयात्करे हुतं। निधाय तद्धुतं पात्रे आचम्या
प विशेदिति॥५१॥ अस्यार्थः। विप्रपाणिषु हुतेषु अन्नेषु विशेषे भक्षितेषु सत्सु अन्यद
न्नं परिवेषणीयमित्यर्थः। अत्र भक्षणविषये उदीच्यदेशीयाः आचार्याः पाणिहुतमन्नं
ब्राह्मणा न भक्षयंति त्याहुः। तत्पक्षे कथमित्यत्र आह। तत्पाणिहुतं स्वभोजनपात्रे नि
धाय। आसनदेशात्किंचिद्दूरं गत्वा आचम्य पुनरागत्य स्वासने उपविशेत्। संपन्नवचनां
तं स्यात्तच्छेषं पिंडार्थमुत्थरेत्। ब्राह्मणानां समीपे तु पिंडनिर्वपणं भवेत्॥५२॥ नका
र्यमाग्निं मत्येयादित्याद्यत्र तु कर्मणि। प्रागाद्येन मध्यमं पिंडं श्राद्धशेषं समापयेत्॥५३॥ संप
न्नवचनपर्यंतं श्राद्धविधानं कृत्वा भुक्तशेषं पिंडार्थमुद्धृत्य ब्राह्मणसमीपे पिंडदानं कुर्या
त्। अस्मिन्कर्मणि विद्यमाने प्यग्नौ अग्ने तमद्याश्वं न स्तोमैरित्यादिभिर्मंत्रैः अग्न्युपस्था
नेन कार्यं कृतं। यत्र पिंडपितृयज्ञविधानं नास्ति तत्राग्निं मत्येयादि। तेनास्ति। पाणि

Indira Gandhi National
Centre for the Arts

होमं तथ्रश्च नास्ति। एवं सर्व तज्ञातव्यं। मध्यमं पिंडं पत्न्यै प्रयच्छति। सा पत्नी पिंडं गृहीत्वा प्रा
१४२ शयेत्। पूर्ववदन्यत्सर्वं श्राद्धशेषं समापयेत्। इत्यष्टमी विधिः॥ अन्वष्टक्यं च पूर्वेद्युर्मा
सि मासि च पार्वणं। चतुर्ष्वग्निहोमस्यात्पिंडश्चाग्निसमीपतः। काम्यमभ्युदयेष्टम्यामे
कोद्दिष्टं तथाष्टमं। चतुर्ष्वेषु करे होमः पिंडाश्चा ब्राह्मणांतिके॥५५॥ पिंडनिर्वपणं केचि
न्नेच्छंत्यस्मिंश्चतुष्टये। अन्वष्टक्यं भवेत्कर्म नवम्यां पितृयज्ञवदिति॥५६॥ अस्यार्थः॥
अग्निहोमपाणिहोमयोर्व्यवस्थामाह। अन्वष्टक्यं अष्टकायामनु अन्वष्टक्यं नवमी
श्राद्धं पूर्वेद्युः सप्तमीश्राद्धं मासि मासि प्रतिमासं कृष्णपक्षे कस्मिंश्चिद्दिने मा
ध्यं। वक्ष्यमाणं चतुर्थे पार्वणं दर्शश्राद्धं। एषु श्राद्धेषु तापीना मध्ये होमः। पिंडानां प
श्राद्धसमीपे बर्हिषि दद्यात्। अथाद्येष्वेव चतुर्थेष्वेव पिंडपितृयज्ञाद्यधानत्वाद्भिर्भवति।
काम्यं पुत्रधनादिकामनया क्रियमाणं। अभ्युदयो विवाहादिषु क्रियमाण वृद्धिश्रा १४३
द्धं। अष्टम्यामष्टमीश्राद्धं। एकोद्दिष्टमेकमुद्दिश्य क्रियमाणश्राद्धं। एषु चतुर्षु पाणि

होमः। तथा द्विजसमीपे आस्तीर्णबर्हिषि पिंडनिर्वपणं। अस्मिन्काम्यादिचतुष्टयेपि
उद्दाने केचिन्नेच्छंति। तत्पक्षेनु पिंडदानमेव भवति। इतरत्सर्वमर्घ्यदानादि कृत्यं पाणि
होमश्च सर्वं भवत्येव। केचित्तु अत्रैव निरूपितत्वात्। एकोद्दिष्टे नावाहनं नाग्नौकर
णमिति यदाहुः। तत्राग्नौकरणशब्देन अभावे च होमस्य निषेधः पाणिहोमस्तु कर्त
व्य एव। काम्यादेकोद्दिष्टांतेषु पाणिहोमस्याविषयत्वात्। अन्वष्टक्यमिति। अन्वष्टक्य
कर्म नवम्यां भवेत्। अन्वष्टकायाः अनुपश्चात्। क्रियमाणं अन्वष्टक्यं तद्वत् पिंडपितृ
यज्ञवदित्यर्थः। दक्षिणाप्रणेयवह्निं निधाय ज्वलयन् तं। त्रिः परिस्तीर्य तं दर्भैः समंत्रं
प्रदक्षिणं॥५७॥ अतिप्रणीत वह्नेश्च भवेदेव परिस्तृतिः। अकंपयन्नि द्कुर्यात्परिस्त २
रणमतंत्रतु॥ अस्यार्थः। तत्र प्रथमं प्रदक्षिणा प्रवणे देशे अग्निं स्थापयित्वा तमग्निं प्र
ज्वाल्य आचमन प्राणायामादि कृत्वा समंत्रं दर्भैः प्रदक्षिणं तमग्निं त्रिः परिस्तीर्य
अत्र परिस्तरणमकंपयन्करोति। अकंपनं नाम आस्तरणोपयोगिमात्रं दक्षिण

Indira Gandhi National
Centre for the Arts

करकंपनं कुर्यात्। इतरावयवचालनं न कार्यमित्यर्थः। तथैव पात्रासादनार्थं दर्भानास्तीर्येत

१५५ थेवार्थान्। स्थाल्यादीन्यासादयेत्। ओदनं कृसरं चैव पायसं श्रपयेत्तथा। कुर्वीत दधिमंथाख्यं

मधुमंथाख्यमेव च॥ ५९॥ श्रपयित्वा चरून्नग्नौ दधिमंथमधिश्रयेत्॥ सक्तवो दधिमिश्राश्च

दधिमंथाः प्रकीर्तिताः॥ ६०॥ मधुमंथाः प्रकीर्त्यन्ते मधुमिश्राश्च सक्तव इति। अस्यार्थः। च

रुश्रपणकाले ओदनं कृसरं पायसमिति द्रव्यत्रयमग्नौ श्रपयेत्। ततः दधिमंथद्रव्यम

धुद्रव्यं च उभरत्रोपयोगार्थं पात्रद्वये स्थापयेत्। ततः अग्नेः सकाशादुल्मुकं गृहीत्वा य

थापूर्वमतिप्रणीतं स्थापयित्वा अतिप्रणीताग्नेरपि भवेदेव परिस्तरणमिति इहैव कथि

तत्वादतिप्रणीतं च ब्रिः परिस्तृणाति। अस्मिन्नेवाष्टकाश्राद्धे अंकपयनपरियन्परिस्तृणी

त्यादिति नियमः। चरुत्रयश्रपणानंतरं दधिमंथद्रव्यं मधुमंथद्रव्यं च तत्र समीपे अधि

श्रपयेत्। दध्नामिश्राः सक्तवो दधिमंथद्रव्यं। मधुना मिश्रिताः सक्तवः मधुमंथद्रव्यं। कुर्या १५५

त्तु खे अवस्तीर्य मरुद्भिन्नद्वयेन ना॥ ६१॥ अभिघार्य क्रमेणैतानुद्वासयति पूर्ववत्॥ मात्रा

द्यर्थं पृथक्कुर्यात्क्रिपुंसापवर्हणं। कृत्वेध्माधानपर्यंतं ब्राह्मणानुपवेशयेत्। कांश्चि

द्विप्रान्पितृश्राद्धे स्त्रीश्राद्धे कांश्चिदेव तु॥ ६२॥ अस्यार्थः। ततस्तेनैव मंत्रेणोलेखाद्दयमु

ल्लिख्य प्रोक्ष्य तत्र पूर्ववद्दर्हिरास्तीर्य निष्पन्नानेतांश्चरून्पूर्ववदभिघार्योद्वास्या

ग्नेः पश्चात्क्रमेण स्थापयित्वा पित्राद्यर्थं कशिपूपबर्हणं संपाद्य मात्राद्यर्थं च संपादये

त्। ध्रुवायामाज्यसेचनं अंजनाभ्यंजनादिकं च सर्वं संपाद्य इध्महोमांतं कृत्वा श्राद्धार्

थं कुर्यात्। प्रतिज्ञाक्षणादि सर्वं कृत्वा आसने ब्राह्मणानुपवेशयेत्। तत्रापि पित्राद्यर्थं

कांश्चिन्मात्राद्यर्थं च कांश्चित् एवमुभयार्थं ब्राह्मणानुपवेशयेदासनादि दद्यात्। नो

हेन्मात्राद्यर्घपात्रेषु तिलावापे पितॄन्पदं। अपःप्रदानमंत्रेषु मात्रादिपदमावपेत्॥ ६३॥

दद्यात्पिंडान्पितृभ्यश्च मात्रादिभ्यो ददात्यथ। मातृपिंडेषु निनयेत्स्कराभाचाममेव वा॥

॥ ६४॥ ओदनाग्रद्रव्याकुराचामहिमनीषिणाइति॥ अस्यार्थः। केषांचिन्मते हविषश्च

तुष्टयादेकस्मादेकस्मात् आकुतिद्वयद्वयं ताभ्यामेव मंत्राभ्यां होतव्यमिति। तसक्षे

Indira Gandhi National
Centre for the Arts

अष्टाकुलयो भवंति। अन्नशालं भोजनादि पूर्ववत्संपन्नवचनांतं कृत्वा ब्राह्मणभुक्तशेषान्नमुद्ध
१४५ त्य पंचभिर्द्रव्यैः सह एकीकृत्य पिंडदानं कुर्यात्। तत्र शुंधंतामिति मंत्रेण प्रथमरेखायामपि
तारीनामुदकसेचनं कृत्वा तथैव पाचायर्थं द्वितीयरेखायामुदकसेचनं कुर्यात्तत्र शुंधंतां
मातर इत्यूहः कर्तव्यः। अनंतरं पितॄणां पिंडदानं कृत्वा मातॄणामपि दत्वा पुनरपि पिंडस्यो
परिसेचनसमये मातृपिंडेषु स्रुवा आचामं वा निनयेत्। अत्र स्रुवानिनयने कृते निषि
द्धमिति। आचामानिनयनमेव विहितं। अत आचमस्वरूपमाह। ओदनायुद्भवमिति। चरु
श्रपणसमये स्थाल्यां उदकं तथा देयं। यथा निष्पन्ने ओदने तास्मे व स्थाली मध्ये नीला पात्रांतरं
णतदयद्भवं मंडे गृहीत्वा तेन शुंधंतामिति मंत्रत्रयेण मातृरेखा सिंचेत्। इति वेद विद आहुः।
इदमत्रगत्यं। स्त्रीभ्यश्च स्रुवा चाचाममित्यधिकं कष्टं बके द्वयोः षट् स्रुवा पूर्वोक्त पित्र्याद
घादपरास्त स्त्रीभ्य इति। स्त्री द्वित्वे वा बहुत्वे वा तेषां च स्याह इष्यते॥ ७०॥ निर्दिष्टे नाम इति १४५
नीचेह नामानि च बहूनि वा। नाम द्विवचनांतं स्याद्द्वयोरप्येकनाम चेत्॥ ७१॥ नोहे याइतियस्वादं

दृतिकारवचोपस्येति। अस्यार्थः। एतन्नहव इत्यये चत्वा मत्रानु इति मंत्रेण त्रिभ्यः पिंडदा
नेपितृतत्रेयज्ञे दये चत्वा मत्रान्विति मातृभ्यो दद्यात्। तत्र यदि द्वे मातरौ स्यातां बह्व्यो वास्कस्त
दा प्रकारांतरेण मंत्रमाह। मंत्रगतस्यैतच्छब्दस्य ऊहो भवति। एतद्वां यमुनासरस्वत्यो मे चवा
मत्रानु बहुत्वे एतद्वो गंगायमुनासरस्वत्यो ये चत्वा मात्रानु। यदि द्वयोरपि मात्रोः समानमेव
नाम भवति। तदा तदेव नाम द्विवचनांतमुच्चरेत्। यदा बहूनि वा नामानि सामान्येव तदा बहु
वचनं। अत्र ये चत्वा मत्रान्विति स्त्रीविषये याश्च त्वा मत्रान्विति शास्त्रांतरे ऊह सिद्धं ति तु हृति
कारस्य नाभिप्रेतमित्याह। जयंतः स्वामिनः शिष्या ऊहं तिनाकुर्वंति याइति॥ ७२॥ द्वित्वे यु
वां बहुत्वे तु युष्मानिति पदं वदेत्। अनूहेनेव पिंडानां सकृत्स्यादनुमंत्रणं॥ ७३॥ अभ्यंजा
थांपदं द्वित्वे बहुत्वे प्यहूःध्व मित्यथ। द्वित्वं जाया पदं स्याद्बहुत्वे हूध्वं पदं भवेत्॥ ७४॥ अस्यार्थः
जयंतसंप्रदायिनः शास्त्रांतरदृष्टमूहमंगीकुर्वंति। यदि द्वे स्त्रियो स्यातां तदा युवामत्रान्वि
तिरूहः। यदा बह्व्यः तदा युष्मान्त्रान्विति। एवं पिंडदानं कृत्वानुमंत्रणमंत्रमाह। अत्र पि

Indira Gandhi National
Centre for the Arts

तरोमादयध्वमित्यत्र मातृश्राद्धे उहं वर्जं पितॄनेव षट्पिंडानां सकृत्सकृत् तेन मंत्रेण अनुमंत्रणं भव विषये
१४६ ति। अभ्यंजनांजनमंत्रे उहः। पितृश्राद्धे दर्शश्राद्धवत् हंजनादिकं भवति। मातृविषये तु। यत्तदत्त
अभ्यंक्ष्व। तत्र यदि द्वे मातरौ बह्व्यो वा तदा क्रमेण नंदाभद्रे अभ्यंजाथां। नंदा भद्रा कृष्णा अभ्यंग्ध्वं
ध्वं तथैवांजने। विस्पष्टमेतत्। ददाद्दर्शात्मनूहेन मंत्रस्यावृत्तिरिष्यते। अनूहेनैव पिंडांश्च
सकृद्देवोपतिष्ठते॥७५॥ अनूहेनोभयेषां स्यात् पृथक् पक्षप्रवाहणं। पिंडद्वयमनूहेन पत्नीवेशा
त्रायेदथ॥७६॥ स्यात्सात्रोत्सर्गपर्यंतं श्राद्धशेषं समापयेदिति। अस्यार्थः। ततः पितृपिंडे दर्शा
दत्वा मातृपिंडे उहवर्जं तेनैव मंत्रेण दद्यादिति। एवं पिंडदानविधिं समाप्य प्राशनावसरे प
क्तिद्वयस्य मध्ये पिंडद्वयमूहवर्जं तेनैव मंत्रेण प्राशनं भवति। इत्यादि द्रष्टव्यं। ततः श्राद्धे उ
त्सर्गपर्यंतं श्राद्धविशेषं समापयेदिति। अत्र भगवान्। नवम्या मास्वरे छाग अन्वष्टक्याभि
धानकं। तत्पिंडपितृयज्ञोक्तप्रकारेण समापयेत्। निमंत्रणादि विप्राणामर्घ्यदानावसानकं। १४६
अनाहिताग्नेः कर्तव्यं पार्वणश्राद्धवदाचरेत्। तत्र यद्यष्टकापूर्वपशुकल्पेन कल्प्यते। तदानस्य पशो

इ

मांसं सुप्रयुक्तावशेषितं। विप्राणां भोजनार्थाय किंचिद्दत्त्वाप्युपानयेत्। न तु होमाय मांसेन
होमो नास्त्यत्र कर्मणि। दक्षिणावनते देशे स्थंडिलं परिकल्पयेत्। परिश्रयेच्च तं देशमथ
वान परिश्रयेत्। परिश्रयणपक्षे पुरुकः तद्वारमुत्तरे। मूलेन कल्पिते दर्भैरधस्तात्सरिक श्र
ल्पिते। अप्रदक्षिणमत्रापि त्रिः परिस्तरणमाचरेत्। श्रृताश्च कृसरान्नं च पायसं दधिसक्त
वः। मधुमंथास्तथेत्येवं पंचान्नचरवः स्मृताः। सक्तवो मिश्रिता दध्ना दधिमंथा इति स्मृताः।
मधुमंथैर्विनान्येषां चतुर्णां होम इष्यते। केवलं पिंडदानार्थं मधुमंथपरिग्रहः। तत्र शुद्धोद
नारी स्त्री स्वर्वेदोपासनानले। तत्रैव दधिमंथानप्यधिश्रित्याभिघारयेच्च। उत्तरत्राववतार्याग्नेः पु
नरत्याधेतिधारयेत्। एवमेतानि चत्वारि हवींषि तु यथाक्रमं। पश्चिमेऽग्नेः परिस्तीर्णदर्भेष्वेव
विनिक्षिपेत्। लेखावल्लेखनवेलायां द्वे लेखे उल्लिखेच्च याः। पितॄणां पिंडदानार्थाय पूर्वां स्त्रीणां तु
पश्चिमा। उभे च सकृदाच्छिन्नैः स्तीर्णे प्रच्छादयेत् क्रमात्। यदा पिंडप्रदानार्थमवटद्वितयं ख
नेत्। रेखाद्विनयत्पूर्वपश्चिमस्थे यथाक्रमं। कुर्यान्नेव यथाकारे यदि वाप्यवटानि पद्माकल्पये

Indira Gandhi National
Centre for the Arts

तेषु पूर्ववत्र पित्रर्थमवटत्रयं । कुर्यादुत्तरस्वरूपाणि कल्पयेदवटानि षट् । कल्पयेत्पृथगेवैषा
१४७ कशिपुं सोपबर्हणं । होमकाले चरून्न्यान्मधुमंथविवर्जितान् । उद्धृत्य पात्रेष्वन्येषु पृथ
भित्वा चसर्पिषा । अवदायानुपूर्व्येण पार्वणश्राद्धहोमवत् । जुहुयात्समनुज्ञाप्य पित्रार्थं
ब्राह्मणान्वृतान् । अथ ता भोजयेद्विप्रानन्नमास्फल्य यथातथा । भुक्तवत्स्वथ विप्रेषु पिंडा
न्दद्याद्यथाविधि । तत्र प्रकल्पयेत्षट्पिंडान्मधुमंथविमिश्रितान् । त्रीस्त्रीन्पिंडान्पितृभ्य
श्च स्त्रीभ्यश्च निर्वपेत्क्रमात् । दद्यात्पितृभ्यः पूर्वत्र तथा स्त्रीभ्यस्तु पश्चिमे । पिंडान्पृथक्पृ
थक्दद्यात्लेखयोरवटेषु च । स्त्रीपिंडदानमंत्रेणामूहं च परिकल्पयेत् । पुंर्धनामातरः
तिप्रकारेण यथार्हतः । एकत्र पिंडभागिन्यो द्वे स्यातां यदि तत्र तु । एतद्वां रुद्रदे यज्ञे दे पिंडं
याश्च वामनु । याश्च ब्रूयादथैकस्मिन्पिंडे बह्व्यस्तु थामति । एतद्वो यज्ञदे स्त्री दे रुद्दइद याश्च
ना वोन्विति । स्त्रीपिंडेषु त्रिषु स्त्रगमाचाममधिकं दिशेत् । ॐ द्रस्त्रोदकं प्राकृराचाममिति स्मृ १४७
यः । अंजनादिप्रदाने च स्त्रीणां द्वित्वबहुत्वयोः । यज्ञदे रुद्रदे साधंतमूहं परिकल्पयेत् । एत

द्वो मातरो वासो मातरो युद्ध्वमित्यपि । ऊहं प्रकल्पयेत्स्त्रीणां वासोदानं प्रदापयेत् । उभ
येषां च पिंडानामलंकुर्यादनुमंत्रणं । उपस्थानं च मंत्रेण तथैवस्यादावाहणं । कल्पयेत्पृ
थगेवैषां कशिपुं चोपबर्हणं । नवावरान्द्विजानेषु सर्वकर्मसु भोजयेत् । अत्राष्टौ सप्तपं
च त्रीन युग्मांश्च यथाबलं । सप्तमत्वपक्षे पित्रादि द्वितयस्यत्रयस्त्रयः । वरणीयास्तृतीय
स्य त्वेक एवार्चयिष्यते । अत्राष्टकाप्रकरणे किंचिद्विचार्यते । अष्टकाशब्देन सप्तम्या
दिनवम्यंतं दिनत्रयसाध्यं कर्म । तत्रापि सप्तमीनवम्योः पिंडपितृयज्ञवदितिकं । अष्ट
म्यां तु स्थालीपाकविधानेन श्राद्धं । एवं दिनत्रयेपि अन्वष्टकाशब्दवाच्या नवमी अत्र
सूत्रे कारिकामपि कंठोक्त्या मातृकाश्राद्धे पार्थक्यं नरूपितं तत्र गृह्यं । पिंडपितृयज्ञ
कल्पेन हुत्वा मधुमंथवर्जं पितृभ्यो दद्यात्स्त्रीभ्यश्चेत्यधिकं । एवं गृह्येन्वष्टकाश्राद्धेमा
तृश्राद्धं पृथगिति ब्राह्मणनिमंत्रणं पिंडदानं यथा पित्रादीनां तथा मातृणामिति । उक्त
ले निर्वदानं पृथगित्यनेन । तथात्र कारिकामपि । कांश्चिद्विप्रान्पितृश्राद्धे स्त्रीश्राद्धे कांश्चि

Indira Gandhi National
Centre for the Arts

देवतु। सप्तम्यां तु गृह्यं। पूर्वेद्युः पितृभ्यो दद्यादिति। अत्र सप्तम्यां पिंडपितृयज्ञकल्पः परि
१४८ गृह्यते। शक्यते च गृहीतुं शास्त्रन्यायेन। सप्तमीनवम्योः सामान्यादिहकिमिति न भवति।
तद्यत्रापि पिंडपितृयज्ञकल्पेनेति कस्मान्नोक्तं। अन्वष्टक्ये पुनः स्त्रीभ्योऽप्यधिकमिति
ज्ञापनार्थं। न वैश्वदेवस्य विधानदर्शनात्।। सप्तम्यां तु अमावास्यायां च इपुरोदेशेन पितृय
ज्ञविधानेन श्राद्धं तदत्रापि भवति।। किं च। अंगीकरणे सप्तम्यामष्टम्यां कुतो यः। चतुर्दशा
कृतयो वा। एकैकस्य ब्राह्मणहस्ते भवंति। अन्वष्टक्येति तत्रोक्तमेव द्रव्यं गृहीत्वा आकु
र्वीत यद्भवतीत्येवंरूपविशेषज्ञापनार्थं। एवमत्र भेदो निर्धारितः। शातातपेन तु पद्यद्व
यमुक्तं। अन्वष्टक्ये कासु वृद्धौ च गयायां च मृतेऽहनि। मातुः श्राद्धं पृथक् कुर्यादन्यत्र प
तिना सहेति। अस्य पद्यद्वये अन्वष्टका पदमष्टकापदं च वर्तते। अन्वष्टकानाम नव
मीश्राद्धं। तत्र मातुः पृथक् श्राद्धं। अष्टकानाम सप्तम्यादिनवम्यंतदिनत्रयसाध्यं कर्म १४८
उच्यते। अथवा दिनत्रयमध्येऽपि अष्टमी सा अष्टका अत एव नारसिंहः। माघमास्यसिते प

क्षे याष्टमी समुपस्थिता। अष्टमीत्वष्टका ख्याता तां तु केतोर्मेतां द्विदमिति। अत्रापि मातृ
श्राद्धं पार्थक्यं न भवति अत्रैव कारिकायामष्टमीश्राद्धे सति स्थालीपाके। अथ स्विष्ट
कृतं हुत्वा होमशेषं समापयेत्। अथाज्याहनदानान्तं श्राद्धं पार्वणवद्भवेदाइति वचना
त्। षट्पुरोडाशेनैव भवति। पार्वणवद्भवेदित्यत्र पार्वणदर्शश्राद्धं तत्र च षड्दैवत्यं त
दाह गौतमः। पितरो यत्र पूज्यंते तत्र मातामहा अपि। अविशेषेण कर्तव्यं विशेषान्न
रकं व्रजेदिति। अतः कुत्र पार्थक्यं मातुः श्राद्धे अष्टकासु च वृद्धौ चेत्यादिवाक्यपा
र्थक्यं निरूपितं शातातपेन तन्निवारयितुमशक्यं। यद्येवं व्याख्या क्रियते। अत्राष्ट
काशब्दः अन्वष्टकोपलक्षणार्थः। अष्टकाकर्मनाम तत्रान्वष्टक्ये गृह्यकारिका
यां च स्मृतिशास्त्रांतरेऽपि च स्त्रीणां पार्थक्यं प्रतिपादितं श्राद्धे अत एव न विरोधः।
यत्रान्वष्टकादौ श्राद्धे मातुः पार्थक्यं तदा तत्र श्राद्धं नवदैवत्यं भवति। नवदैवत्यश्राद्धे स्त्री
णां कुत्र वा निवृत्ताइति संदेहवाक्यद्वारा निर्णयः क्रियते। तथा च स्मृत्यंतरे। क्षयाहे

Indira Gandhi National
Centre for the Arts

केवलाः कार्यावृत्त्यावाहो प्रकीर्तिताः।सर्वत्रैवमध्यस्थानांस्ताः कार्याः स्मातर इति।श्रुया
१२९ हेकेवलंमातर एवावृद्धौ अभ्युदयिके आहोपंक्तिः अन्वष्टकाचेहोमध्येनिवेशः।किंच।
महालये गयाश्राद्धेवृद्धौवान्वष्टकासु च।नवदैवतमंत्रस्याद्धेषंपार्श्वेषिकं विदुरिति।
वचनात्।अन्वष्टक्यमध्य एवनिवेशः साधितः।मंत्राणामूहविषये किंचिदत्र प्रदर्श्यते।
स्यार्घ्यपात्रतिलावपनेतिलोसीतिमंत्रे पितृशब्दउहो न कार्यः।प्रकृतावसमर्थत्वात्।
पार्वणं हि तस्य प्रकृतिः।तत्र पित्रादयस्त्रयो भवंति।तत्र पितृशब्दस्त्रियं बकुपसमर्थः।
अत्र पितृशब्दः सामान्यवाचकः।अत एव पितृशब्दोच्चारणमात्रेणापि न रोमातरः
पितृव्यादय आयांति।तथा च संग्रहे।आयांतु नस्तिलोसीति उशंतस्त्वेतिया निनु॥
केवलः पितृशब्दः स्यात् पितृसामान्यवाचक इति।पार्वण्यप्रसंगेन मया पूर्वमभिहि
तं।तथाप्यत्र सूचना कृता।अत्र विश्वेदेवौ कामकालौ।तथा च शंखः।इष्टिश्राद्धे क्र- १४९
तुर्दक्ष अष्टम्यां कामकालको।नांदीमुखे सत्यवसू काम्ये च धूरिलोचने।पुरूरवार्द्र

वौचैवपार्वणे समुपस्थितौ।नैमित्तिके कामकालावेवं सर्वत्र कीर्तयेत्।नैमित्तिकं
सपिंडीकरणं।इति नवमीश्राद्धविधिः॥एवं सप्तम्यादि दिनत्रये साध्यमष्टकाकर्म स
माप्तं॥अथ भाद्रपदमासि महालये॥अपरपक्षे कृष्णाष्टम्यां तु नरष्टकाविधानेन
माघवर्षाख्यः श्राद्धविशेष उच्यते।अष्टकाकर्मवत्कार्यं सप्तम्यादिष्वहःसु तत्॥७०।
अस्यार्थः।एतानि कृत्स्नकर्म उक्तेनैवाष्टकाविधानेन समानमिति तदपि सप्तम्यादि
दिनत्रयसाध्यमिति भावः।माघ्यावर्षमिति नामभेदः।अत्र भर्वागन्।एतेनैव प्रका
रेण माघ्यावर्षाभिधानकं।श्राद्धं प्रोष्ठपदे मासे कृष्णपक्षे समाचरेदिति॥इति माघ्या
वर्षं॥अथ माघ्यावर्षे॥माघ्यावर्षं नभस्य कृष्णपक्षे हि कुत्रचित्।अन्वष्टक्यवद्वेवस्या
त्पार्वणं वेति केचनेति॥७१॥अस्यार्थः।तस्मिन्नेव भाद्रपदापरपक्षे कस्मिंश्चिद्दिने अ
न्वष्टक्यविधानेन माघ्यावर्षनामश्राद्धं कुर्यात्॥केचन पार्वणवेहिवदंति।पार्वणप्र
कारेण कुर्यादित्यर्थः॥इति माघ्यावर्षं॥ ॥अथ प्रतिमासमपरपक्षे कर्तव्यं मासि

Indira Gandhi National
Centre for the Arts

श्राद्धं॥ प्रतिमासमभवेत्कृष्णपक्षे युग्मेऽह्नि कुत्रचित्॥ पितृभ्य एव तच्छ्राद्धमन्वष्टक्यविधा
१५० नतः॥८०॥ अस्यार्थः। सर्वदा प्रतिमासं कृष्णपक्षे कस्मिंश्चिद्विषमदिने पित्रर्थमेव श्रा
द्धं कर्तव्यं॥ अन्वष्टक्यविधानवदिति। पिंडपितृयज्ञसममेतदिति भावः। अन्वष्टक्ये तु
मात्रादिभ्यो पि दीयते। तदत्र न कर्तव्यमिति विशेषः। पिंडपितृयज्ञसाम्यात्। षट्पुरु
षोद्देशेन कर्तव्यमिति सिद्धं। एतदर्थमत्र च पितृभ्य एवेत्याह। अन्वष्टक्यं च पूर्वेद्युर्मासि
मासि च पार्वणमिति। मासिश्राद्धं यदुक्तं तदेतदेव प्रत्येतव्यं। इदमत्र गृह्यं॥ एतेन मा
घ्यावर्षं प्रोष्ठपद्या अपरपक्षे मासि मासि चैवं पितृभ्यो युक्तः प्रतिष्ठापयेदिति जयंतः।
मासे मासे वापरपक्षे ऊर्ध्वं चतुर्थ्याः कस्यांचित्तिथौ अन्वष्टक्यवन्मासिश्राद्धं भवति। अ
न्वष्टक्यवन्मासि कार्यं पार्वणं वा उभयोरेतस्य पार्वणस्य च विकल्पः। पार्वणपक्षे पि
प्रोष्ठपद्या अपरपक्षे पितृदेव भवति। न पार्वणं। एतेन माघ्यावर्षं प्रोष्ठपद्या अपर १५०
पक्ष इति वचनसामर्थ्यात्॥ यथा हेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्व

ष्टका अष्टम्यां वेति। अष्टकाप्रकारः क्रियते। तद्वदाद्य पदापरपक्षे अष्टम्यां क्रियमाणं श्रा
द्धं माघ्यावर्षसंज्ञं भवति। प्रतिमासमपरपक्षे चतुर्थ्या ऊर्ध्वं अयुग्मासु तिथिषु क्रिय
माणं श्राद्धं माघ्यावर्षमिति संज्ञां लभते। पार्वणविधानेन क्रियमाणमस्य माघ्यावर्ष
मासि मासि श्राद्धनामिति यानेव विशेषः॥ इति मासिश्राद्धं॥ ॥अथ काम्यश्राद्धं॥
पंचम्यां पुत्रकामस्येत्यादि काम्यानदुच्यते। श्राद्धं यदुक्तमष्टम्यां तद्देवतदिष्यत इति।
॥८१॥ अस्यार्थः। पुत्रधनादिकामनया पंचम्यां पुत्रकामस्येत्यादिवचनात्। काम्यश्रा
द्धं। तत्राष्टकाविधाने अष्टम्यां यच्छ्राद्धं विहितं तेन सदृशं कार्यमित्यर्थः। सादृश्यं तु के
तिपयगुणविषये। यथा अष्टम्यां पिंडपितृयज्ञो नास्ति श्राद्धीयाग्नेन द्विजपाणिहो
मः। द्विजे समीपे पिंडनिर्वपणमिति। तथैव काम्यश्राद्धे पिष्यतव्यमित्यर्थः। तत्रा
ष्टम्यां स्थालीपाकविधानं श्राद्धात्पूर्वमस्ति मंत्रैरष्टाहुतिहोमश्च। तच्च काम्यश्राद्धे न
कर्तव्यमिति गृह्यविदः। विकल्पः पार्वणस्यास्य मासिश्राद्धस्य चेष्यते। काम्यश्राद्धे

Indira Gandhi National
Centre for the Arts

कृतेनैव कार्यं मासि च पार्वणे॥८२॥ अष्टमीश्राद्धं न कुर्याद् दाहिताग्निः स्वपार्वणमि
१५३ ति। दर्शे विहितं यत्पार्वणश्राद्धं तस्य मासिश्राद्धेन सह विकल्पोऽनुष्ठेयः। द्वयोर्मध्ये
एकतरानुष्ठानेन कर्मसिद्धिरिति। पंचम्यां पुत्रकामस्येत्यादिविहिते काम्यश्राद्धे कृते
सति मासिकपार्वणे नैव कार्ये। काम्यश्राद्धेनैव उभयोश्चरितत्वात्। यदा काम्यश्राद्धं
मासिश्राद्धं वानयोरेकं क्रियते तदा दर्शे केवलं पिंडपितृयज्ञं समाप्य पश्चात्केवलमेव
श्राद्धं कुर्यात्। तच्चाष्टमीश्राद्धवद्भवति। तथाविधं पार्वणश्राद्धं कर्तव्यमिति भावः। त
थाच शौनकः। काम्यश्राद्धमहं वक्ष्ये शौनकात्रऋषिसत्तमः। नापुत्रस्य लोकोऽस्तीति
श्रुतिरेषा सनातनी। देवतानामृषीणां च पितॄणामनृणः स्मृतः। ऋषिभ्यो ब्रह्मचर्येण
पितृभ्यश्च सुतेन तु। कुर्याद्यज्ञेन देवेभ्यः श्रोत्रितं धर्ममाचरन्। तस्मादृणापकरणं
पितॄणामिह कुर्वतां। कन्यागतो यदादित्यः कृष्णपक्षेऽथ पंचमी। श्राद्धमत्र गृही कु १५२
र्यान्मासि मासि च वत्सरं। प्रोष्ठपद्यां हि पंचम्यां पितॄमासान्नमाचरेत्। पार्वणेन विधा

नेन श्राद्धं कुर्यात्समाहितः। यज्ञोपवीती कुर्वीत पुत्रकामो द्विजोत्तमः। तिलार्थं तु यवाश्रा
ध्याय श्रिश्राद्धवदिष्यते। प्रोष्ठपद्यपरे पक्षे पंचम्यामाचरेत्सुधीः। दक्षिणा च प्रदातव्या
स्रुवर्णं वासमेव तथेति॥ इति काम्यश्राद्धं॥ ॥अथाभ्युदयिकं श्राद्धं॥ स्यादाभ्युदयिकं
श्राद्धं वृद्धिपूर्तेषु कर्मसु॥८३॥ प्राङ्मुखश्चोपवीती स्यादुपचारः प्रदक्षिणः॥ तिलकार्यं
यवैः कुर्याद्युग्मान्विप्रान्निमंत्रयेत्॥८४॥ अस्यार्थः। वृद्धिपूर्तेषु विवाह [illegible] वापीकू
पाद्यापनादिषु कर्मसु अभ्युदयिकं श्राद्धं भवेत्। चकारादत्र प्राङ्मुखा द्विजा उदङ्मु
खाः स्युः कर्ता उदङ्मुखस्य कर्तुः प्राङ्मुखब्राह्मणाद्यसंभवात्। उदङ्मुखत्वं गृह्यते। प्राची
मेवोदीचीति न्यायात्। यज्ञोपवीती भूत्वा कुर्यात्। मातृश्राद्धं तु युग्मैः स्यात्स देवं प्राङ्मुखः शु
चिरिति लघुहारीतवचनश्रवणाच्च। उपचारः पूजा प्रदक्षिणं भवति। अत्र युग्मानेव ब्रा
ह्मणान्निमंत्रयेत् तिलकार्यं यवैः कर्तव्यमिति। तदाभ्युदयिकं दिनत्रयसाध्यं। मातृश्राद्धं
च पूर्वेद्युः कर्माहनि च पैतृकं। मातामहं चोत्तरेद्युः वृद्धौ श्राद्धत्रयं स्मृतमिति वचनात्॥

Indira Gandhi National
Centre for the Arts

तराहस्ता नातपः। नित्यश्राद्धमदैवं स्यादेकोद्दिष्टं तथैव च। मातृश्राद्धं तु युग्मैः स्याद्दैवं प्राङ्मुखे
१५२ रिति। योजयेद्दैवपूर्वाणि श्राद्धान्यन्यानि यत्नतः। पूर्वेद्युर्मातृकाश्राद्धं कर्माहे पैतृकं तथा।
उत्तरेद्युः प्रकुर्वीत मातामहजनस्य त्विति। पृथक् दैवमानुष्यीयमानमातृश्राद्धव्यति
रिक्तानि। अभ्युदयानीमगानि श्राद्धानि वैश्वदेवसहितानि कार्याणि दिनत्रयकरणासंभ
वे वृद्धश्रातातपः। पृथक् दिने घ्वशक्तश्चेदेकस्मिन्पूर्ववासरे। श्राद्धत्रयं प्रकुर्वीत वैश्वदे
वं तु तांत्रिकमिति। तदाभ्युदयिकं विना होदिनि मिरं प्रातः कुर्यात्। प्रत्ता। वृद्धिनिमित्तक
मित्युक्तत्वात्। अत्र प्रातः शब्दः सार्धप्रहरात्मकः कालः। न तु षड्घटिकात्मकः। ता।
तदाह गार्ग्यः। ललाटसंमिलिनो यो प्रथमः प्रहरः स्मृतः। स एव चार्द्धसंयुक्तः प्रातरित्या
भिधीयते। अत्र पूर्वोत्तमाताादिमनुष्याः पितृनूर्ध्वमुखदिव्यपितृविशेषणकान्त
त्वात्र दभेदेनार्चयेदिहेमाद्रिणा प्रपंचितं। ऊर्ध्वं वक्त्रारूयत्तत्र ते नांदीमुखसंज्ञिता इ १५२
ति। एते दिव्याः पितरः। मातादयश्च मनुष्यपितरः प्राधान्येनोद्देश्याः नांदीमुखत्वं चन

दभेदेद्दष्ट्वा मात्रादीनां सिद्धं। अतोत्र नांदीमुखानां पितृणामिदमासनं इत्यादिकास्त्वायनीयं प्र
योगवचनं सिद्धं। द्वत्रौ केन प्रजावंतः अश्रुमुखाश्चेति कथयंति। केत्राश्रुमुखाः केन प्रजाव
तः। तथा च ब्रह्मपुराणे। पिता पितामहश्चैव तथैव प्रपितामहः। त्रयोह्यश्रुमुखा ह्येते पि
तरः संप्रकीर्तिताः। तेभ्यः पूर्वतरा ये च प्रजावंतः सुखेधिताः। ते तु नांदीमुखा नांदी सम
द्धिरिति कथ्यत इति। विद्यमानपित्रादित्रयस्य अश्रुमुखत्वं चतुर्थादिलेपनां विषयः।
दुःखभोक्तृतां चतुर्थादय स्तु प्रजावंत एव। आद्यब्रह्मपुराणीये स्तु पितामहा मूर्ध्वं ते
स्तु नांदीमुखास्त्विति प्रसन्नमुखसंज्ञारूमंगलायायतश्रुते। ते तु मोघपदपौर्णमासी
निमित्त एव। श्राद्धदेवताः। न पुत्रजन्मादिकालिके। तेषां महालयप्रकरण एव पठितत्वा
त्। अविद्यमानपित्रादित्रयस्य मात्रादित्रयस्य मातामहादित्रयस्य नांदीमुखत्वं अतस्तन्नि
मित्तकर्माभ्युदयिकश्राद्धं च भवति। अत्र जयंतादिषूक्ताः क्रियंतो विशेषाः प्रदर्श्यंते स्म
यादिवर्जिता विप्रा ये स्त्रुतादिभिरन्विताः। भोजनीया भवेयुस्ते वृद्धिपूर्तादिषु द्विजैः। मन्वा

Indira Gandhi National
Centre for the Arts

द्भिस्मृतो यस्क नियमः पार्वणादिषु। समर्वो मवती हेमाद्रिस्त्यागमभूषणाः। यज्ञोपवी
१५३ तिनः सर्वे मेनत्कर्मभवेदिह। अत्र सर्वत्र युग्मत्वमुपचारः प्रदक्षिणं। तिलकर्मणि सर्व
स्मिन्सर्वैः कुर्याद्विचक्षणाः। इष्यते प्राङ्मुखत्वं च कर्तुरप्युपकल्पते। शुचिर्भूत्वा गृहांग
त्वाभ्येज्य नामयज्जन्मनां। स्वयमेथवा कुर्यादन्यस्तेषां निमंत्रणं। द्वौ निमंत्रयते विश्वेवि
श्वेदेवार्थमादितः। पितृभ्यस्तु यथाशक्त्या युग्मान्द्विजवरो गुणान्। मत्स्यपुराणे। मा
तरः प्रथमं पूज्याः पितरस्तदनंतरं। ततो मातामहः पूज्या विश्वेदेवास्तथैव च। पितृभ्य
इत्युपलक्षणं। मातृपितामहि प्रपितामहीनां स्थाने प्रत्येकं द्वौ द्वौ ब्राह्मणो निमंत्रयेत्॥
तदाएकस्यां पंक्तौ षट् भवति। एवं पितृपंक्तौ षट् एवं सपत्नीकमातामहपंक्तौ षट्।
एवमष्टादश ब्राह्मणा भवंति। संकोचपक्षे द्वौ मातृपंक्तौ द्वौ पितृपंक्तौ द्वौ द्वौ सपत्नी
कमातामहपंक्तौ एवं षट्। पक्षद्वये पि विश्वेदेवार्थं द्वावेव निमंत्रयेत्। नवदैवत्ये श्रा १५३
द्धे आदौ मातृपंक्तिः। तथा चस्मृत्यंतरे। त्रयाहे केवलाः कार्या विस्थावार्ते नकीर्तिताः। अ

नाता तः आदौ मातृपंक्तिः ततः पितृपंक्तिः ततो मातामहपंक्तिः जयंतः अथापरेद्युरानीय ब्राह्म
णांस्तान्निमंत्रितान्। स्नानद्रव्यैः कृतस्नानान्क्रोधादिवपूर्वकान्। प्रक्षाल्य पादौ द्विरा
चांतान् प्राङ्मुखानुपवेशयेत्। कृत्वा मंडलकं वीरचतुरस्रं प्रदक्षिणं। दूर्वाग्रांस्तु कु
शान्दत्वा पुष्पाणां प्रकरं तथा। आसने षुलुकुशेषु पत्राथान्पितृवत्कमान्। अपूर्वमजुद
र्भान्वै विष्टरार्थं दद्यात्पृथक्। उदगग्रास्तु कर्तव्याः सर्वेष्वासनेष्विह। आपादशौचं सर्वेभ्यः
पुनरेभ्यो यथाक्रमं। तेषु तेषूदगग्रेषु निषीदेयुरयं पुनः। तेषां हस्तेषु पादद्यादर्घ्य
मुपकल्पयेत्। आसनानंतरं पूर्वं विश्वेदेवानावाहयिष्ये इत्युक्त्वा आवाहनमंत्रेणा
वाह्य। नांदीमुखान्पितृन्भक्त्या सांजलिश्च समाह्वयेत्। आवाहनमंत्रमुक्त्वा नांदीमुखा
न्पितृनावाहयिष्य इत्यावाह्य। अर्घ्यपात्रं पृथक्कुर्यादर्चनास्मृतिशास्त्रतः। कारिका।
कृत्वै दर्भान् समूलांस्तु दत्वैषामासनं पृथक्। प्रोक्षसंस्थेषु पश्चात् आसिच्य पूर्ववच्चानुम
त्रिता॥ ८५। तिलोसीति पदस्थाने यवोसीति पदं वदेत्। स्वधयेति पदस्थाने पुष्ट्या राद्धं

Indira Gandhi National
Centre for the Arts

वदेदिह ॥८६॥ अस्यार्थः। ब्राह्मणानामासनेषु छिन्नमूलान्नूनेव दर्भान्निःक्षिप्य द्विगुण
१५४ भुग्नान कर्तव्या इत्यर्थः। आसनानंतरमर्घ्यपात्रसादनकाले प्राक्संस्थानर्घ्यानासाद्य
तेष्वप आसिच्य तत्तत्स्थाने पूर्ववद्वक्ष्य शन्नोदेवीरित्यनुमंत्र्य तिलोसीति पदे यवोसीति मंत्रं प
ठित्वा यवान्निक्षिपेत्। तस्मिन्नेव मंत्रे स्वधानिपदस्थाने पुष्यतिग्रा ब्रूवदेत्। पुत्रः पुष्ये
ति। अत्र पात्रासादनावसरे प्रागग्रान्दर्भानास्तीर्य तत्र विश्वेदेवार्थमेकमर्घ्यं संस्थाप्य
विस्तारपक्षे मातृपंक्त्यपेक्षयात्रीणि पात्राणि प्राक्संस्थानि स्थापयेत्। एवं पितृपंक्त्य
पेक्षयात्रीणि। एवं सपत्नीकमातामहपंक्त्यपेक्षयात्रीणि। संकोचपक्षे प्रतिपंक्त्यावेकं
पात्रं। तथा च जयंतः। आपादितो निरुक्तो वेदयोरेकार्घ्यकल्पना। स्यात्त्रयाणां यथाशा
स्त्रं इति न्यायविदां मतं। अथ दर्भास्तरसंस्तीर्णे प्रागग्रान्वे विलक्षणः। उक्तानि त्रीणि पा
त्राणि तेषु दद्यात्समाहितः। अंतर्धाय तु दर्भान्वे तेषु सिंचेत्ततो जलमिति। स्मृत्यंतरे। अं १५५
तर्धाय ततो दर्भान्तेषु सिंचेत्ततो जलं। प्रति द्विजं पृथक्कुर्यान्निवीय घ्यानुमंत्रणं। यवो

सीत्युक्तमंत्रस्यार्घ्यमित्यपरे विदुः। छंदोगग्रंथे अर्घ्यपात्रसंख्योक्ता। चत्वार्येव अर्घ्यपात्रा
णि अभ्युदयिके इति मातादि आद्यत्रयं त्रीणि विश्वेदेवार्थं च एकमित्येव विभागः। शौनकः। के
पुरो निधाय पात्रे द्वे विश्वेदेवार्थविप्रयोः। अंतर्धाय ततो दर्भानिःषिच्य वत्तलं तयोः। य
वोसीत्यादियुक्तेन मंत्रेण प्रतिभाजनं। यवान्विकीर्य विप्रेभ्यः स्वाहार्घ्या इति निवेदयेत्। वि
श्वेदेवा इदं वोर्घ्यमिति मंत्रमुदीरयन्। दत्वार्घ्यमाभ्यां पित्रर्थमथार्घ्यमुपकल्पयेत्। त्रि
षु पित्रादिपात्रेषु कुशानंतर्निधाय तान्। क्रमेणैव ततस्तेषु निषिच्यापो यथा आपः। मंत्रे
ण शन्नोदेवीरित्याद्यया चानुमंत्र्य चायवोसीत्यादियुक्तेन मंत्रेण प्रतिभाजनं। यवान्वि
क्षिप्याथ पित्रर्थं द्विजन्मभ्यो निवेदयेत्। कारिका॥ पितॄनिति पदात्पूर्वं वदेन्नांदीमुखानिति।
स्वधानमपदस्थाने स्वाहाशब्दं वदेदिह॥८८॥ अथान्यत्तु यथापात्रमुक्तार्घ्यं धावयेद्बु
धान्। नांदीमुखाः पितरः प्रीयंतामिति मंत्रतः॥८९॥ पित्रर्थमुपविष्टेभ्यः सकृदर्घ्यं निवे
दयेत्। एनमनवदेन्मंत्रं पितामहप्रदान्वितं॥९०॥ तदर्थमुपविष्टेभ्यः सकृदर्घ्यं निवे

Indira Gandhi National
Centre for the Arts

दयेत्॥ प्रपितामहमं युक्तं मंत्रमुक्त्वा नमेनतु॥१२॥ नदर्थ मुपविष्टेभ्यस्तृतीयंसकृ
१५५ दैवतु॥ अस्यार्थः। पूर्वश्लोकस्यस्पष्टार्थत्वान्न व्याख्या। अथान्यदिति। यवोसि सोमदैवत्य इत्यादि
कं यथापाठमुक्त्वा अर्घ्यपात्रेषु यवान्प्रक्षिपेत्। अत्र सौकर्यार्थं मंत्र उच्यते। यवोसि सोमदे
वत्यो गोसवे देवनिर्मितः। प्रत्नवद्भिः प्रत्तः पुष्ट्या नांदीमुखान्पितॄनिमांल्लोकान्प्रीणयाहि
नः स्वाहेति। पात्रेषु गंधपुष्पादिकं प्रक्षिप्य नांदीमुखाः पितरः प्रीयंतामिति मंत्रेण पित्रार्थ
मुपविष्टेभ्यो ब्राह्मणेभ्यः पितृपात्रं सकृदेव निवेदयेदिति। निवेदनं तु मंत्रपाठित्वाऽर्घ्यपा
त्रस्य तत्समीपस्थापनं। दानयोग्यकरणं दानस्याग्रे विद्यमानत्वात्। एवमेव मंत्रं पिताम
हपदान्वितं नांदीमुखाः पितामहाः प्रीयंतामिति पितामहसमीपस्थापयेत्। स्मृत्यंतरे।
प्रतिद्विजं पृथक्कुर्यात्त्रिवारमर्घ्यानुमंत्रणं। यवोसीत्यकृत्मंत्रः स्यादर्घ्यमित्यपरे विदुरिति।
पृथक्कुर्याद्दानयोग्यं कुर्यादित्यर्थः। नांदीमुखाः स्व॰ पितर इदं वो अर्घ्यमित्यथ॥१२॥ दत्वा १५५
र्घ्यमुपविष्टेभ्यः पित्राद्यर्थं तु पूर्ववत्। मंत्रस्योहो पितृत्वादर्घ्यदानं प्रतिद्विजं॥१३॥ आवृत्ति

रपि मंत्रस्य प्रतिब्राह्मणमिष्यते। प्रतिद्विजं पृथक्कुर्याद्द्वितीयाद्यनुमंत्रणं॥१४॥ अस्यार्थः॥
नांदीमुखाः पितर इदं वो अर्घ्यमिति मंत्रेण पितृस्थाने उपविष्टयोर्विप्रयोर्हस्ते अर्घ्यं द
त्वा। या दिव्या इत्यनेन मंत्रेण गलितदुदकमनुमंत्रयेत्। निरीक्षणेदित्यर्थः। पुनर्द्वितीयपा
त्रोदकं गृहीत्वा नांदीमुखा इदं वो अर्घ्यमित्यादि समानं। तथैव तृतीयपात्रोदकं गृहीत्वा नां
दीमुखाः प्रपितामहा इदं वो अर्घ्यमित्यादि पूर्ववत्कुर्यात्। अत्र पित्राद्युद्देशेन उपविष्टा
नां बहूनां द्विजानां करेषु एकस्यैवार्घ्यपात्रस्योदकेन अर्घ्यं दद्यात्। प्रतिब्राह्मणमर्घ्यदाने
मंत्रावृत्तिः। प्रतिब्राह्मणं चानुमंत्रणं भवति। पात्राण्यासादयेत्त्रीणि न तु ब्राह्मणसंख्ययेति
संग्रहवचनात्। शौनकस्तु। अतः प्रथमपात्रस्थाः स्वाहार्घ्या इति मंत्रतः। तेषामासादितवि
प्रस्य हस्तेन्यज्जलमाहितः। सिक्त्वाथार्घ्यं समादाय जलं दक्षिणपाणिना। द्वितीयपात्रतः
किंचिज्जलमादाय पूर्ववत्। तत्रेदं नेर्घ्यमित्येष पितृनामपदादिकः। मंत्रो विभज्य तेनान्यस्मा
त्रं पूर्ववदाचरेत्। एवं पित्रर्थविप्रेभ्यः प्रदायार्घ्यं यथाविधि। पितामहार्थविप्रेभ्यो दत्वार्घ्यं च

Indira Gandhi National Centre for the Arts

यथापुरा।प्रपितामहस्तथा ब्राह्मदिइदंतेर्घ्यमितीरयेत्।मंत्रमुत्र यथापूर्वंतंत्रमन्यत्समाचरे
१५६ त्।पित्रादित्रिनयस्यार्थं यथावत्करणाद्द्विजो।।होवृणीनुदानेतनंतथारेकाप्यंकल्पनं।जयं
तः।उक्ता।पितरिदंतेर्घ्यमितिपित्र्यर्घ्यमानयेत्।यादिव्याइतिमंत्रेणमत्वेकसनुमंत्र
ने णं।अर्घ्यदानविशेषमाहकात्यायनः।ज्येष्ठोत्तरकरान्युग्मान्करायेकपवित्रकान्।कृ
त्वार्घ्यंसंप्रदातव्यंनैकैकस्यप्रदीयते।ज्येष्ठस्यकर द्वितीयब्राह्मणहस्तौ।परिधायुउ
क्तमंत्रेणयुक्तदेवार्घ्यंदद्यात्।अवशिष्टस्यार्घ्यादिकस्यकार्यमाहजयंतः।आसिंचेत्
प्रथमेपात्रेजलमुत्तरयाद्वयोः।ताभिर्मुखंसमंनीतंपुत्रंयद्यभिवांछतीति।।द्विद्विगंधा
दिदातव्यंपाणिहोमः सोभवेदिह।अग्नयेकव्यवाहनादिमंत्रेणप्रथमाहुतिः।।२५।।सो
मायेतिद्वितीयास्याद्दथान्येषांतुपाणिषु।आभ्यामेवतुमंत्राभ्यांद्वेद्वेहुत्वाहुतीइति।
।।२६।।अस्यार्थः।अत्रनांदीमुखश्राद्धे द्विवारयुग्मत्वेनैवगंधपुष्पधूपाच्छादनपर्यंतं १५५
पंचैवस्मृतीनांप्रतिब्राह्मणंदानंभवति।अग्नौकरणावसरेप्रश्नवर्जमेवहोमद्रव्यघृता

क्तंकृत्वासर्वेषुपाणिषुजुहोति।अत्रसव्येनैवविधानसामर्थ्यात्अमंत्रमंअग्नयेकव्यवा
स्वाहे हनायेतिहुत्वाततःसोमायपितृमतेस्वाहेतिद्वितीयाहुतिंजुहोति।एवंप्रतिपंक्तौब्रा
ह्मणंजुहोति।स्पष्टमन्यज्जयंतः।भोजनार्थमिहासीनाद्ब्राह्मणाद्दायमर्पिषा।अभ्यक्त
समुपात्रेतुसर्वमेवंविचक्षणः।अवदानंगृहीत्वाथमेक्षणेनविपाश्चितः।पितृस्थाना
नुसर्वेषांपाणौहोमंद्विजोत्तिहि।होममंत्रेविशेषोत्रस्वधाशब्दादिवर्जयेत्।अनयोःप
दयोस्थानेस्वाहाशब्दंप्रयोजयेत्।अग्न्यादिनातुमंत्रेणपूर्वेहोमंभवेदिहाविग्रहेणतु
होतव्यमितियज्ञविदांमतं।भुक्तवत्स्वहितंतेषुयथेष्टंभोजयेत्ततः।दृषदाज्येनसंयु
क्तंदद्यादोदनमादितः।पायसंचतथाभक्ष्यंमोदकादिरसामधुः।मधुरंभोजनंदद्यान्न
चाम्लंपरिवेषयेत्।ब्रह्माण्डपुराणे।संकल्प्यभक्ष्यभोज्यादिदद्याद्दत्तंयथाविधि।गुड
मिश्रंखगस्त्रेष्ठंसाज्यंचैवोदनंपरि।रसालान्मोदकांश्चैवनचाम्लकटुकादिकमिति।
नजपेत्सेतृकंजप्यंनमांसंनत्रदापयेदितिस्मृत्यंतरे।अथतृप्तिपरिज्ञानपर्यंतंपूर्वं

Indira Gandhi National
Centre for the Arts

यद्भवेत्।मधुवाताऋतायतेउपास्मैगायतानरः॥१७॥पंचर्चंश्रावयित्वाक्षंनितिचश्रा
१५८ वयेद्बुधः।संपन्नवचनान्नस्याद्वातृतेषुद्विजन्मसु चेति॥१८॥अस्यार्थः।परिवेषणा
दिपूर्ववत्कृत्वा।त्रिज्ञानपर्यंतंयथेष्टंभोजनंकारयित्वाअथतेषुसत्कृविशेषमंत्रमा
ह।तच्छ्रुत्वा मधुमतीःआवर्तयेदित्यन्नेउपास्मैगायतानरइत्याद्याःपंचर्चंश्रावयेत्।
तथैवाक्षन्नमीमदंतोतेचऋचंश्रावयेत्।ततःसंपन्नमितिपूर्ववदुक्तेतेषुआचांतेषुसत्कृ
पिंडदानंकुर्यात्।शौनकः।तृप्तानथद्विजान्ज्ञात्वा मधुवातीऋतायतेइत्यादिकंक्रम
मथोउपास्मैगायतानरः।पंचर्चंश्रावयेत्तथा पाप्मनेकंचर्चंयथाक्रमं।श्रावयित्वानुसंपन्न
मित्येवंब्रूयुस्ततः।समन्विताः।प्रकीर्यान्नंतुलेपस्य विप्रानाचामयेत्ततः।जयंतः।एते
षन्नंप्रकीर्याथपात्रंविसृजयेदिति।अथमुक्ताशयानसम्यग्गोमयेनोपलिप्यये
त्।ततःप्रागग्रकान्दर्भानास्तृणातिततःपरं॥१९॥पृषदाज्यंचकुर्वीतदध्यानयतिसु १५८
पिंपि।पृषदाज्येनसंमिश्रमुक्तशेषाद्धृतंभवेत्॥२०॥एकैकस्यात्रमंत्रेणद्वौद्वौपिंडौ

तुनिर्वपेत्।अथानुमंत्रणादिस्यात्ततुनेच्छंतिकेचन॥२१॥अथसंपन्नवचनाद्विप्राणांचवि
सर्जनमिति।अस्यार्थः।ततोभोजनशालायांबहिःविप्रांतिकेसम्यग्गोमयेनोपलेप्येत्।
तस्मिन्प्रदेशेप्रागग्रान्दर्भानास्तीर्यततःपृषदाज्येनमिश्रंभुक्तान्नशेषमुद्धृत्यतेषुदर्भे
षुएकैकमुद्दिश्यद्वौद्वौपिंडौक्रमेणदद्यात्।पृषदाज्यंनाम आज्येदधिप्रक्षेपणंयद्राक्रि
यतद्द्रव्यंभवति॥केचित्पिंडानुमंत्रणमिच्छंतिकेचिन्नेच्छंति।पूर्वोक्तप्रकारेणपिंडदानं
समाप्य विप्रविसर्जनकालेसंपन्नमितिवचनभाषणाद्विसर्जयेयुरिति।अत्रकेचनपु
राणोक्ताविशेषाःप्रदर्श्यंते।पद्मपुराणे।प्रदक्षिणोपचारेणद्ध्यक्षतफलोदकैः।प्रा
ङ्मुखोनिर्वपेत्पिंडान्दूर्वयाबर्हिषेयुतान्।चतुर्विंशतिमते।द्वौद्वौचाम्बुदयिपिंडावेकै
कस्मैविनिक्षिपेत्।एकंनाम्नापरंतूष्णींदद्यात्पिंडान्पृथक्पृथक्।आद्येब्रह्मपुराणे।
शाल्यन्नंदधिमध्वक्तंबदराणियवास्तथा।मिश्रीकृत्यबलिं[illegible]रिपिंडांश्चफलसंमि
भान्।दद्यान्नांदीमुखेभ्यश्चपितृभ्योदधिपूर्वकं॥ब्रह्मपुराणे॥ ॥अर्घ्यंपुष्पंचधूपं

Indira Gandhi National Centre for the Arts

च यज्ञास्त्रमनुलेपनं। वासांसु पहतं देयं सदर्भं ~ समं ततः। दासामलक मूलानि बांधवा
१५८ श्च निवेदयेत्॥ अथाक्षय्योदकस्थाने दद्यादक्षय्योदकं। नांदीमुखेभ्यस्त्वक्षय्यमि
दमास्त्विति संजपेत्। आह कात्यायनः। अपः क्षिपेन्मूलदेशे वनेनिःस्वेति तिलाः।
द्वितीयं च तृतीयं च मध्यदेशाग्रदेशयोः। मातामहप्रभृतय एतेषामेव वामतः। सर्व
स्मामेवमन्नमुद्धृत्य व्यंजनैरुपसिच्य च। संयोज्य यवकर्कंधुदधिभिः प्राङ्मुखस्तथा।
अवनेजनवत्पिंडान्दद्याद्बिल्वप्रमाणकान्। वृद्धशातातपः। प्रदद्यात्प्राङ्मुखः पिंडा
न्दद्यादाग्न्यासवाह्यतः। बाह्यतः इति भोजनशाला बहिरित्यर्थः। वृद्धवसिष्ठः। प्राङ्मु
खो देवतीर्थेन प्राक्कूलेषु कुशेषु वै। दद्यात्पिंडान्कुलीन पिंडपात्रामधोमुखं। तत्पा
त्रक्षालनेनाथ पुनरप्यवनेजयेत्। उत्तरोत्तरदानेन पिंडानामुत्तरोत्तरः। गंधादीनि
क्षिपेत्तूष्णीं तत आचमयेद्द्विजान्। अन्योन्यत्राप्येष एव स्याद्यदि वा। प्रीयंतामिति च १५८
ब्रूयात्पिंडान्वाहेति निक्षिपेत्। आश्वलायनगृह्यपरिशिष्टे। नांदीमुखाः पितरः प्री

यंतामिति विसर्जयेत्। कात्यायनः। अथाग्रभूमिमासिंचेत् सुप्रोक्षितमस्त्विति। शिवा आ
पः संत्विति युग्मानेवोदकेन च। सौमनस्यमस्त्विति पुष्पदानमनंतरं। अक्षतं चारिष्टं चा
स्त्विस्येतान्प्रतिपादयेत्। अक्षय्यं च ततः कुर्याद्दैवपूर्वं विधानतः। अत्र वर --- चने दातारो
नोभिवर्धंतामित्यत। भविष्यपुराणे। माता पितामही चैव तथैव प्रपितामही। एता भवंतु मे
प्रीताः प्रयच्छंतु च मंगलमिति। कात्यायनः। पवित्रांतर्हितान्पिंडान्सिंचेदुत्तानपात्रकृत्। सु
प्सनेच स्वधावाचनं गुष्ठग्रहणं सदा। कृत्वा तु पस्य विप्रस्य प्रणम्यानुव्रजेत्ततः। चतुर्विंशा
ति मते। शेषमन्नमनुज्ञाप्य वैश्वदेवक्रियां ततः। श्राद्धक्रियार्थशेषेण वैश्वदेवं समाच
रेत्। अत्र वृद्धिश्राद्धे पिंडदानं वैकल्पिकं। तथा च विष्णुपुराणे। दध्यक्षतैः सबदरैः प्रा
ङ्मुखोदङ्मुखोपि वा। देवतीर्थेन वै पिंडान्दद्यात्कामेन वै नृप। कामेन इच्छया इच्छा
भावे न दद्यात्। भविष्योत्तरे। पिंडनिर्वपणं कुर्यान्न वा कुर्यान्नराधिप। वृद्धिश्राद्धे महाबा
हो कुलधर्ममवेक्ष्य वै। इयं च व्यवस्था निरग्निकानां। साग्निकस्य सदा कर्तव्यमेव। अ

Indira Gandhi National Centre for the Arts

न्यथादोषः श्रूयते। आदित्यपुराणे। योऽग्नौ तु विद्यमाने तु द्विजो पिंडान्निर्वपेत्। पतंति पित
१५९ रस्तस्य नरके स तु पच्यते। व्यासः। संकटे तु यदा कुर्यात् कुर्यात्तत्र पूरणं। नावाहनाग्नौकर
णं पिंडांश्चैव न निर्वपेत्। पात्रपूरणमर्घ्यदानं। समंत्रकावाहनस्य निषेधो नत्वावाहन
स्वरूपस्य। तदभावे देवतासांनिध्याभावप्रसंगात्। ततश्चावाहनमंत्रमनुक्त्वैव सत्यवसु
संज्ञकान्। विश्वान्देवानावाहयामीत्येवं तावदुक्त्वा देवावाहनं कार्यं। पित्राद्यावाहनमप्येव
मेव स्मृत्यंतरे। अंगानि पितृयज्ञस्य यदा कर्तुं न शक्नुयात्। स दाचान्वये द्विप्रान्सकलान्
मिलिरस्थिति। श्राद्धानुकल्पं यः कुर्यात् ज्ञात्वा रुज्यपेक्षया। श्राद्धांशेनाप्यवाप्नोति सु
रव्यश्राद्धफलं नर इति। शाख्याभावे मुख्यककल्पानुष्ठानफलं। दक्षिणादानं हेमाद्रौ। तत्र
महाभारते। वेदोपनिषदे चैव सर्वकर्मसु दक्षिणा। सर्वक्रतुषु चोद्दिष्टा भूमिर्गावोऽथ कां
चनं। रजतस्य दक्षिणादानं निषेध उच्यते। वेजवापेन। शिवनेत्रोद्भवं यस्मात्तस्मात्तत्पि १५९
तृवल्लभं। अमंगलं तद्यत्नेन देवकार्येषु वर्जितमिति। तदर्हैः सह भोक्तव्यमिति प्रसु ति

पूर्वकं। प्रदद्यात्स कुलं तस्मै स्वीकरोति यथाविधि। नोद्वासयति विप्राणामुच्छिष्टान्यादिन
क्षयात्। प्रकीर्णमंचलेष्वग्रे विप्राणामाचयेत्ततः। आचम्यासनसंस्थेभ्यः प्रदद्यादुदकं दक्षि
णां। सर्वांश्चाभ्यर्च्य गंधाद्यैः पितृपूर्वं विसर्जयेत्। इति नांदीश्राद्धं॥ अस्य विषयमाह। पुं
सः सवनसीमंतचोलोपनयनेष्विह। विवाहे चानलाधेये प्रभृतिश्रोतकर्मसु। इदं श्राद्धं
प्रकुर्वंति द्विजा वृद्धिनिमित्तकमिति॥ २॥ अस्यार्थः। इदमाभ्युदयिकश्राद्धं द्विजाः पुंसव
ले नादिषु उक्तेषु [illegible] वृद्धिनिमित्तकश्राद्धं कुर्वंति। अवशिष्टेषु षोडशसंस्कारेषु श्रवणा
दिकर्मस्वपि वृद्धिरिष्यते। वाप्याद्युद्यापनादौ तु पूर्तनिमित्तकं श्राद्धं कुर्यात्। शाकटारोह
णादिवास्तुपरीक्षांतं पंचत्रिंशत्संख्याकाः श्लोकाः अत्रोपयोगाभावान्नव्याख्याताः॥ ७ [illegible]
अथ प्रयाणविषये आपाद्दीपयेवा। अग्नेः समारोपणविधिरुच्यते॥ साग्निः प्रयाति चेत्ता
णीमतपस्यात इत्यथ। जिघ्रेत्पाणी ततः काले व्याहृत्याग्निं समुत्सृजेत्। ८॥ कृते पाणिसमारो
पे नियमान पितृकृणु। अस्यार्थः। साग्निर्यदि प्रयाणं करोति तदा यातेऽग्ने यज्ञियातनूरि

Indira Gandhi National
Centre for the Arts

स्वादिमंत्रेणपाणिद्वयमग्नौ प्रतापयेत् इति। ततः पाणिद्वयंजिघ्रेदाआणंकुर्यात्। होमकाले
१६० लौकिकाग्निमानीयतस्मिन्नग्नौ पाणिभ्यां गृहीतमुद्दीरत्यमग्निमुद्धिरेतातस्मिन्नित्यहो
मंकुर्यात्। पाणिसमारोपणानंतरं नियमानाहत वृणुइत्यंते नउक्तनियमान्। पालयन्
कर्मकुरु इत्यर्थः। ल जलेनिमज्जनस्नायान्नेपियात्र्यस्त्रियंतथा। कृत्वामूत्रपुरीषंतुच्चिरं
नासीतचाशुचिरिति। अस्यार्थः। जलमध्येस्नानकालेनिमज्जनवर्जंकेवलंहस्ताभ्यामेवशि
रस्युदकंनिक्षिप्यस्नानंनकार्यं। स्त्रीगमनंचनकुर्यात्। मूत्रपुरीषकृत्वातदानीमेवशौ
चादिकंकुर्यात्। इति। चिरकालंनतिष्ठेदशुचिर्भूत्वा यद्यपि मूत्रपुरीषोत्सर्गानंतरंअना
चारवतापिनिरग्निकेनापिशीघ्रमेवशौचाचमनादिकंकुर्यात्। तथाप्यत्र करचरणा
द्यवयवप्रक्षालनमाचमनमपिउक्तरीत्याशीघ्रमेवकुर्यादितितात्पर्यं। समिधंघृतपद्धा
त्वावयंतेयोनिरित्यृचा॥४०॥ अग्नौप्रत्यवरोहेतिकालेनामादधत्यथेति। अस्यार्थः। अ १६०
थवासमिदारोपणंकुर्यात्। तस्यकारमाह। अयंतेयोनिर्ऋत्वियइतिऋचाअग्नौसमिधं

प्रतपेत्। होमायतनेलौकिकाग्निमानीयप्रत्यवरोहेतिमंत्रेणतस्मिन्नग्नौतांसमिधंप्रक्षिप्य
होमकालेहोमंकुर्यात्। प्रादुष्करणकालेतुकर्मेतृत्समुदाहृतं। प्रादुष्करणकालेलौकिका
ग्नौसमित्प्रक्षेपः। अनेनैवतुपूर्वस्मिन्पक्षेप्यग्नौसमुच्चुसेदिति॥४१॥ अस्यार्थः। अने
नैवतुप्रत्यवरोहेतिमंत्रेणपूर्वस्मिन्पक्षेपाणिसमारोपणपक्षेपिलौकिकाग्नौपाण्यो
रारोपितमग्निंसमुच्चुसेदुद्धिरेदित्यर्थः। इत्यार्थक्षेत्रकर्षणविधिप्रतिपादिकास्तथा।
गानुमंत्रणप्रतिपादकोद्दसंख्याकाश्लोकाः। उपयोगाभावान्नव्याख्याताः॥४१॥ ॥
इत्याश्वलायनकारिकायांव्याख्याने द्वितीयोध्यायः॥ ॥ ॥श्री॥ ॥
श्री॥ अनाहिताग्निरेवेमान्कुर्यात्काम्यांश्चरूनथ। परिषेचनपर्यंतमन्वाधानादिपूर्ववत्।
अग्नयेपुत्रिणेत्वेतिपुत्रकामास्तु निर्वपेत्। अग्नयपुत्रिणस्वाहत्यनेनजुहुयाच्चरुं॥१॥ आ
युःकामादिकश्चरूनेवमेवकरोत्यथ॥ सूत्रोक्तदेवताज्ञयास्तत्रतत्रचुकर्मणि॥३॥ अस्या
र्थःस्पष्टः। व्याध्यादिषुसमस्तेषुषडाहुतिचरुर्भवेत्। परिषेचनपर्यंतमन्वाधानादिपू

Indira Gandhi National
Centre for the Arts

वैचत्॥४॥निर्वापप्रोक्षणे तूष्णीं भवेन्नामन्त्रकर्मणि।मुंचामित्वेति सूक्तेन प्रत्यृचं जुहुयात्र
१६१ रु॥५॥षष्ठं स्विष्टकृतं हुत्वा होमशेषं समापयेदिति।अर्थः स्पष्टः।अथ दुःस्वप्नदर्शने जप्य
माह।स्वप्नं दृष्ट्वाशुभं सूर्यमुपतिष्ठेत सप्तभिः॥६॥अद्यानदिति च द्वाभ्यां यच्च गोष्विति पं
चभिः।योमे राजन्नित्वा वार्कमेकयैवोपतिष्ठति॥७॥अस्यार्थः।यदा अशुभसूचकं स्व
प्नदर्शनं भवति तदा वक्ष्यमाणैः सप्तभिर्मन्त्रैः सूर्यमुपतिष्ठेत सूर्योपस्थानं कुर्यात्।तन्मन्त्राः
अद्यानो देव सवितरिति द्वाभ्यां यच्च गोषु दुःष्वप्न्यमित्यादिभिः पंचभिः।अथवा योमे राज
न्नित्येकयैव ऋचा सूर्यमुपतिष्ठेत।जृंभित्वा यदि वा स्फुत्वा दृष्ट्वा प्रत्यक्षमप्रियं।पापकं गं
धमाघ्राय तथाक्षिस्पंदने तथा।८॥उत्पन्ने कर्णयोः शब्दे भवेदेकतमं यदि।जपेन्मन्त्रमिमं
मन्त्रस्य सं चक्षा अहमित्यथ॥९॥अस्यार्थः।जृंभणादिषट्निमित्तेषु यद्येकतमं निमित्तं
भवति तदा जप्यमाह।सं चक्षा अहमक्षीभ्यां भूयासं सुवर्चा मुखेन सुश्रुत् कर्णाभ्यां मपि १६१
दस्स्रुत् इति जपेदिति।गत्वा राजस्वलाभार्यां निषिद्धदिवसे यथा।अयाज्यं याजयित्वा

तु निषादि प्रतिगृह्य च॥१०॥अप्रतिग्राह्यपुरुषद्रव्यं वा प्रतिगृह्य चास्पृश्याग्निचयनं स्तंभ
यूपं वा भोज्यभोजने॥११॥पंचस्वेषु निमित्तेषु भवेदन्यतमं यदि।पर्यूह्याग्निं परिस्तीर्य पर्यु
क्ष्य च ततः परं॥१२॥पुनर्मामैतु मन्त्राभ्यां जुहुयात्संस्कृतं घृतं।एताभ्यामेव मंत्राभ्यां समिधो
वा दधात्यथ॥१३॥पर्यूहनोल्लक्षणे स्यातां नान्यत्तत्र तु नेष्यते॥स्वाहाकारविनिर्मुक्तौ यद्वा
मंत्रौ जपेदिहेति॥१४॥अस्यार्थः।युक्तेष्वेषु पंचसु निमित्तेषु यद्यन्यतमं भवेत्।तदौ
पासनाग्निं पर्यूह्य परिस्तीर्य पर्युक्ष्य आज्यं संस्कृत्य पुनर्मामैतिमंत्राभ्यामाहुतिद्व
यं जुहुयात्।आज्यासंभवे एताभ्यामेव मंत्राभ्यां समिधौ वा जुहुयात्।तत्र पर्यूहनप
र्युक्षणे स्यातां।अन्यत्कर्म नेष्यते।अथवा समित्सोमासंभवे सति स्वाहाकारवर्जं मंत्रौ
जपेत्।होमपक्षे होमानंतरं पुनः पर्यूहनपर्युक्षणे कर्तव्ये इत्यर्थः।स्वयं तं तं समुद्यमा
दित्योऽस्तमयाद्यदि।तिष्ठं दिनं नयेद्रात्रिं शेषं वाग्यत एव सन्॥१५॥उदितेयं न सूर्यं तिष्ठं
वमिस्तूपतिष्ठति।अविध्युक्तक्रियाज्ञानमापि विश्वानरं गतं॥१६॥अर्काभ्युदितिचेदहः शे

Indira Gandhi National
Centre for the Arts

पं स्थित्वा सवाग्यतः। उदिते यस्य ते विश्वे स्वाग्निभ्रवतस्तु भीरविं॥१९॥ उपतिष्ठेत विहितक
१६२ र्मश्रांतस्यनेष्यते॥ अस्यार्थः॥ अव्याधितः पुरुषः शयनं कुर्वन्नेव यदि आदित्यः उदयं प्रा
प्नोति अस्तमितो वा भवति तत्र प्रायश्चित्तं कुर्यात्। तिष्ठन्नुपविष्टो वा न मन्नुत्वैव रात्रिशेषं
दिनशेषं वा नयेत्। उदिते सूर्ये येन सूर्यज्योतिषा बाधसे तमसज्ञात पंचभिर्मंत्रैर्ग्निः आदि-
त्यमुपतिष्ठेत। यदा अविध्युक्ताशयनः सायं प्रातः होमक्रिया तयाश्रांतः अत एव निद्रावे
शागतः तल्लक्ष्मीकृत्य अर्कः अभ्युदेति। तदा तिष्ठन्नेव सः सहः शेषं वाग्यतः सन्नयेत्। ततः
उदिते सूर्ये यस्य ते विश्वा भुवनानि केतुना इत्येताभिश्चतसृभिरादित्यमुपतिष्ठेत। एत
त्तु कर्म विहितकर्मश्रांतस्यैवेदं प्रायश्चित्तं नेष्यते। औपासनो न गच्छेच्चेदुपलेपादि पूर्वव
भाह्नतस्त्रा त्रियागारात्स्वतिष्ठाप्य हविर्भुजं। अन्यस्मात्स्थोमकालत्त्री नाम्नीयादि वा गृही।
पर्युहनादि वा शाकोत्संस्कृत्याज्यं च पूर्ववत्॥२६॥ अयाश्चेत्येतया कुत्वा यथा पूर्वं जुहोत्यथे १६२
ति। अस्यार्थः। अथ केनकेनचित्प्रमादादिना औपासनाग्निः शांतो भवेत्। तदा आयतनस्थं

भस्मादिकं सर्वं दूरीकृत्य पूर्ववदुपलेपादिकं कृत्वाश्रोत्रियागाराद्ग्निमानीय आय
ने व्याहृतिभिरग्निं प्रतिष्ठाप्य सायंकाले होमपर्यंतं दंपत्योर्मध्ये भोजनमकृत्वैव अ
न्यतरेण स्थातव्यं। होमकाले प्राप्ते केनचित्प्रमादेनाशांतस्यौपासनस्य प्रायश्चित्ता
र्थमाज्यहोमं करिष्ये इति प्रतिज्ञाय पर्युहनादि कृत्वा आज्यं संस्कृत्य अयाश्चेति मंत्रे
णैकामाज्याहुतिं जुहोति। पश्चान्नित्यवदौपासनं कुर्यात्। एतच्च तत्कालविषयं॥
यदि शांतेग्नौ होमकालो नातिगतः तदा पुनः संधानविधिः। अन्वाधाने कृते यागात्प्रा
गेवमुगतो भवेत्॥२७॥ प्रायश्चित्तमिदं कृत्वा पुनरन्वादधात्यथ। व्याहृत्या चैव परस्थे
यइति बौधायनाशयइति॥२८॥ अस्यार्थः। पूर्वेद्युरन्वाधाने कृते संनिपतितपादि
क्रियमाणस्थालीपाकात्पूर्वमेव यदग्निः शांतो भवति तदा पूर्वोक्तमेव अयाश्चेत्येतया
ऋचा आज्यहोमरूपं प्रायश्चित्तं कृत्वा पुनरन्वाधानं करोति। अन्वाधानानंतरं व्याहृ
त्यादिभिर्मंत्रैरग्निमुपतिष्ठेतेति बौधायनाभिप्रायः। अन्वाधाने कृते यागात्प्रागेवा

Indira Gandhi National
Centre for the Arts

रोपयेद्यदि। तुभ्यं ता इत्यचा कृत्वा वह्निमारोपयेत्ततः इति ॥२९॥ अस्यार्थः। अथ आपत्का
१६३ ले भयाण्यादिविषये पौर्णमास्यां दर्शे वा कृतान्वाधानस्य यागात्प्राक् समारोपणनिषिद्धे
पि यदि कार्यवशात् समारोपणप्रसंगः स्यात्तदा समारोपणाधिकारार्थमाज्यहोमं कुरि
ष्ये इति संकल्प्य आज्यं संस्कृत्य तुभ्यं ता अंगिरस्तम इति मंत्रेण एकामाज्याहुतिं हु
त्वा समारोपणं कुर्यात्। नित्यहोमे त्वतिक्रांते संस्कृत्याज्यं तु एवं वग्नु। चतुर्गृहीत्वा वारही
त्वाज्यं मनुस्वस्याजुहोत्यथ ॥३०॥ आद्वादशाहिनादेवमूर्ध्वं विच्छिन्नतेनलः। प्रायश्चि
त्तं तु यत्प्रोक्तं मग्निस्यागोपपातकं ॥३१॥ मनुनात्तत्कुर्वीत तत्कालानुसारतः इति।
अस्यार्थः। नित्यहोमस्य कालातिक्रमे पूर्ववदाज्यं संस्कृत्य स्रुवेण चतुर्गृहीतं तदाज्यं
दर्व्यां निक्षिप्य तया दर्व्या मनोज्योतिरिति मंत्रेण तदाज्यं जुहुयात्। द्वादशदिनात्पूर्वमे
व नित्यहोमलोपे इदमेव प्रायश्चित्तं। अयमर्थः। एकैकहोमलोपे प्रत्येकमेव प्राय १६३
श्चित्तं कृत्वा अतिक्रांतहोमश्च क्रमेण कर्तव्यः। आद्वादशदिनादेवमिति। द्वादश

दिनपर्यंतमिदमेव प्रायश्चित्तं। अतिक्रांते तदूर्ध्वं इदं प्रायश्चित्तं नास्ति। अनलस्य वि
च्छिन्नत्वे लौकिकाग्निर्भवतीत्यर्थः। तत्र क्रमयातिक्रमानुसारेण स्मृत्युक्तं मनुना प्रोक्तं
यत्प्रायश्चित्तं तत्कृत्वा दिनांतरे शुभे मुहूर्ते पुनः संध्यावंदनं कृत्वा अग्निं परिचरेदिति ॥
त्रैमासिकं गोवधोक्तं त्यक्ताग्नेर्निष्कृतिर्भवेत् ॥३२॥ चांद्रायणं वा होम्यस्य दानं वापि
समाचरेत्। अन्यत्र पुनराधानं दानमेव तथैव चेति ॥३३॥ अस्यार्थः। अग्नौ त्यक्ते य
दि मासत्रयं भवेत्तदा गोवधोक्तं प्रायश्चित्तं निष्कृतिर्भवति। अथवा चांद्रायणं कुर्यात्।
अथवा मासत्रयपर्यंतं होम्यं द्रव्यं यावद्भवति वैदिककर्मानुसारेण तत्प्रमाणं द्रव्यं ब्राह्म
णाय दद्यात्। पुनराधानं कृत्वा दानं किंचित्कुर्यात्। ब्राह्मणभोजनादिकं वा स्वयमेवाधा कं
नप्रकारं दर्शयति। न दत्त्र पुनराधानमित्थं कुर्वीत याज्ञिकः। उपलेपादिकं कुर्याद्द्वारांतं वि
य वाहवैतं ॥३४॥ विवाहाज्याहुतीर्लाजाहोमान्भवेदिह। गृहप्रवेशनीयां च कृत्वा स्याच्छ
दयांजनं ॥३५॥ परिणीयादिनास्यत्र लाजानावपति स्वयं ॥ समानतंत्र कं चेद्धोमद्वय

Indira Gandhi National
Centre for the Arts

मितं भवेदिह ॥३६॥ अस्यार्थः । अथ पुनः संधानहोमविधिरुच्यते । तत्तु नराधानमनेन प्र
१६५ कारेण याज्ञिकः करोति । कथमित्याह । आवस्थ्यप्राणानायस्य एवं गुणविशिष्टायां तिथौ
मम विच्छिन्नस्योपासनाग्नेः पुनराधानसिद्ध्यर्थं आधानहोमं करिष्ये । इति प्रतिज्ञाय गृ
पलेपाद्याधारांतं विवाहवत्कृत्वा विवाहाज्याहुतीर्हुत्वा तत्र त्र्यं लाजाहोमं कृत्वा गृहप्रवेशहो
मे आनः प्रजामित्यादि चतस्र आज्याहुती र्हुत्वा हृदयांजनमपि तथैव कृत्वा विवाहे परिणय
नं वर्तते तदत्र नास्ति अश्मारोहणमपि नास्ति अनुपयोगात् तथा सा हृद्रमापिना स्ति विवाहेव
रः अंजल्युपस्तरणं करोति । भ्राता लाजान् द्विरावपति अत्र सर्वं स्वयमेव च ध्वं जलौ कृत्वा त
थैव तिष्ठति । वधुः अंगुल्यग्रे हों मस्तु होति । अत्र विवाहहोम गृहहोम गृह्य इयमपि समान
तंत्रकं भवति । विवाहे पुनर्विवाहे भवेरानी यो भवतीति विवेकः । संवत्सरं तु यजमानः
कुर्याच्चांद्रायणं व्रतं । अथवा प्युपवास्युपवासः स्यात् प्रतिमासं दिनं भवेत् ॥३७॥ यो नोत्सृज १६४
निनाग्निं क्वाप्याज्यापत्यं समाचरेत् । अस्यार्थः । अग्निं विना संवत्सरेतीते चांद्रायणं व्रतं कु

र्यात् ॥ अथवा प्रतिमासमुपवासः । मासं मासं प्रतिप्रति दिनमुपवासः । यस्तु नाग्निं क्वा
दृषिं यजति अवैदिकसंसर्गात् आधानं कर्तुमिच्छति तदा प्राजापत्यं प्रायश्चित्तं कृत्वा
ना पुनराधानाधिकारी भवतीत्यर्थः । अथ नष्टाग्नित्वनिमित्तमाह । तृतीयप्रभृतीनां तु पार्वणा
मतिपातने ॥३८॥ पुनराधेयमिच्छंति केचिद् ह्यविदो जनो द्विजाः । उभयातिक्रमे तु कार्य
एकः पथिकृतो भवेदिति ॥३९॥ अस्यार्थः । स्थालीपाकद्वयलोपे प्रायश्चित्तमस्ति । तृ
तीयादि स्थालीपाकातिक्रमेन नष्टाग्निरेव भवति । तदत्र पुनराधानहोमः कर्तव्यो भवति ।
उभयं नाम पौर्णमासस्थालीपाकः दर्शस्थालीपाकश्च अस्य एकस्यैकस्य लोपे प्राया
श्चित्तं भवति । उभयोर्लोपे पाथिकृतद्वयं भवति । अकालेपि अमावास्यापौर्णमासी
वातीयात्का तत्र प्रायश्चित्तिरिति सा स्तयेपथिकृते ष्टाकपालं पुरोडाशं निर्वपेदिति
श्रोते पुरोडाशं निर्वपणं । अत्र व्रीहि निर्वपणं भवति । अमावास्याशब्देन पौर्णमासीश
ब्देन च अन्वाधानेष्टि पर्यंतं दिनद्वय साध्यं कर्म उच्यते । अन्वाधानं कृतं केनचिदनुरोधे
त

Indira Gandhi National
Centre for the Arts

नयतिपरित्यागेनकृतस्तदायागकालकलोपजनितप्रत्यवायपरिहारार्थंव्याहृति
१६५ होमंकरिष्येइतिसंकल्प्यअल्पसंस्कारंकृत्वाव्याहृतिहोमंकृत्वाअतिक्रांतस्थालीपा
कंकरोति।एवमष्टमीपर्यंतंभवति।तदूर्ध्वमुपवासादिप्रायश्चित्तं।चेधानं।अनवसरा
दन्वाधानदिनेअन्वाधानमकृतंचेत्तदाप्रतिपदियागावसरेअन्वाधानलोपप्रायश्चित्ता
र्थंव्याहृतिहोमः।अतुलोपार्थंव्रतपतेइतिभवति।प्रायश्चित्तविषयसर्वत्रचतुर्वारमाज्यं
गृहीत्वापूर्णाहुतिर्वेतिउत्तरत्रवक्ष्यति।अथपुनर्नष्टाग्निनिमित्तांतरं।समारूढसमिद्ध
ग्नौतौपुनराधेयमिष्यते।वक्ष्यामिपुनराधेयंजयंतस्वामिनोमतमिति॥४०॥अस्यार्थः॥स
मारूढोसमिधिसमारोपितेऽग्नौयदिप्रमादवशात्समिन्नश्यतितदानष्टाग्नित्वात्पुनराधानं
कर्तव्यमिति।अत्रप्रसंगात्शास्त्रांतरोक्तानिपुनराधेयनिमित्तानिप्रदर्श्यंते।श्वशूद्रपतितो
दक्याकाकवानरसैरिभैःस्पृष्टेननष्टेऽग्निरारूढःप्राणायामपरिणीध्रुवमिति।अत्रेपतितो १६५
रि दक्यापदोपादानेनचांडालोदयः।सर्वेगृह्यते।अतएव।आरोपितस्याग्नेःसंरक्षणार्थंकृष्णा

जिना।हृभिर्वेष्टयतिप्राशिकाःग्रार्येग्नोस्पृष्टेदोषोनास्तिनिमित्तांतराण्यपि।विहायाग्निंसभा
र्यश्चेत्सीमामुल्लंघ्यगच्छति।होमकालंव्यतीतस्यपुनराधानमिष्यतइति।सयदिसभार्यःस।नाग्निं
विहायग्रामांतरंगच्छति।तदानष्टाग्नित्वात्पुनराधानंकरोति।होमकालव्यतीतस्येतिवचना
त्।दंपत्योर्मध्येएकेनअग्निसमीपेसर्वदास्थातव्यमित्यर्थः।अग्निसमीपविद्यमानयोर
पिदंपत्योर्यदिसूर्यअस्तंगच्छेदभ्युदियाद्वातदानष्टाग्निर्भवतीतिकेचित्।तदासमहानद्यंत
रपिअग्निंविनानष्टाग्नित्वं।एकेनसीमातिक्रमणेनव्यतिक्रमेवानष्टाग्नित्वंनास्ति।अन्यानपि
पुनराधेयनिमित्तानिशास्त्रांतरेभ्योज्ञातव्यानि।जयंतस्वामिमतोक्तसंक्षेपमार्गेणपुनराधान
विधिंस्वयमेववक्ष्यामि।तमेवविधिंप्रदर्शयति।अग्न्याधेयिकसंभारान्यथासंभवमाहरेत्।
उपलेपादिकंकृत्वासंभारान्निदधातितान्॥४१॥संभारेष्वाहधात्यग्निंश्रोत्रियादिगृहाद्धृतं।
पर्यूहनादिकंकृत्वासंस्कृत्याज्यंचपूर्ववत्।४२।स्रुवेणजुहुयादाज्यमयाश्चेत्यनयर्चयेति॥
अस्यार्थः।अग्न्याधेयिकसंभाराःकृद्रगजाश्वस्थानादिभ्यःशुद्धमृत्तिकाआनीयस्थंडिलउप

Indira Gandhi National Centre for the Arts

ले पादिस्त्वा पूर्ववदाज्यं संस्कृत्य अयाश्चाग्न इति मंत्रेण स्रुवेण एकामाज्याहुतिं जुहोति। एता
१६६ वन्मात्रेण अयं गृह्याग्निर्भवति। इतिकारादीनां तु इदमभिमतं न भवति। स्थालीपाके त्वतिक्रां
ते यद्यन्यग्नौ स्वयं यजेत्॥४३॥ स्वाम्यभावेऽन्यो यजेद्यद्वा कार्यः पार्थिकृतश्चरुः। प्रायश्चित्तं चरु
स्थाने पूर्णाहुतिरथापि वा॥४४॥ आज्यं द्वादशकृत्वः स्रुग्गृहीत्वा पूरयेत्सकृत्। तया वाज्याहुतिं का
र्यं सा पूर्णाहुतिरिष्यते॥४५॥ स्रुवपूर्णाहुतिर्वा स्यादित्येके याज्ञिका विदुरिति॥ अस्यार्थः। स्था
लीपाके अतिक्रान्ते सति यद्यस्मिन्नौपासनाग्नौ स्वयं यजेत्। अथवा स्वाम्यभावे अन्यो वा यजेत्। त
दा पार्थिकृतश्चरुः कार्यः। अथवा यत्र प्रायश्चित्तार्थं चरुमुक्तं तत्र चरुस्थाने पूर्णाहुतिर्वा कर्तव्या इन्य
भवति। तत्र पूर्णाहुतिलक्षणं स्वयमेवाह। द्वादशवारं स्रुवेणाज्यं गृहीत्वा ह्वेञ्चे पूर्णां कृत्वा तया द
व्यो अग्नये व्रतपतये स्वाहेत्यादि जुहुयादिति सा पूर्णाहुतिर्भवति। अथवा स्रुवमेवाज्यं पूर्णं कृत्वा तेने
व स्रुवेण तदाज्यं जुहोति सैव पूर्णाहुतिरिति एके याज्ञिकाः॥ प्रायश्चित्ते कृते पश्चादतीतमपि क १६६
र्म वै॥४६॥ कार्यमित्येक आचार्या नेत्यन्ये तु विपश्चित इति। अस्यार्थः। नित्यहोमादिलोपस्था

लीपाकादिलोपे तत्र पूर्वोक्तं तत्प्रायश्चित्तं कृत्वा अतिक्रान्तं च कर्म कार्यं। अन्ये विपश्चितो याज्ञि
काः। अतीतं कर्म न कार्यमित्याहुः। प्रायश्चित्तेनैव चरितार्थत्वात्। अर्वाक्शम्यापरासात्तु व
हिरायतनाद्भवेत्॥४७॥ प्रायश्चित्तसमाप्त्यन्तं समर्थो जीवितुं यदि। इदं तद्दूरत्वाद्वा स्वस्य स्थानेऽस्मि
न्क्षिपेत्तु नः॥४८॥ आज्याहुतिं च जुहुयाद्व्याहृत्या चैव पूर्ववत्। अस्यार्थः। शम्यापरासो नाम स्थं
डिलाद्बहिरुक्तप्रदेशाः तस्मादर्वाग्यजनाद्बहिः; स्थंडिलमर्यादामतिक्रम्य प्रमादवशाद्यदि
बहिरग्निर्गच्छति। तदा इदन्त एकं परऊतमिति मंत्रेण तण्डुलमुष्टिं स्वस्थाने प्रक्षिप्य ततः समुत्थि
त व्याहृत्या एकामेव आहुतिं मन्त्रेण जुहोति। आपस्तंबे तु। अर्वाक् त्रिरात्राद्यदि साहुतिः स्यादा
पंचरात्रात्तु मनस्वतीर्वा। आ सप्तरात्रात्सहतं तु मत्या आद्वादशाहात्तु नादधीत॥ अतिक्रान्तो २ा
यदा शम्यापरासमन्तो भवेत्॥४९॥ चरुः पार्थिकृतः कार्यः पूर्णाहुतिर्यथापि वेति। इ
ध्माधाने कृते दुष्टं प्रधानं हविरन्वियात्॥५०॥ तत्स्थाने जुहुयादाज्यमदुष्टं वा जुहोत्यथ। एवं स
माप्य यद्दुष्टं तद्दुष्कमप्सु क्षिपेत्तु नः॥५१॥ अन्वाधानादिको यागः पुनः कर्तव्य एव तु॥ प्रागि

Indira Gandhi National
Centre for the Arts

ध्माधानतादुष्टेप्रधानहविषि त्वथ॥५२॥तस्य विः पुनरुत्पाद्य पूर्ववत्तत्समापयेत्।अस्यार्थः।इध्मा
धानकृते सति पशुकीटादिपातेन यत्प्रधानस्य हविषः दुष्टता भवति तेन हातमेव पदेशं दूरीकृत्य यस्या
१६७ देवतायाः स विभागतः।तस्यै देवतायै आज्येनैव जुहुयात्।अवशिष्टेन पुरोडाशद्रव्येण यागं समाप्य य
दूरीकृतं दुष्टद्रव्यं तदप्सु प्रक्षिपेदिति।तथापि यागविघ्नं मत्वा तमेव यागं सांगमन्वाधानादि पूर्व
कं पुनः कुर्यादिति।इध्माधानात्पूर्वमेव हविर्दोषो जातस्तन्निरूपणादि पूर्ववत्कृत्वा होमं समापये
दिति।न तत्र पुनरन्वाधानमिति इध्माधानानन्तरं हविर्दोषे पुनरन्वाधानपूर्वकस्य विहितत्वादिध्मा
धानहोमात्प्रागेव हविर्दोषे हविरुत्पाद्य होमं समापयेत्।न तत्रान्वाधानपूर्वस्य यागस्यावृत्तिरिति।
अंगानां चेद्धविर्दुष्टं देवेभ्यु सादयेत्पुनः॥५३॥ स्विष्टकृत्त्वविषो दोष आज्येनैव समापयेत्।अस्या
र्थः।प्रधानहोमस्य शेषः अंगित्वं आनपत्न्यादीनामंगत्वं तन्निमित्तं हविर्दुष्टं चेत्पुनर्नवीनं तद्धवि
रुत्पाद्य जुहुयात्।स्विष्टकृद्भागे दुष्टे सति स्विष्टकृद्विधानमाज्येनैव समापयेत्।न चात्र पुनर्यागा १६७
वृत्तिरिति।प्रच्युते स्रुक्स्रुवे केशैः कीटैर्वा मेध्यसंविभिः॥५४॥वसासृक्शुक्रमज्जास्थिमूत्रविड्

श्रुद्दूषके:।अन्यैर्वाप्यैरपि बीभत्सैर्दुष्टानि स्युर्हवींषि चेत्॥५५॥भिन्नानि चेव सिक्तानि दुष्टान्यप्सु
विनिक्षिपेत्।अस्यार्थः।पूर्वमुक्तं हविर्दुष्टं चेत्तदा पुनर्नवीनमुत्पाद्य जुहुयात्।केंदुष्टमित्यपे
क्षायां तानेवाह।प्रच्युते इत्यादि होमार्थं निष्पन्नं हविर्भवति।एवंविधानि हवींषि अप्सु प्रक्षिपे
त्।पुनरन्यं हविः कृत्वा होमं कुर्यादित्यर्थः।स्रुक्भिन्ना चेत्तदात्वन्या माहृत्य जुहुयात्स्रुवं॥५६॥
वानस्पत्यानि भिन्नानि प्राग्दग्धान्यग्नौ क्षिपेत्।अस्यार्थः।यदि प्रमादवशात्स्रुक्भिन्ना भग्ना
भवेत्।तदा अन्यां स्रुचमानीय जुहुयादिति।अन्यान्यपि वानस्पत्यानि यज्ञपात्राणि भग्ना
भवंति चेत्तदा तान्यपि अग्नौ प्रक्षिपेत्।कथं वा अग्नौ प्रक्षेपः।यज्ञपात्राणां दण्डः प्राग्दग्धो
भवति।विलेव प्रत्यग्दग्धो यथा भवति।तथा प्रक्षिपेदित्यर्थः।संस्पृष्टो यस्य गृह्याग्निरन्यगृह्या
ग्निना सह॥५७॥चरुर्निर्विचयो कार्यो यद्वा पूर्णाहुतिर्भवेदिति।अस्यार्थः।कस्यचिद्गृहे बहवः
साग्नयो भवंति।कदाचिद्यदि परस्परमग्नीनां मेलनं भवति तदा अग्निं विभज्य स्वस्वाग्नौ अग्नि
संसर्गनिमित्तप्रायश्चित्तार्थं अग्नये विविचये चरुनिर्वपणं कुर्यात्।अथवा पूर्वोक्तप्रकारेण

Indira Gandhi National
Centre for the Arts

पूर्णाहुतिः॥ त्रेताग्निपापिसंसृष्टे गृहदाहे ह्ययं विधिः॥५८॥ प्रायश्चित्तं चरुस्थाने
पूर्णाहुतिरिष्यते। ग्रामदाहाग्निसंसर्गे संसर्गाय चरुं भवेत्॥५९॥ वैद्युतेन तु संसर्गे कु
१६८ यादक्षमते चरुमिति। अस्यार्थः। गृहदाहे श्रौताग्निना सह लौकिकाग्निसंसर्गे अक्षमेव
विधिर्भवति। प्रायश्चित्तं चरुस्थाने पूर्णाहुतिरिष्यते। अथवा एकग्राममध्ये गृहान्तरस्थेन
लौकिकाग्निना सह ग्रामदाहवशात्संसर्गे अग्नये संसर्गाय चरुर्भवति। अथवा वैद्युतेन विद्यु
त्पातवशात्संनिते नाग्निनासंसर्गे अक्षमते अग्नये चरुं कुर्यादिति॥ पार्वण्यश्रुपपाते तु कुर्याद्व्र
तभृते चरुं॥६०॥ पर्वणि व्रतलोपे तु कुर्याद्व्रातपतं चरुं। समानतंत्रं कुर्वीत पार्वणेन तु कर्मणे
ति॥६१॥ अस्यार्थः। यदि पर्वणि कृतान्वाधानान्वाधानस्य व्रतस्य दैववशादश्रुपातकारणं भवति
तदाग्नये व्रतभृते चरुं कुर्यात्। तथैव पर्वणि अधःशयन हविष्यभोजनादि व्रतलोपे अग्नये व्रत
पते चरुं करोति। व्रतलोपादिविषये यद्यपि पूर्वदिने निमित्तं भवति तथापि श्वोभूते प्रतिपद्दिने १६८
स्थालीपाकेन सह समानतंत्रकं कार्यमिति। स्याच्चेत्पवित्रयोर्नाशः स्यात्पवित्रवते चरुः। प्रा

यश्चित्तविशेषस्य यत्र नोक्तो भवेद्विधिः॥६२॥ होतव्याज्याहुतिस्तत्र भूर्भुवः स्वरितीह तु। अ
स्यार्थः॥ आज्योत्पवनसाधने ये पवित्रे तयोर्नाशे अग्नये पवित्रवते चरुं करोति। एतान्युक्ता
नि प्रायश्चित्तविषयाणि। अस्मिन्कर्मणि यत्र यत्र प्रायश्चित्तं नोक्तं अपराधश्च विद्यते। तत्र स
र्वं भूर्भुवः स्वरिति समुच्चित मंत्रेण एकाज्याहुतिर्भवति। स्वयं ज्वलेच्चेदुद्दीप्यस्वेति द्वाभ्यां समि
द्वयं॥६३॥ आधेयमुपघातेषु पुनस्त्वत्य नयासमिमं। अकृताग्रयणो श्नीयान्नवान्नं यदि वै
ततः॥६४॥ वैश्वानराय कर्तव्यश्चरुः पूर्णाहुतिस्तु वेति॥ अस्यार्थः। नवान्नभक्षणाधिकारा
प: र्थं विहितमाग्रयणं मकृत्वैव यदि नवान्नभक्षणं कुर्यात्तदा अग्नये वैश्वानराय चरुं कुर्यात्। अथ
वा पूर्णाहुतिरिति। द्विषदन्नं यदा भुंक्ते तत्राप्येष चरुर्भवेत्॥६४॥ अस्यार्थः। येवैरभावेन निरं
तरं वर्तन्ते तेषामन्नं द्विषदन्नं प्रमादात्कस्यचिदनुरोधात्तद्भोजने स एव वैश्वानरश्चरुः कार्य इ
ति। कपालनाशो वषः स्यात्तु वरुणाकर्मणि त्वथ। कपालं तद्द्वे द्विर्भागे यश्च पणाय इति॥६५॥
तदा त्रोतेऽक्रमार्गेण कपालं संदध्यात्तथा। अभिन्नो घर्म इत्याभ्यां मंत्राभ्यां प्रक्षिपेज्जले॥६६॥ तत्र चैद्धु

Indira Gandhi National
Centre for the Arts

चिसंबंधं मृन्मयं भिन्नमेव वा। भूमिर्भूमीति मंत्रेण प्रक्षिपेद्देवतज्जले॥६७॥ अस्यार्थः। अशु
१६९ णा कर्मास्येककर्मणि कपालनाशे सति अग्नये वैश्वानराय चरुर्भवेत्। अथवा पूर्णाहुतिः। यद्वा पुरो
डाशश्रपणार्थे च कपालं भिन्नं भवेत्तदा नष्टं भिन्नं कपालं गायत्र्या त्वेति सोमं मंत्रेण संधाय
संयोज्य पश्चात्तत्कपालं आभिर्गोघर्म इत्याभ्यां मंत्राभ्यां जले प्रक्षिपेत्। तत्र मंत्रौ। आभिर्गी
र्भिर्जीरदानुर्यत आर्तस्तदगन्म पुनः। इध्मो वेदिः परिधयश्च सर्वे यज्ञस्यायुरनु संचरंतु। त्रयस्त्रिं
शत्तंतवो यान्वितत इमं यज्ञं स्वधया ये यजंते। तेभिश्छिद्रं प्रतिदध्मो यजत्र स्वाहा यज्ञो अप्येतु देवा
निति। अथवा अशुचिसंबंधं मृन्मयं कपालं भवेत्। भिन्नं वा भवेत्तदा भूमिर्भूमिमगादित्यनेन
मंत्रेण तज्जल एव प्रक्षिपेत्। भिन्ने चेद्यदि पुरोडाश उद्गच्छेदथवा यदि। किमुत्सृतमिमंत्रेण
बर्हिष्येनं निधापयेत्॥६८॥ अभिमंत्रयेत्तं च माहिंसीरिति मंत्रतः। अस्यार्थः। यदि पुरोडा
शः प्रमादात्कथंचिद्विद्धो भवेत्। अथवा उद्गच्छेदुत्पत्य गच्छेत्तदा एतं पुरोडाशं किमुत्सृतमी १६९
ति मंत्रेण बर्हिषि निधाय पश्चात्तमेव पुरोडाशं माहिंसीरित्यनेन मंत्रेण अनुमंत्रयेत्। अनुमंत्र

णं कुर्यादिति। श्रूयते मृतशब्दश्चेद्यजमाने तु जीवति॥६९॥ अग्नये सुरभिमते चरुः पूर्णाहु
तिरेव वा। अस्यार्थः। यजमाने जीवत्यपि यदि लोकतः मृतशब्दः श्रूयते पुत्रादिभिस्तदा स य
जमानः अग्नये सुरभिमते चरुं कुर्यात्पूर्णाहुतिं वा। अथ यस्य च दुर्गो वाजिनये श्चेद्यमोन
नः॥७०॥ समरुद्भ्यश्चरुं कुर्यात्पूर्णाहुतिमथापि वा। आहुतिर्हूयमाना तु बहिः स्कंदेत
द्वि यदि॥ देवांजनमगन्यज्ञ इत्यनेनाभिमंत्रयतामिति। अस्यार्थः। यस्य गृहे च दुर्गो वा अ
पत्यद्वयं सह जायते तदा अग्नये मरुत्वते चरुं कुर्यात्। पूर्णाहुतिं वा। यद्याहुतिर्हूयमाना
सति अग्नेर्बहिः पतति तदा देवांजनमगन्यज्ञ इत्यनेन मंत्रेण अनुमंत्रणं कुर्यादित्यर्थः।
इध्मश्चेत्याहुतिं तां तु प्रक्षिपेदनले पुनः। देवांजनेति सर्वत्र स्कन्ने त्वभिमंत्रो द्विजैः। देवानि
त्यादि इध्मश्चेत्यं तेन मंत्रेण सर्वत्र स्कन्ने पतितं हविरभिमंत्र्येत्॥ व्युत्क्रमो देवतानां तु
संकल्पादौ भवेद्यदि॥७३॥ मंत्राणां व्युत्क्रमात्स्वद्वाह्यामकालो भवेद्यदि मध्यात्सर्वाधीत
श्चेति व्युत्क्रमोऽस्य भवेद्यदि॥७४॥ निमित्तानंतरं सर्वप्रायश्चित्तं भवेदिह॥ अस्यार्थः।

Indira Gandhi National
Centre for the Arts

अन्वाधानादौ देवतानां व्युत्क्रमः पौर्वापर्यभंगश्चोद्भवति तन्मंत्राणामपि व्युत्क्रमो भवति।
१७० तथा मध्यास्तर्वाधश्चेद्धविषो वद्यतीत्यत्र अवदान धर्मेपि व्युत्क्रमो भवति चेत्तदा होमान्तेत
दपराध निमित्तं प्रायश्चित्तं भवेत्। विशेषस्य तु गृत्वात्तत् समुच्छितव्याहृत्या आज्याहुतिरि
ति निमित्तानंतरमि। तस्यतन्नपावसंदेहः। प्रागेवोत्पद्यते दोष आज्यसंस्कारतो यदि॥
७५॥ प्रायश्चित्तं भवेदाज्यसंस्कारानंतरं ततः। अस्यार्थः। आज्यसंस्कारात्प्रागेव प्रायश्चि
त्त निमित्ते सति आज्यसंस्कारानंतरं प्रायश्चित्तं कुर्यात्। प्रायश्चित्त रूपा पूर्णाहुतिः।
सर्वत्र आज्यसंस्कारभागानंतरं भवतीति ज्ञातव्यं। ततः प्रधानद्रानद्रव्याणां व्युत्क्रमस्या
च्चे तथा निर्वपणादिषु॥७६॥ यद्वोदेवाश्च चाव्रत्मा जुहुयात्तु स्रुक् वाहुतिं। यन्मु स्वं स्वग हेद्र
व्यं होम कर्त्रे दद्यात्ततः॥७७॥ यजमानस्तु जुहुयाद् ब्रह्माभावे स्रुवाहुतिं॥ कस्मैचिद्ब्राह्मणाया
स्मिन्पक्षे द्रव्यं दद्यात्ततः॥७८॥ होतव्यका हुतिश्चात्र व्याहृत्यार्च्यैः समुच्चयादितः। अस्यार्थः। १७०
बहुषु होम द्रव्येषु संस्कृयंत्र पौर्वापर्यभंगः तथानिर्वपणेपि क्रमभंगो भगो भवति तदा यद्वो

देवा अतिपातयानीत्यृचा ब्रह्मा आज्याहुतिं जुहोति। तदभावे यजमानः स्वयमेव जुहोति।
तत्र होमकर्त्रे ब्राह्मणाय गृहे विद्यमानं द्रव्यं तु भोजनपर्याप्तं देयमिति ब्राह्मणस्व संभवेत्त
यमेव होमकरणपक्षे कस्मैचिद्ब्राह्मणाय उक्तं द्रव्यादिति। तथैव यद्वो देवा इति मंत्रेण हुत्वा
समुच्छितव्याहृत्या एकामाज्याहुतिं जुहोति। प्राग्यागाद्व्युत्क्रमे ज्ञाते इदं कृत्वा यजेत्ततः॥७९॥
अविज्ञाते विपर्यासे विहितां देवतास्मरन्॥८०॥ अस्यार्थः। होमात्प्रागेव व्युत्क्रमे परिज्ञाते अज्ञा
नलोपप्रायश्चित्ते विहितां विपर्यस्ते चाविहितां देवतां स्मरन्। इदं पूर्वोक्तं प्रायश्चित्तं कृत्वा
पश्चाद्यजेत्। होमं कुर्यादित्यर्थः। यदा हविरपक्वं स्यात्तेनैव हविषा यजेत्॥८०॥ चतुःशरा
वमात्रे स्तु पचेद्व्रीहिभिरोदनं। भोजयेत्तेन चान्नेन चतुरो ब्राह्मणांस्तथेति॥८१॥ अस्यार्थः॥
यदा बर्हिष्यासादनानंतरं अपक्वमिति ज्ञात्वा पुनः पाकोनिषिद्ध इत्यतस्तेनैवान्नेन अपक्वेया
गं समापयेत्। होमानंतरं वक्ष्यमाणमिदं प्रायश्चित्तं कुर्यात्। चतुःशरावपरिमितत्रीहिनि
ष्पन्नैः तंडुलैः ओदनं गृहे सादयित्वा तेनैव चतुरो ब्राह्मणान् भोजयेदिति॥ बहुद्रव्यम

Indira Gandhi National
Centre for the Arts

दग्धं वा किंचिदेव यदा हविः ॥ शिष्टेनेष्ट्वा पुनर्यागः स्यादारभ्य दिनस्तथेति। अस्यार्थः। यदा ह
१७१ विर्बहु दग्धं अथवा किंचिद्दग्धं वा भवेत्तदा हविषि होमयोग्यं किंचिदवशिष्यते तेनैव यागं
समाप्य पुनः स एव यागः आदितः कर्तव्यः। आदित आरभ्य कर्तव्यः। कृत्स्नं दग्धं यदा तु
स्यात्पुनरुत्पादयेद्धविः। स एव यागः कर्तव्यः पुनर्यागस्तु नेष्यते॥ ८३॥ अस्यार्थः। यदा सं
पूर्णं हविर्दग्धं भवति तदा तद्धविर्दूरीकृत्य पुनः सम्यग्घविरुत्पाद्य तमेव यागं समापयेत्।
न तु यागान्तरं कर्तव्यं। मध्यात्पूर्वार्धतो वत्तं यदि दुष्टं हविर्भवेत्। तत्स्थाने हविषो वद्येन्मध्या
त्पूर्वार्धतः पुनरिति॥ ८४॥ अस्यार्थः। मध्यात्पूर्वार्धतः अवत्तं स्वीकृतं दर्वीस्थितं हविः यदि प्र
मादवशाद्दुष्टं भवति तदा तद्दर्वीस्थितं हविर्दुष्टत्वात्त्यक्त्वा पश्चात्तस्मिन्नेव स्थालीस्थितहवि
षः सकाशात् मध्यात्पूर्वार्धाच्च पुनर्गृहीत्वा यागं समापयेत्। पुनर्यागाद्यपेक्षा नास्ति। समा
रूढसमिदारोपे पुनराधेयमिष्यते। अस्यार्थः। अग्न्यारोपितसमिदारोपे सति पुनराधेयं पु १७१
नःसंधानं कुर्यात्। सोऽत्र क्रमविरोधाद्यन्यन्मार्ग्यमुद्देशतस्त्विदं॥ ८५॥ बौधायनमिदं प्राह

e 6½

॥फडकेइत्युपनामकगणेशभट्टस्येदं पुस्तकं॥ ॥ ॥श्रीराम॥

Indira Gandhi National
Centre for the Arts

लोके पंचमखेषु तु। अस्यार्थः। अविरोधिपरसूत्रोक्तमपि अन्येषणीयं भयति॥ पंचम
१७२ खलोपे बौधायनः। इदं प्राय। श्चित्तमाह तत्क्रमोंतरो क्रमपि ग्राह्यमित्यर्थः। एतेभ्यः पंच
यज्ञेभ्यो यद्येकोपि विहीयते॥ ८६॥ मनस्वत्या हुतिस्तत्र प्रायश्चित्तं विधीयते॥ अ
को स्यार्थः॥ पंचयज्ञानामध्ये यद्यपि लुप्यते तदा मनोज्योतिमंत्रेण प्रायश्चित्तार्थमाज्याहुतिं जु
होति। एवं द्व्यहं त्र्यहं वापि प्रमादादकृतेषु तु॥ ८७॥ लिस्त्रस्तंतुमतीर्हुत्वा चतस्रो वारुणीर्जपे
त्। दशाहं द्वादशाहं वा निवृत्तेषु तु सर्वशः॥ ८८॥ चतस्रो वारुणीर्हुत्वा कार्यस्तंतुमतश्चरु
रिति। अस्यार्थः। प्रमादाद्वूरा। द्व्यहं त्र्यहं वा पंचमहायज्ञा न कृताश्चेत्तदा तिस्रस्तंतुम
तीर्हुत्वा चतस्रो वारुणीर्जपेत्। अनंतरं पंचमहायज्ञाः कार्याः एवं दशाहे द्वादशाहे निवृत्तेस
ति चतस्रो वारुणीर्हुत्वा। अनंतरं तंतुमते अग्नये चरुणा हुत्वा पंचमहायज्ञाः कार्या इत्य १७२
र्थः॥ ॥ इत्याश्वलायनकारिकाविवरणे तृतीयोध्यायः॥ ॥ श्रीकृष्णार्पणमस्तु॥
शाके १७२९ प्रभवाब्दे आश्वीनशुक्लपंचम्यां भौमवासरे रात्रौ द्वितीयप्रहरे समाप्तिः॥ श्रीसांब॥

Indira Gandhi National
Centre for the Arts